**SAHITYA** **SASTRI III$^{rd}$ YEAR**

**Paper - VI**

# Part - A

# Abhijnanashakuntalam


## Directorate of Distance Education

Rashtriya Sanskrit Vidyapeetha

Accredited at A level by NAAC

Tirupati - 517 507 (A.P.)

# प्रथमभागः ( Unit - I)

**अस्मिन् विभागे वक्ष्यमाणविषयोपरि आलोचना कृता अस्ति। १- उद्देश्यम्, २- आमुखम्, ३- नाटकस्य लक्षणम्, ४- नाट्योत्पत्तौ प्राच्यमतम्, ५- नाट्योत्पत्तौ पाश्चात्त्यानां मतम्, ६- नाट्यप्रयोजनम् ७. नाट्यकथावस्तु , ८- नाटके नेता, ९- नायिका, १०- महाकविकालिदासः, ११ - कालिदासस्य जीवनवृत्तान्तः, १२. कालिदासस्य कृतयः, १३- बोधप्रश्नाः ।**

# अभिज्ञानशाकुन्तलम्

## १. उद्देश्यम् :

अधुना आन्ध्रप्रदेशस्य तिरुपतौ विद्यमानं 'राष्ट्रियसंस्कृतविद्यापीठम्' इति अनेन विश्वविद्यालयेन परिचालिते दूरस्थशिक्षणपाठ्यक्रमे भागं ग्रहीतॄणां भवतां समेषां सुस्वागतम्। गृहे उषित्वा श्रेणीगृहं प्रति न आगत्य, अथवा साक्षात् शिक्षकमुखात् पाठ्यं न श्रुत्वा यथा भवन्तः विषयवस्तुबोधने समर्थाः भवेयुः, तदर्थम् एतादृशः कश्चित् अभिनवः यत्नः अत्र कृतः वर्तते। इदमेव अस्य पुस्तकस्य रचने महत् उद्देश्यम् ।

अस्मिन् ग्रन्थे विषयद्वयस्य चर्च्चा कृता अस्ति। कालिदासविरचितम् 'अभिज्ञानशाकुन्तलम्' इति एकः विषयः, सुबन्धुरचितस्य 'वासवदत्ता' इति गद्यकाव्यस्य कियान् अंशश्च इति अन्यः विषयः।

प्रथमभागे आदौ कालिदासकृतस्य 'अभिज्ञानशाकुन्तलम्' इति नाटकस्य आलोचना, ततः द्वितीये भागे सुबन्धुकृतस्य 'वासवदत्ता' इति गद्यकाव्यस्य आलोचना क्रियते।

## २. आमुखम् -

इदम् अभिज्ञानशाकुन्तलमेकं संस्कृतनाटकम् । नाटकमिदं महाकविना कालिदासेन विरचितम् । कवेः कर्म काव्यम् । मञ्जुलतरशब्दार्थयुगलं काव्यस्य शरीरं भवति । शौर्यादिवत् माधुर्योजःप्रसादाः गुणाः, आत्मवत् रसः , पद -सङ्घटना रीतिः च अवयवसंस्थानवत् काव्ये वर्तन्ते । काव्यं तावत् दृश्यश्रव्यभेदेन द्विविधम् । रघुवंश-कुमारसम्भव- नैषधीयचरितादीनि महाकाव्यानि श्रव्यकाव्यान्तर्गतानि भवन्ति । अभिज्ञानशाकुन्तल प्रभृतीनि काव्यानि दृश्यकाव्यरूपेण परिचितानि सन्ति । महाकविना कालिदासेन रचितेषु त्रिषु नाटकेषु अभिज्ञानशाकुन्तलमिदमन्यतमं भवति । नाटकस्य नामान्तरं रूपकमस्ति । 'रूपारोपात्तु रूपकम्' इति रूपकस्य लक्षणम् । रामादीनां रूपं नटादिभिः गृहीतत्वात् रूपकमिति नामसार्थक्यमस्ति । रूपकं तावद् दशविधम्, यथा - नाटकम् प्रकरणम्, भाणः, व्यायोगः, समवकारः, डिमः, ईहामृगः, अङ्कः वीथिः प्रहसनं च । दशविधेषु

नाटकं प्रमुखं भवति ।

भारतीयलोकसमीक्षायाः आधारानुसारेण 'काव्येषु नाटकं रम्यम्' इति आभाणकं प्रसिद्धम् । अरसिकान् रसिकान् असहृदयान् सहृदयान्, कठिनहृदयान् तरलहृदयान् च जनान् विधातुं नाटकं समर्थं भवति । नाट्यशास्त्रस्य रचयितुः आचार्यभरतस्य मतेन तत् ज्ञानं ज्ञानं न , तत्शिल्पं शिल्पं न, सा क्रिया क्रिया च न यत् नाट्ये न दृश्यते । सः लिखति -

न तत् ज्ञानं न तत् शिल्पं न सा विद्या न सा कला ।
नासौ योगो न तत् कर्म नाट्येऽस्मिन् यन्न दृश्येत ॥ ना.शा. १/११७

**३. नाटकस्य लक्षणम्–** साहित्यदर्पणे आचार्यविश्वनाथः वक्ष्यमाण प्रकारेण लिखति,

यथा - 'नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम्
विलासद्ध्र्यादिगुणवद्युक्तं नानाविभूतिभिः ।
सुखदुःखसमुद्भूति-नानारसनिरन्तरम्
पञ्चादिका दशपरास्तत्राङ्काः परिकीर्तिताः ।
प्रख्यातवंशोराजर्षि र्धीरोदात्तः प्रतापवान् ।
दिव्योऽथ दिव्यादिव्यौ वा गुणवान् नायको मतः ।
एक एव भवेदङ्गी शृङ्गारोवीर एव वा ।
अङ्गमध्ये रसाः सर्वे कार्यं निर्वहणेऽद्भुतम् ।
चत्वारः पञ्च वा मुख्याः कार्यव्यापृतपूरुषाः
गो पुच्छाग्रसमाग्रन्तु बन्धनं तस्य कीर्तितम्' । सा.द. ६/६

अत्रेदं तात्पर्यं यत् नाटके प्रख्यातः वृत्तान्तः भवेत्, तत्र मुख-प्रतिमुख-गर्भ-विमर्श-उपसंहतिनामकाः पञ्च सन्धयः भवेयुः, नाटके विलाससमृद्धिप्रभृतयः च वर्ण्णनीयाः भवेयुः, नाना विभूतिभिः (ऐश्वर्यशालिजनचरित्रैः घटनाशालिवस्तुभिः वा) तत् युक्तं भवेत् । सुखदुःखवर्ण्णनं नानारसयोजनञ्च तत्र भवेत् । नाटके पञ्चाङ्केभ्यः आरभ्य दशाङ्कान् यावत् अङ्कास्त्रिष्ठेयुः, नाटके प्रख्यातवंशे समुत्पन्नः कश्चित् राजर्षिर्धीरोदात्तः नायकोभवेत् अथवा कश्चित् दिव्यः (स्वर्गीय इन्द्रादिः) अदिव्यः (मर्त्त्यः मानुषादिः) अथवा दिव्यादिव्यः (रामयुधिष्ठिरादिः) नायकः भवेत् । शृङ्गारादिनवरसमध्ये कश्चिदेकः शृङ्गारः वीरः वा नाटके अङ्गी रसो भवेत् । अन्ये रसा अङ्गरूपेण नाटके भवेयुः, निर्बहणसन्धौ (पञ्चसन्धिमध्ये अन्तिमोभवति यः उपसंहृतिसन्धि तत्र) अर्थात् नाटकस्य अन्तिमे भागे प्रयुज्यमाने उपसंहृतिसंधौ अद्भुतरसः योजनीयः भवेत् । नाटकमध्ये सर्वदा चत्वारः पञ्च वा पुरुषाः(पात्राणि) कार्यव्यापृताः स्युः, अन्तिमे गोपुच्छाग्रवत् नाटकस्य बन्धनं (समापनम्) भवेत्, अर्थात् यथा गोपुच्छं मूलात् शेषं यावत् क्रमशः क्षीणं भवति तथा नाटकस्य विषयवस्तु क्रमशः सङ्कुचितं सत् अन्तिमेऽङ्के समाप्तं भवेत् ।

**४. नाट्योत्पत्तौ प्राच्यमतम् –** नाटकोत्पत्तिप्रसङ्गे नाट्यशास्त्रे भरतमुनिः स्पष्टतया लिखति यत् एकदा सर्वे मुनयः आत्रेयप्रमुखाः नाट्यकोविदं भरतमुपेत्य पप्रच्छुः, हे भगवन्! अयं यः नाट्यवेदः ग्रथितः सः किमर्थं ग्रथितः, तत्र कति अङ्गानि सन्ति, तस्य प्रमाणं किम्, तस्य प्रयोगश्च कीदृशः ? एतत् श्रुत्वा भरतः उक्तवान् यत् हे मुनयः भवन्तः शुचिमनसः सन्तः सावधानाः भवन्तु, मद्वचनं च श्रुण्वन्तु। पूर्वं सत्ययुगे स्वायम्भुवमन्वन्तरे सर्वे सुखेनासन्। ततः यदा वैवस्वतमन्वन्तरे त्रेतायुगःसमागतः तदा जम्बूद्वीपे ग्राम्यधर्मः प्रवृत्तः। जनाः कामाकुलाः लोभाकुलाश्च जाताः। जनानां मध्ये ईर्ष्या क्रोधश्च समुत्पन्नः। देवदानवयक्षरक्षःगन्धर्व-उरगैः जम्बुद्वीपः समाक्रान्तः जातः। सर्वत्र अशान्तपरिवेशःवलवत्तरः अभवत्। तदा महेन्द्रप्रमुखाः देवाः पितामहमूचुः, हे पितामह! भवता सृष्टाः चत्वारोवेदाः स्त्रीशूद्रादिभिः न ग्रहणीयाः भवन्ति। अतः अस्मिन् समये क्रीडनीयकसमानं भवान् अन्यमेकं वेदं सृजतु यः दृश्यात्मकः श्रव्यात्मकश्च भवेत्। 'न वेदव्यवहारोऽयं संश्राव्यः शूद्रजातिषु

तस्मात् सृजापरं वेदं पञ्चमं सार्ववर्णिकम्,
महेन्द्रप्रमुखैर्देवैरुक्तः किल पितामहः
क्रीड़नीयकमिच्छामो दृश्यं श्रव्यं च यद् भवेत्। ना. शा.१/११-१२

ततः पितामहः देवानामभीष्टं पूरयितुं चतुरः वेदान् सस्मार, नाटकवेदं चकार च। सः ऋग्वेदात् पाठ्यम्, सामवेदात् गीतम्, यजुर्वेदादभिनयम् अथर्ववेदात् रसञ्च जग्राह। नाट्यशास्त्रानुसारेण यथा,

'एवं सङ्कल्प्य भगवान् सर्ववेदाननुस्मरन्
नाट्यवेदं ततश्चक्रे चतुर्वेदाङ्गसम्भवम्
जग्राह पाठ्यमृग्वेदात् सामभ्योगीतमेव च
यजुर्वेदादभिनयान् रसानाथर्वणादपि॥ ना. शा. १/१६-१७

अस्य नाटकस्य योजने पितामहः भरतमाज्ञापितवान्। भरतः स्वशतपुत्रैः नाट्ययोजनं कृतवान्। अत्रापि स्त्रीपात्रभूमिकामप्सरसः संपादितवत्यः।

**५. नाट्योत्पत्तौ पाश्चात्त्यमतम्-** नाट्यकलायाः उत्पत्तिप्रसङ्गे पाश्चात्त्यालोचकाः वक्ष्यमाणप्रकारेण स्वाभिप्रायं प्रयच्छन्ति। अस्मिन् प्रसङ्गे ड़ां रिज्व्वे (Dr Ridgeway) प्रकाशयति यत् समग्रविश्वे मृतानां जनानामात्मशान्तये नाट्यस्योत्पत्तिरभवत्। एतेन तेषां कृते श्रद्धाप्रकटनमपि भवेत्। रामलीलाकृष्णलीलादि एतादृश्याः भावनायाः मूलमस्ति। अतः मृतकपूजातः एव शनैः शनैः नृत्यगीताभिनयानामुत्पत्तिर्जाता, क्रमश एतत् नाटकरूपेण परिणतम्।

ड़ां रिजव्वे महोदयस्य मतमिदं भारतीयालोचकानां कृते रुचिकरं नाभवत्। रामलीलादि वस्तुतः मृतकानां शान्तये नाभिप्रेतम्। प्रत्युत रामादीनां चरितं परिशील्य जनाः स्वचरित्रसंशोधनाय यतमानाः भवन्ति। अतः आलङ्कारिकशिरोमणिः ममटाचार्यः लिखति, रामादिवत् प्रवर्तनीयम् न रावणादिवदिति कृत्याकृत्यप्रवृत्तिनिवृत्तिद्वारेण उपदेशं ददाति काव्यम्।

अपरे पाश्चात्त्यालोचकाः अन्यथा मतं पोषयन्ति। ते वदन्ति नाट्योत्पत्तिः 'मे पोल्' (may pole)

नृत्यात् अभवत् । पाश्चात्त्यदेशे 'मे'मासः (month of may) अत्यन्तमुल्लासस्य मासः भवति । अस्मिन् मासे तत्रत्याः जनाः विभिन्नानुत्सवान् पालयन्ति । वस्तुतः शैत्यप्रधानेषु पाश्चात्त्यदेशेषु 'मे' मासे किञ्चित् परिमाणेन शैत्यं न्यूनं भवति । यथा अस्माकं देशे वसन्तर्तुः आनन्ददायकः तथा तेषां कृते may मासः । तदा ते जनाः आनन्देन गायन्ति नृत्यन्ति च । एकस्मिन् उन्मुक्तप्राङ्गणे एकं दीर्घदण्डं (Pole) ते भूमौ गर्ते दृढमूलं कृत्वा स्थापयन्ति । ततः दण्डस्य चतुःपार्श्वेषु स्त्रियः पुरुषाः सर्वे नृत्यन्ति । भारतेऽपि इन्द्रध्वजपर्व एतादृशं पाल्यते ।

अपरे हिल्ब्रेट (Hillebrandt) ष्टेनकोनो (Sten konow) प्रभृतयः आलोचकाः मतं पोषयन्ति यत् नाटकस्योत्पत्तिः लोकनृत्यात् समभवत् । प्राचीने काले जना एवं रूपेण मनोविनोदनाय नृत्यादिकमकुर्वन् । क्रमशः एतत् लोकनृत्यं नाटकरूपेण परिणतं भवेत् ।

जर्मन् विद्वान् ड़.पिशेलः (Dr. pischel) अस्मिन् प्रसङ्गे प्रकाशयति यत् नाट्योत्पत्तिः पुत्तलिकानृत्यात् सम्भवेत् । पुत्तलिकानृत्ये कश्चित् सूत्रधारः पूत्तलिकान् नर्तयति । असौ सूत्रधारशब्दः नाटके सुप्रसिद्धः । अतः नाट्योत्पत्तिः पुत्तलिकानर्तनात् सम्भवेत् ।

एतदतिरिच्य Dr Luders प्रकाशयति यत् नाटकस्य उत्पत्तिः प्राचीनकाले छायया प्रदर्शितात् नाट्याभिनयात् सम्भवेत् । छायामाध्यमेन प्रदर्शिते नाटके अधिकं किञ्चित् तथ्यं योजयित्वा क्रमशः नाटकस्य रूपपरिपाटीं उन्नततरीं कृतवन्तः नाट्याभियोक्तारः । अनेन प्रकारेण नाट्योत्पत्तिप्रकारः पाश्चात्त्यमतानुसारेण संक्षिप्ततया आलोचितः ।

**६. नाट्यप्रयोजनम्–** आचार्यभरतमुनिः स्वप्रणीते नाट्यशास्त्रे नाट्यस्वरूपविषये प्रयोजनविषये च वक्ष्यमाणप्रकारेण लिखति, यथा -

त्रैलोक्यस्यास्य सर्वस्य नाट्यभावानुकीर्तनम्
क्वचिद्धर्मः क्वचित्क्रीडा क्वचिदर्थः क्वचित् श्रमः ।
क्वचित् हास्यं, क्वचित् युद्धं क्वचित् कामः क्वचित् वधः ।
धर्मो धर्मप्रवृत्तानां कामः कामोपसेविनाम्
निग्रहो दुर्विनीतानां विनीतानां दमक्रिया
क्लीवानां धाष्टर्यजननमुत्साहः शूरमानिनाम्
लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम् ।
उत्तमाधममध्यानां नराणां कर्मसंश्रयम्
हितोपदेशजननं नाट्यमेतद्भविष्यति
एतद्रसेषु भावेषु सर्वकर्मकियासु च
सर्वोपदेशजननं नाट्यमेतद् भविष्यति
दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्
विश्रामजननं लोके नाट्यमेतद् भविष्यति ।

धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्

लोकोपदेशजननं नाट्यमेतद् भविष्यति । नाट्यशास्त्रम् - १/१०४-११२

अत्र तात्पर्य्यमिदं यत् मुख्यतया लोकवृत्तानुकरणं नाट्यमेव, क्लीवानां धृष्टताजननं शूराणाम् उत्साहवर्धनं च नाट्यात् भवति। दुर्विनीतानां निग्रहः विनीतानां दमक्रिया च नाट्यात् जायते। उत्तम-मध्यम-अधमपात्राणां कृते हितोपदेशजननं नाट्यात् जायते। ये दुःखार्ताः, श्रमार्ताः, शोकार्ताः तपस्विनश्च सन्ति तेषां विश्रामजननं नाट्यात् भवति। न केवलम् एतदेव अपि च सर्वेषां धर्मः, यशः, आयुः हितं बुद्धिवर्धनं च नाट्यात् जायते। नाटकं विलोक्य रामादिवत् प्रवर्तनीयं न रावणादिवत् इति कृत्याकृत्यकर्तव्यविषये सर्वे दर्शकाः अवश्यं ज्ञातुं पारयिष्यन्ति। इति।

**७. नाटकीयकथावस्तु –** नाटकीयकथावस्तु प्रसिद्धं भवेत् । इदं कथावस्तु द्विविधम्, यथा - १. आधिकारिकम्, २. प्रासङ्गिकम् । नाटके यत् मुख्यं कथावस्तु तद् आधिकारिकम् उच्यते, मुख्यकथावस्तुनः अङ्गभूतं कथावस्तु प्रासङ्गिकमुच्यते । नाटकस्य फलं यः लभते सः 'अधिकारी' इत्युच्यते । तस्याधिकारिणः संपर्कीयत्वात् नाटकस्य मुख्यकथावस्तु आधिकारिकमुच्यते । उक्तञ्च -

'अधिकारः फलस्वाम्यमधिकारी च तत् प्रभुः

तन्निर्वृत्तमभिव्यापि वृत्तं स्यादाधिकारिकम्' । (दशरूपकम् १/१२)

**८. नाटके नेता –** नाटके नेता (नायकः) मुख्यं पात्रं भवति । नयति नाटकस्य कथावस्तु अन्तिमं यावत् प्रापयतीति नायकः नेता वा । 'नी' प्रापणे धातोः 'ण्वुल्' प्रत्यये नायकशब्दः 'तृच्' प्रत्यये 'नेता' इति शब्दश्च निष्पद्यते । नाट्यशास्त्रानुसारेण नायकः चतुर्विधः १. धीरोदात्तः, २. धीरोद्धतः, ३.धीरललितः, ४. धीरशान्तः । भरतमुनेः अनुसारेण देवाः धीरोद्धताः, राजानः धीर ललिताः, सेनापतयः अमात्याश्च धीरोदात्ताः, ब्राह्मणाः वणिजश्च धीरललिताः नायकाः भवन्ति । नाट्यशास्त्रे भरतः लिखति -

देवा धीरोद्धता ज्ञेया ललितास्तु नृपाः स्मृताः

सेनापतिरमात्यश्च धीरोदात्तौ प्रकीर्तितौ

धीरप्रशान्ता विज्ञेया ब्राह्मणा वणिजस्तथा। (ना.शा.-३४/१८-१९)

नायकस्य लक्षणं यथा - 'अविकत्थनः क्षमावाान् अतिगम्भीरः महासत्त्वः स्थेयान् निगूढमानः शीलवान् च नायकः भवेत्' । (सा.द. ३य परिच्छेदः)

**९. नाटके नायिका –** नाटके नायकस्य यथा प्राधान्यमस्ति तथा नायिकाया अपि प्राधान्यं शृङ्गार प्रधाने नाटके अस्ति ।

नायिकायाः सामान्यलक्षणं - नायकलक्षणवत् भवति । स्वीया, परकीया, सामान्या च इति भेदेन नायिका प्रथमतः त्रिविधा । स्वीयनायिका इत्युक्ते या स्त्री स्वकीया भवति सा स्वीया नायिका भवति । स्वीया नायिका मुग्धा - मध्या - प्रगल्भा भेदेन त्रिविधा । या स्त्री परस्य सा परकीया, अथवा पित्रादीनाम् अधीनतां

गता नवयौवना, वालिकापि परकीया भवति । गणिकाद्याः सामान्यस्त्रियः (नायिकाः) भवन्ति । विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया (सा. द. तृतीयपरिच्छेदः) या नायिका विनयादिगुणयुक्ता सरला, गृहकर्मनिपुणा च भवति सा स्वीया नायिका । 'परकीया द्विधा प्रोक्ता परोढा कन्यका तथा' । परकीया नायिका परोढा-कन्यका रूपेण द्विविधा, परेण ऊढा परोढा । तत्र 'यात्रादिषु सदा आसक्ता परोढा भवति । सा तु कुलटा अथवा निर्लज्जा अपि भवति । कन्यका तु अविवाहिता सलज्जा नवयौवना च भवति । विश्वनाथः दर्पणे तृतीयपरिच्छेदे लिखति-

'यात्रादिनिरतान्योढा कुलटा गलितत्रपा ।
कन्यात्वजातोपयमा सलज्जा नवयौवना'

या नायिका वेश्यारूपिणी, केवलं शरीरं विक्रीय धनाभिलाषिणी भवति, नायकं प्रति बहिर्दर्शितानुरागा च भवति, सा सामान्यनायिका, विश्वनाथः सामान्यस्त्रीलक्षणे कथयति - धीरा कलाप्रगल्भा स्यात् वेश्या सामान्यनायिका । पुनः मुग्धामध्याप्रगल्भा भेदेन स्वीया नायिका त्रिविधा । विस्तारभयात् आसां लक्षणादिविषये चर्चा न क्रियते । अभिज्ञानशाकुन्तले नायिका शकुन्तला स्वीया नायिकान्तर्गता मुग्धानायिका भवति ।

## १०. महाकविः कालिदासः :

अभिज्ञानशाकुन्तलम्' इति संस्कृतनाटकं महाकविना कालिदासेन विरचितम् । अधुना प्रसङ्गवशतः कालिदासस्य विषये किञ्चिदालोच्यते । कालिदासस्य रचनानाम् अनुशीलनेन ज्ञायते यत् सः अतीव विनयी भद्रश्चासीत् । सः कदाचित् स्वाहङ्कारं न प्रदर्शयति । अभिज्ञानशाकुन्तलनाटके प्रयुक्तादेकस्मात् पद्यात् एतत् ज्ञायते यथा -

'आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः' (१/२ श्लोकः)

अत्र तात्पर्यं यत् यः यावान् पण्डितः भवतु नाम यदि तदुक्तिः अन्येषां विदुषां कृते आमोददायिनी न भवति तर्हि तस्य पाण्डित्यं निष्फलम् । तस्य प्रयोगविज्ञानमपि मूल्यहीनम् । यतोहि शिक्षितानामपि चेतः आत्मनि अप्रत्ययं भवति ।

कालिदासः कदा अस्मिन् धरातले प्रादुरभूदिति स्पष्टतया वक्तुं न शक्यते । तस्य कः पिता, का च माता, भ्रातरःकियन्तः, भगिन्यः कियत्यः, कस्य वा राज्ञः राजसभायां सः आसीदिति विषये किमपि स्पष्टचित्रं न प्राप्यते । कुत्र सः जन्मग्रहणं कृतवान्, तस्य वाल्यकालः कथमतिवाहितः, यौवने सः किं कृतवान्, वार्धक्यावस्था तस्य कथमासीत्, तस्य पुत्राः कन्याः वा कथमासन्, का च तस्य पत्नी, तस्य मृत्युरपि कथमासीदिति विषये प्रामाणिकं किञ्चित् तथ्यं नास्माभिः प्राप्यते । किम्बदन्तीमाधारीकृत्य यत् किञ्चित् लभ्यते तत्र सत्यता कियतीति वक्तुं कोऽपि न समर्थः, तथापि कालिदासस्य समयसीमानिर्धारणे ऐतिहासिकाः यन्निगदन्ति तत् संक्षिप्यात्रालोच्यते ।

मालविकाग्निमित्रनाटके कथानकं शुङ्गवशीयराजस्याग्निमित्रस्य चरित्राद्गृहीतमस्ति । इतिहासानुसारेण असौ अग्निमित्रः सेनापतेः पुष्पमित्रस्य पुत्रः भवति । सेनापतिपुष्पमित्रः मौर्यवंशस्य उच्छेदकः आसीत् । सः

खी.पू. १८०तमे वर्षे मौर्यवंशं ध्वस्तं कृतवान् इति इतिहासः प्रमाणम् । अतः कालिदासस्य समयः खी.पू. १८०तः पूर्ववर्ती न भवेत् । कालिदासः मालविकाग्निमित्रनाटके स्वपूर्ववर्तिनां भास-सौमिल्यकविपुत्राणाञ्च नाम लिखति । अतः भासादीनामनन्तरवर्ती कालिदासः इति । पुनः महाकविकालिदासस्य नामोल्लेखः ७म शतकाविर्भूतेन महाराजहर्षवर्धनस्य राजसभायां विद्यमानेन कविवरेण बाणभट्टेन बिहितः । अपि च दक्षिणभारते ऐहोलग्रामे समुपलब्धस्य एकस्य शिलालेखस्योपरि खोदिते प्रशस्तिफलके कालिदासस्य नाम उपलब्धं भवति । ऐतिहासिकानां मतेन बाणभट्टस्य कालः ऐहोलशिलालेखस्य कालश्च ७म शतकमिति निर्धारितम् । अतः ७म शतकादनन्तरं कालिदासस्य कालः निर्णेतुं न शक्यते । एतेनालोचनेन स्पष्टं भवति यत् कालिदासः खी.पू १८०तः ख्रीष्टीय ७म शतकाभ्यन्तरे यस्मिन् कस्मिन् समये आसीदिति ।

कालिदासस्य रचनातः ज्ञायते यत् सः विक्रमादित्यस्य समये आसीत् । अभिज्ञानशाकुन्तले सूत्रधारस्य उक्तौ सः प्रकाशयति यत्, 'सूत्रधारः - ''आर्ये ! इयं रसभावदीक्षागुरोर्विक्रमादित्यस्य अभिरूपभूयिष्ठा परिषत् । अस्याञ्च कालिदासग्रथितवस्तुना नवेन अभिज्ञानशाकुन्तललमिति नामधेयेन नाटकेन उपस्थातव्यमस्माभिः । तत् प्रतिपात्रमाधीयतां यत्नः'' (अ.शा. सूत्रधारस्योक्तिः) एवमपि विक्रमोर्वशीयनाटकस्य नामकरणे विक्रमशब्द आगच्छति । यद्यपि नाटकस्य तस्य नायकः पुरुरवाः भवति तथापि नायकस्य नाम बिहाय कालिदासः नाटकस्य नाम 'विक्रमोर्वशीयम्'इति करोति एतदतिरिच्य विक्रमोर्वशीयनाटके प्रथमाङ्के चित्ररथस्य कथने द्विवारं विक्रमशब्दस्य उल्लेखो वर्तते । यथा, चित्ररथः - (राजानं दृष्ट्वा बहुमानम्) दिष्ट्या महेन्द्रोपकारपर्याप्तेन विक्रममहिम्ना वर्तते भवान् । (वि.उ.पृ २६ चित्ररथोक्तिः) अन्यदेकं स्थलं यथा, चित्ररथः-'युक्तमेतत् अनुत्सेकः खलु विक्रमालङ्कारः (वि.उ.पृ २९)

एतेन प्रतीयते यदसौ विक्रमः (विक्रमादित्यः) कवेः कालिदासस्य आश्रयदाता राजा विक्रमादित्यः आसीत् । विक्रमादित्यस्य यः समयः स एव समयः कालिदासस्य इति निश्चितम् । विक्रमादित्यस्य आदर्शः न्यायधर्मपरायणता, प्रजानुरञ्जकता, वैदुष्यञ्च सर्वैः भारतीयजनैः ज्ञातम् । जनश्रुतिः (किम्बदन्ती) प्रमाणयति यदसौ विक्रमादित्यः उज्जयिनीनरेशस्य गन्धर्वसेनस्य पुत्रः आसीदिति । असौ विक्रमादित्यः शकान् विजित्य विजयस्य स्मारकत्वेन 'विक्रमसम्बत्' इति एकं सम्बत् प्रारब्धवान् । भारतीयज्योतिषाः प्रमाणयन्ति यत् खी.पू. १मशतके विक्रमसंवत् प्रचलितमासीत् । कालिदासानन्तरं 'विक्रमादित्यः' इति उल्लेखः गाथासप्तशत्यां द्रष्टुं शक्यते । गाथासप्तशत्यां सः श्लोकः प्राकृतमयः वक्ष्यमाणरूपेणास्ति । यथा-

'संवाहण-सुहरस-तोसिएणदन्तेण तुहकरे लक्खम् ।
चलणेण **विक्कमाइत्त**चरिअं अणुसिक्खिअं तिस्सा'। (गाथा, ५/६४)

अत्र विक्रमादित्यः भृत्यस्य शत्रु संवाधनात् तुष्टः सन् तस्मै लक्षपरिमितं धनं ददौ इत्यभिप्रायः । एतेन स्पष्टतया प्रतीयते यत् गाथासप्तशतीरचनाकाले विक्रमादित्यः अतिप्रसिद्धिं गतः । तदानीं जनमानसे प्रसिद्धिरासीत् यत् विक्रमादित्यनामकः कश्चिद्राजा महाप्रतापशाली आसीत्, यः शत्रुविजये सन्तुष्टः सन् भृत्येभ्यः बहुधनानि दत्तवान् । गाथासप्तशत्याः रचयिता हालः ख्रीष्टीयप्रथमशतके आसीदिति महामहोपाध्यायः हरप्रसादशास्त्री, महामहोपाध्यायः गौरीशङ्करहीराचान्दमहोदयश्च आमनति । अतः विक्रमादित्यः

खीष्टीयप्रथमशतकात् पूर्ववर्तीति ज्ञायते । विक्रमादित्यस्य राजसभायां विद्यमानेषु पण्डितेषु महाकविः कालिदासः प्रमुखः आसीत् ।

सोमदेवविरचितकथासरित्सागरेऽपि उज्जयिन्याः राज्ञः विक्रमादित्यस्य विषये उल्लेखः प्राप्यते । कथासरित्सागरस्य प्रामाणिकता सर्वैः स्वीक्रियते । कथासरित्सागरः गुणाढ्यरचितबृहत्कथायाः संक्षिप्तरूपः भवति । बृहत्कथायाः संक्षिप्तरूपः कथासरित् सागरः सोमदेवेन संस्कृतभाषया रचितः लभ्यते एव । कथासरित्सागरस्य १८श लम्बकानुसारेण परमारवंशीयस्य नरेशस्य महेन्द्रादित्यस्य पुत्रः विक्रमादित्यः आसीत् । सः म्लेच्छानां नास्तिकानाञ्च उच्छेदं विधाय वैदिकधर्मस्य पुनरुत्थानं कृतवान् । सोऽपि महान् शैवः आसीत्, उज्जयिन्यां महाकालमन्दिरं निर्मितवान् च । शकादीन् पराजित्य असौ खी. पू १म शतके मालवगण संवत् इति एकं संवतं प्रचालितवान् । अनन्तरं इदं संवत् विक्रमसंवत् रूपेण परिणतं प्रसिद्धं च जातम् । अतएव एतेनापि वक्तुं शक्यते यत् खी. पू. १म शतके विद्यमानस्य विक्रमादित्यस्य सभायां रत्नस्वरूपं कालिदासः आसीदिति ।

कीथ् प्रभृतयः केचन आलोचकाः मतं पोषयन्ति यत् कालिदासः गुप्तकाले आसीदिति । द्वितीयचन्द्रगुप्तः खीष्टीयतृतीयचतुर्थशतकीयसमये शकान् पराजित्य भारतात् निष्कासितवान् । सः विक्रमादित्यस्य उपाधिधारणपूर्वकं राज्यशासनं कृतवान् । तस्य शासनसमये देशस्य वातावरणं यथा समृद्धमासीत् तत् सर्वं कालिदासस्य रघुवंशादिकाव्ये प्रतिफलितम् । एते आलोचकाः अपि स्वीकुर्वन्ति यत् चन्द्रगुप्तस्य पुत्रस्य नाम कुमारगुप्तः । सम्भवतः कुमारगुप्तस्य जन्म पुरोनिधाय 'कुमारसम्भवम्' इति महाकाव्यं कालिदासेन लिखितं स्यात्, अपि च वाकाटकदेशस्य राज्ञा द्वितीयरुद्रसेनेन सह चन्द्रगुप्तस्य कन्यायाः प्रभावत्याः परिणयम् आधारीकृत्य कालिदासेन 'मालविकाग्निमित्रम्' लिखितं भवेत् । चन्द्रगुप्तेन बिहितस्याश्वमेधयज्ञस्य प्रतिफलनमपि तत्र भवति । अतः कालिदासः गुप्तकालिकः भवेत् ।

एतदतिरिच्य खीष्टीय १मशतके आविर्भूतस्य महाकवेः अश्वघोषस्य सौन्दरानन्दे बुद्धचरिते च महाकाव्ये कानिचन पद्यानि कालिदासस्य रघुवंश-कुमारसंभव-मेघदूतकाव्यपद्यैः सह प्रायशः तुल्यानि भवन्ति । अश्वघोषस्योपरि कालिदासस्य प्रभावः पतितः इति एतेन ज्ञायने । अतः कालिदासः खीष्टीयप्रथमशतकात् पूर्ववर्ती भवेदिति निष्कर्षः । लोकश्रुत्यनुसारेण खीष्टपूर्व प्रथमशतके द्वितीयशतके वा विद्यमानेन उज्जयिनीनरेशेन विक्रमादित्येन सह कालिदासस्य सम्बन्धः आसीत् । तस्य राजसभायां रत्नमिव कालिदासः शोभितः आसीदिति ।

**११. कालिदासस्य जीवनवृत्तान्तः –** प्रायशः प्रत्येकग्रन्थकर्तॄणां विचारविद्वत्ताप्रकृत्यादयः तेषां ग्रन्थेषु प्रतिविम्बिताः भवन्ति । एवमपि कालिदासस्य रचनासु तस्य स्वभावादिविषये किञ्चित् प्रतिफलितमस्ति । पूर्वं तु प्रतिपादितमस्ति यत् कालिदासस्य मातृपितृविषये किञ्चिदपि तथ्यं नोपलभ्यते इति । कालिदासस्य रचनानुशीलनेन ज्ञायते यत् सः जात्याः बाह्मणः भवेत् । असौ ऋषिमुनिब्राह्मणानां कृते महान् आदरवान् आसीत् । यज्ञादिकार्येषु तस्य महाप्रेम आसीत् । अभिज्ञानशाकुन्तले कण्वमहर्षेः मारीचस्य च वर्ण्णनम्, ७माङ्के ३४श्लोके द्वितीयपादे' त्वमपि विततयज्ञो वज्रिणं प्रीणयस्व' पुनः षष्ठाङ्के प्रथमश्लोके

‘पशुमारणकर्मदारुणोऽनुकम्पामृदुरेव श्रोत्रियः’ इत्यादिलेखातः, रघुवंशे प्रथमसर्गे वशिष्ठस्य वर्ण्णनात्, पञ्चमसर्गे वरतन्तोः ऋर्षेवर्ण्णनात्, विक्रमोर्वशीये च्यवनवर्ण्णनात् च ज्ञायते यत् कालिदासः ब्राह्मण्यपरंपराविश्वासी आसीत् । अरण्ये आश्रमवर्ण्णने अस्य श्रद्धा महती आसीत् । विक्रमोर्वशीयनाटकस्य कथावस्तु अनेन वेदात् शतपथब्राह्मणादङ्गीकृतम् । अतः सः ब्राह्मण आसीदिति निश्चप्रचम् ।

जनश्रुत्यनुसारेण सः बाल्ये महामूर्ख आसीत् । एकदा विद्यावती इति एकस्याः विदुष्याः राजकुमार्याः सकाशात् शास्त्रार्थेन पराजिताः केचन पण्डिताः कौशलेन स्वपराजयापमानप्रतिशोधाय तया राजकुमार्या सह मूर्खकालिदासस्य विवाहं कारयामासुः । अनन्तरं यदा विद्यावती स्वस्वामिनं कालिदासं मूर्खमिति अजानात् तदा सा धिक्कारवचनं संश्राव्य कालिदासं स्वगृहात् निष्कासितवती । अपमानितः कालिदासः यदा स्वजीवनत्यागाय उद्यतः आसीत् । तदा स्वयं सरस्वती समागत्य तस्य मूर्खतामपहृत्य दिव्यज्ञानेन तं परिपूर्ण्णमकरोत् । ततः कालिदासः सरस्वतीवरप्रसादेन बलीयान् सन् काव्यनाटकादीन् रचितवान् । अनन्तरं यदा सः गृहमागत्य स्वपरिचयप्रदानपूर्वकं कपाटे कराघातं कृतवान्, तदा गृहमध्ये स्थिता पत्नी विद्यावती पृष्टवती ‘अस्ति कश्चित् वाक् विशेषः’ । एतत् श्रुत्वा कालिदासः सहसा ‘अस्ति’ इति पदं नीत्वा एकं श्लोकं श्रावयामास, यः श्लोकः कुमारसम्भवस्याद्यभागे स्थानितः । एवं कश्चिदिति पदं नीत्वा श्रावितः श्लोकः मेघदूतस्य आद्यश्लोकः, ‘वाक्’ इति पदं नीत्वा रचितः श्लोकः रघुवंशस्य आद्यश्लोकः, विशेषः इति पदं नीत्वा श्रावितः श्लोकः ऋतुसंहारस्याद्यश्लोकः संजातः । ततः कालिदासस्य पाण्डित्यं ज्ञात्वा विद्यावती तस्मै बहुमानमर्पितवती ।

कालिदासः महान् शृङ्गारकविः आसीत् । सः स्वरचितकाव्यनाटकेषु शृङ्गाररसस्य वर्णनं सातिशयं करोति । यद्यपि प्रसङ्गानुसारेण अन्यान्यरसानामुपस्थापनं सः करोति तथापि शृङ्गारस्य वर्णनं प्राधान्यं भजते । अतः सः शृङ्गारी कविरित्युच्यते ।

जनश्रुत्यनुसारेण सः अतीववेश्यासक्तः आसीत् । सिंहलद्वीपम् एकदा सः तत्रत्यनृपसकाशात् निमन्त्रणं प्राप्य गतवान् । तत्र तदानीं राजा सर्वेषां कृते एकं प्रश्नं पृष्टवानासीत् । यथा - ‘कमले कमलोत्पत्तिः श्रूयते न च दृश्यते’ एतस्य उत्तरं यः समीचीनतया पूरयिष्यति सः एकलक्षस्वर्णमुद्राः प्राप्स्यति । दैवयोगेन कालिदासः तदा सिंहलद्वीपे एकस्मिन् वेश्यालये आसीत् । वेश्या कालिदाससकाशात् पूर्वपदस्य उत्तरार्धम् आयतं कृतवती । तद् यथा - ‘बाले तव मुखाम्भोजे कथमिन्दीवरद्वयम्’ अत्र समग्रं पद्यम् एवं जातम् यथा -

‘कमले कमलोत्पत्तिः श्रूयते न च दृश्यते ।

बाले तव मुखाम्भोजे कथमिन्दीवरद्वयम् ॥

अर्थात् कमले कमलोत्पत्तिः श्रूयते न च दृश्यते इति न, यतः कामिन्याः मुखकमले नेत्ररूपकं नीलपद्मद्वयमपि दृश्यते । एतत् श्रूत्वा वेश्या मनसि चिन्तितवती यत् यदि अहं एतत् राज्ञि श्रावयिष्यामि तर्हि एकलक्षस्वर्णमुद्राः अवश्यं प्राप्स्यामि । अतः सा रात्रौ कालिदासं कपटेन मारितवती । प्रातः राजसभायामुपस्थाय संपूर्ण पद्यं श्रावितवती च । राजा एतन्निशम्य आश्चर्यान्वितः अभवत् । एका वेश्या अतिसुन्दर संस्कृतपद्यं

श्रावयति। तत्पुनः शुद्धं समीचीनञ्च। राज्ञः मनसि संदेहोजातः। श्लोके द्वितीयपादे 'बाले' इति एकं सम्बोधनपदमस्ति। अतः एतत् कश्चित् पुरुषः कामपि स्त्रियमुद्दिश्य नूनं कथयेत्। इयं तु एका नायिका। तर्हि कश्चित् पुरुषः एनां सम्बोध्य एतत् कथयेत् इति राजा बुद्धवान्। सः वेश्यां भयप्रदर्शनपूर्वकं सर्वं पृष्टवान्। अन्तिमे वेश्या सर्वं सत्यम् उद्घाटितवती, स्वगृहे मृतदेहं प्रदर्शितवती च। राजा कविवरस्य कालिदासस्य मृतदेहं दृष्ट्वा विललाप एवं तस्य अन्तिमजीवनं व्यपगतमिति किम्बदन्ती प्रमाणम्।

कालिदासः महान् शिवभक्तः आसीत्। सः अभिज्ञानशाकुन्तलनाटके मालविकाग्निमित्रनाटके च मङ्गलाचरणश्लोके शिवं स्तौति। मेघदूते सः उज्जयिनीवर्णने तत्रत्यमहाकालस्यापि वर्णनं श्रद्धया कुरुते। अभिज्ञानशाकुन्तले अन्तिमभरतवाक्ये च सः लिखति 'ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः' इति। एतेन ज्ञायते सः शिवभक्त आसीत्।

**१२. कालिदासस्य कृतयः** कालिदासेन त्रीणि नाटकानि, (अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयम्) द्वे महाकाव्ये (रघुवंशम्, कुमारसम्भवम्) एकं खण्डकाव्यं (मेघदूतम्) एकं लघुकाव्यम् (ऋतुसंहारम्) च लिखितानि। एतानि सर्वाणि काव्यनाटकानि अतिमूल्यवन्ति उत्कृष्टानि च सन्ति। अभिज्ञानशाकुन्तलनाटकस्य सर्वातिशयत्वं बिलोक्य एकमाभाणकं स्वतः समुत्पन्नं यत् - काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला'। अर्थात् शकुन्तलामाश्रित्य यत् नाटकं कालिदासेन कृतमस्ति तत् सर्वेषु नाटकेषु रमणीयतममस्ति। विरहविधुरस्य यक्षस्य कथावस्तु गृहीत्वा मेघदूतं रचितम्। कुमारसम्भवे शिवपार्वत्योः पुत्ररूपेण जातस्य कुमारस्य (कार्तिकेयस्य) चरित्रं वर्णितमस्ति। रघुवंशे रघुवंशीयानां नृपाणां चरित्रं चित्रितमस्ति। मालविकाग्निमित्रे नाटके मालविका-अग्निमित्रयोः उद्दामप्रणयः वर्णितः। विक्रमोर्वशीय नाटके उर्वशी पुरुरवसोः प्रणयः वर्णितः। ऋतुसंहारे भारतवर्षे अनुभूयानां षण्णां ऋतूनां वर्णनं सुष्ठुतया कृतमस्ति। एतेषु सर्वेषु काव्यनाटकेषु कालिदासस्य प्रसादमयी रचनामन्दाकिनी कलकलनादेन प्रवहति। साधारणःकश्चित् पाठकः यदि एकवारं कालिदासस्य एकामपि रचनां पठति तर्हि सः आनन्दमग्नः भविष्यति। कस्मिन् अलौकिके सुखमयप्रवाहे सः मज्जितः भविष्यति। कालिदासस्य उपमायां च सः बिह्वलितः भविष्यति।

## १३. बोधप्रश्नाः -

१. नाटकस्य लक्षणं किम्, तस्य उत्पत्तिविषये प्राच्यपाश्चात्यमतानि आलोचयत।

२. काः पञ्च अर्थप्रकृतयः, तद्विषये विचारं प्रकटयत्।

३. के तावत् पञ्च सन्धयः। शाकुन्तले कुत्र कुत्र सन्धिः वर्तते।

४. कालिदासस्य परिचयं स्थितिसमयञ्च लिखत।

# द्वितीयभागः ( Unit - II)

**अस्मिन् विभागे वक्ष्यमाणविषयोपरि आलोचना कृता अस्ति । १- अभिज्ञानशाकुन्तलम् इति नामकरणस्य सार्थकता, २- अभिज्ञानशाकुन्तलस्य संक्षिप्तकथा, ३- अभिज्ञानशाकुन्तलस्य प्रत्यङ्कं सारकथा, ४- अभिज्ञानशाकुन्तलस्य मूलकथा, ५- अभिज्ञानशाकुन्तले पञ्च अर्थप्रकृतयः, ६- अभिज्ञानशाकुन्तले पञ्च अवस्थाः, ७- अभिज्ञानशाकुन्तले पञ्च सन्धयः, ८- अभिज्ञानशाकुन्तले पञ्च प्रस्तावनाः, ९- अभिज्ञानशाकुन्तले दुष्यन्तस्य चरित्रचित्रणम्, १०- शकुन्तलायाः चरित्रचित्रणम्, ११- कण्वस्य चरित्रचित्रणम्, १२ - प्रियम्बदा - अनसूययोः चरित्रचित्रणम्, १३- बोधप्रश्नाः ।**

---

## १. 'अभिज्ञानशाकुन्तलम्' इति नामकरणस्य सार्थकता -

महाकविकालिदासेन विरचितस्य 'अभिज्ञानशाकुन्तलम्' इति नाटकस्य नामकरणं विद्वांसः एवं कुर्वन्ति । शकुन्तेन पक्षिणा लालितेति शकुन्तला । जन्मसमनन्तरमेव यदा माता मेनका कन्यां बिहाय स्वपूर्वस्थानं प्रति प्रयाता तदा एनां सद्योजातां कन्यां एकः शकुन्तः स्वपक्षसाहाय्येन आवृत्य सूर्यकिरणात् रक्षितवान् । शकुन्तेनलालितत्वात् सा कन्या परवर्तिनि समये शकुन्तला इति प्रसिद्धिं गता । अभिज्ञायते अनेन इति अभिज्ञानम् । अभि + ज्ञा + ल्युट् प्रत्ययः । शकुन्तलामधिकृत्य कृतं यन्नाटकं तत् शाकुन्तलम् । शकुन्तलाशब्दात् अण् प्रत्ययः । अभिज्ञानप्रधानं शाकुन्तलम्' इति अभिज्ञानशाकुन्तलम् । अत्र अभिज्ञानपदेन मुद्रिका बुध्यते । यतः मुद्रिकादर्शनानन्तरं दुष्यन्तस्य शकुन्तलाविषयकं ज्ञानं जातम् । अतः मुद्रिका भवति अभिज्ञानम् । नाटकेऽस्मिन् मुद्रिका शकुन्तलाविषये घटितं पूर्वचरितं दुष्यन्तस्य कृते स्मारयति । अतः तस्याः अभिज्ञानपदरूपेण स्थितायाः मुद्रिकायाः प्राधान्यमस्ति नाटकेऽस्मिन् ।

अपरे केचित् कथयन्ति, अभिज्ञानेन स्मृता शकुन्तला यत्र तत् 'अभिज्ञानशकुन्तलम्' । परन्तु अभिज्ञानशाकुन्तलमिति नाम्नः अति प्रसिद्धत्वात् 'अभिज्ञानशाकुन्तलम्' इति नाटकस्य नाम भवेत् ।

## २. अभिज्ञानशाकुन्तलस्य संक्षिप्तकथा -

अभिज्ञान शाकुन्तल नाटके ७ अङ्काः सन्ति । अधुना प्रत्यङ्कानुसारेण नाटकस्य कथावस्तु संक्षिप्य आलोच्यते । तत्र -

## ३. अभिज्ञानशाकुन्तलस्य प्रत्यङ्कं सारकथा -

**प्रथमाङ्कस्य सारः -** प्रथमतया नान्दीपाठे अष्टमूर्त्तिधरस्य शिवस्य स्तुतिर्विद्यते । ततः सूत्रधरः ग्रीष्मर्तोः वर्णनं करोति । ततःराजा दुष्यन्तः एकं हरिणं मारयितुं रथारूढः सन् आगच्छति । भयेन

हरिणः द्रुतं धावति। अस्मिन् समये सशिष्यः एकः वैखानसः तपस्वी उपस्थाय स्वाश्रममृगस्य मारणे उद्यतं राजानं निवारयति। राजाऽपि तपस्विवचनेन मृगमारणात् विरतः भवति। तपस्वी राज्ञे चक्रवर्तिपुत्रलाभाय आशीर्वादं दहाति, आश्रमस्यातिथिः भवितुं निमन्त्रयति च। राजा आश्रमाधीशं कण्वमहर्षिं प्रति स्वभक्तिं निवेदयितुं तपस्विनिमन्त्रणं स्वीकृतवान्। सःसारथिम् आश्रमस्य बहिर्भागे बिहाय विनीतवेशेन आश्रमं विवेश। तदानीं कण्व आश्रमे नासीत्। सः स्वपालितकन्यायाः दुर्ग्रहदशां शमयितुं सोमतीर्थं प्रति गतः। आश्रमस्य सर्वं कार्यं शकुन्तलोपरि न्यस्तमासीत्। शकुन्तला यदा आश्रमवृक्षेषु जलदानं कृतवती तदा दुष्यन्तः आश्रमं प्रविष्टवान्। सः किञ्चिद्दूरे द्वाभ्यां सखीभ्यां सह वृक्षेषु जलदानरतां शकुन्तलां वृक्षलताच्छिद्रमध्ये अपश्यत्। सः शकुन्तलायाः सौन्दर्येण अतीवमुग्धः अभवत्। अस्मिन् समये एकः भ्रमरः शकुन्तलायाः मुखं परितःभ्रमितवान्। भ्रमराक्रमणात् रक्षां प्राप्तुं सा सखीद्वयं प्रार्थितवती। सखीद्वयं कथितवत् यत् तव परित्राणे आवां न समर्थे। अस्य देशस्य राजानं दुष्यन्तं प्रार्थयस्व त्वम्। सः दुष्टानां मधुपानाम् निवारणे समर्थः। समुचिते समये राजा शकुन्तलानिकटे उपस्थितवान् । परिचयस्य आदानप्रदानप्रसङ्गे राजा ज्ञातवान् यत् शकुन्तला विश्वामित्रमेनकयोः पुत्री इति।

पुराकाले विश्वामित्रमहर्षिः घोरं तपःचकार। इन्द्रः तस्य तपोभङ्गाय मेनकां प्रेषितवान्। सा विश्वामित्रस्य तपोभङ्गे सफला जाता। विश्वामित्रः मेनकायां कन्यामेकां जनयामास कन्याजन्मसमनन्तरमेव मेनका स्वर्गाय उत्पतिता। वनप्रदेशे क्रन्दनरतायाः अस्याः कन्यायाः मुखे स्वपक्षमाच्छाद्य एकः शकुन्तः एनां सूर्यातपात् रक्षितवान्। कन्यायाः क्रन्दनध्वनिं निशम्य कुशसमिदाहरणार्थं भ्रमन्तः क्रण्वस्य शिष्याः तामाश्रमं प्रति आनीतवन्तः। ततः प्रभृति सा शकुन्तला इति परिचिता सती कण्वस्य पालितकन्यारूपेण तस्मिन् आश्रमे स्थितवती। अयं तावत् शकुन्तलायाः जन्मवृत्तान्तः। शकुन्तलायाः क्षत्रियोत्पत्तित्वं विज्ञाय राजा स्थिरनिश्चयं कृतवान् यत् नूनं सः शकुन्तलां परिणेष्यति। राजानं दृष्ट्वा शकुन्तलायाः मनसि अपि तं प्रति आसक्तिर्जाता। तत्र राजा स्वस्य राजत्वं लुक्कायितं करोति। अस्मिन्नभ्यन्तरे यदा दुष्यन्तशकुन्तलयोः मिलनं भवितुं गच्छति, तदा कश्चिद् वन्यः गजः आश्रमं प्रविष्टः इति नेपथ्ये कोलाहलः जातः। ततः तिस्रःसख्यः (शकुन्तला, तस्याः सखीद्वयञ्च) राज्ञः अनुमतिं नीत्वा आश्रमं प्रति गताः। राजा अपि वन्यगजं नियन्त्रयितुं स्व सैनिकान् नियोजितवान्, येन आश्रमस्य काऽपि वाधा न भवेत् अनेन प्रकारेण प्रथमाङ्कस्य कथावस्तु समाप्तम्।

## द्वितीयाङ्कस्य सारः -

द्वितीयाङ्कस्य प्रारम्भे विदूषकमुखात् राज्ञः दुष्यन्तस्य ओखटविषयःसूचितः भवति। आखेटेन पर्याकुलः विदूषकः आखेटं प्रति राजानं वीतस्पृहं कर्तुं चेष्टते। शकुन्तलाप्रणयपाशबद्धः राजा विदूषकस्य चेष्टया आखेटाद् विरमति। शकुन्तलां प्रति स्वस्य आसक्तिं राजा विदूषकं सूचयति। केनचित् व्याजेन राजा तत्राश्रमे अधिकानि कानिचन दिनानि वसितुम् अभिलषति। अस्मिन् समये द्वौ ऋषिकुमारौ तत्र उपस्थाय राजानमुद्दिश्य उक्तवन्तौ यत् आश्रमरक्षार्थं राजा तत्र कियद्दिनानि तिष्ठेदिति। ऋषिकुमारप्रस्तावः राज्ञः कृते महान् अनुकूलः जातः। अस्मिन् समये हस्तिनापुरात् कश्चित् चरः आगत्य संवादं दत्तवान् यत् राजमातुः निर्देशानुसारेण राजा दुष्यन्तः राजधानीं प्रत्यावर्तेत। राजा स्वयं राजधानीं न गत्वा ससैन्यं विदूषकं

तत्र प्रेरितवान् । कदाचित् शकुन्तलाविषयकं तथ्यं विदूषकः अन्तःपुरे कथयेत् इति विभीय राजा विदूषकं कथितवान् यत् हे सखे ! मया शकुन्तलाविषयिणी या कथा उक्ता सा कथा मिथ्या । परिहासेन मया एवमुक्तमासीत् । ततः विदूषकः राजधानीं हस्तिनानगरीं प्रति समागतः । राजा आश्रमे एकाकी अतिष्ठत् ।

## तृतीयाङ्कस्य सारः -

तृतीयाङ्केऽस्मिन् दुष्यन्तशकुन्तलयोः प्रेमाकुलावस्था चित्रितास्ति । दुष्यन्तं प्रति आसक्तायाः शकुन्तलायाः अवस्था शोचनीया भवति । अतः लतामण्डपे पुष्पशय्यायां सा शयिता वर्तते । आश्रमे यज्ञरक्षाकर्मतः सामयिकरूपेण मुक्तिं लब्ध्वा राजा मनोविनोदनाय भ्रमन् लतामण्डपनिकटमागतवान् । तत्र सः कामपीडितायाः शकुन्तलायाः निकटे स्थितस्य सखीद्वयस्य वचनं शृणोति । तत्र राजा शकुन्तलावचनं श्रुतवान् यत् सा दुष्यन्तदर्शनात् परं एतादृशीमवस्थामागता, यदि सा दुष्यन्तस्य दर्शनं न प्राप्नोति तर्हि अधिकं कालं जीवितुं न पारयिष्यति । ततः सखीद्वयं शकुन्तलातः दुष्यन्तमुद्दिश्य प्रेमपत्रमेकं लेखयामास । अस्मिन् पत्रे शकुन्तला दुष्यन्तं प्रति प्रेमनिवेदनपूर्वकं लिखति 'हे निर्दय तव हृदयं (मनः) अहं न जाने । परन्तु मम (शकुन्तलायाः) त्वयि अर्पितमनोरथायाः सर्वाणि अङ्गानि कामः यथेष्टं तपति' ।

'तव न जाने हृदयं मम पुनः कामोदिवाऽपि रात्रावपि
निघृण ! तपति वलीयस्त्वयि वृत्तमनोरथाया अङ्गानि' । ३/१३

एतदनन्तरं राजा लतामण्डपं प्रविश्य शकुन्तलां प्रति स्वप्रेमभावनां प्रकाशयति । सखीद्वयं लतामण्डपे दुष्यन्तनिकटे शकुन्तलां बिहाय 'मृगशिशुः तस्य मातुः समीपे प्रापयितव्यः' इति उक्त्वा व्याजेन ततः पलायितम् । राजा शकुन्तलानिकटे गान्धर्वविवाहप्रस्तावम् उपस्थापयामास । ततः परं गौतमी सन्न्यासिनी शान्तिजलं नीत्वा शकुन्तलाज्वरोपशान्तये तत्रागच्छति । दूरे स्थित्वा सखीद्वयं गौतमीप्रवेशस्य सूचनां द्वि-अर्थवोधकवाक्येन प्रददाति, यथा - 'चक्रवाकवधु ! समागता रजनी आमन्त्रयस्व प्रियजनम्' । अत्र रजनीपदेन गौतमी ध्वन्यते । चक्रवाक पदेन दुष्यन्तः वधूपदेन शकुन्तला च ध्वन्यते । राजा वृक्षपश्चाद्भागे आत्मगोपनं करोति । ततः गौतमी शकुन्तलां नीत्वा आश्रमकुटीरं प्रस्थिता । राजापि यज्ञरक्षार्थं प्रस्थितः अयं भवति तृतीयाङ्कस्य सारः ।

## चतुर्थाङ्कस्य सारः -

'अभिज्ञानशाकुन्तलम्' नाटकस्य चतुर्थोऽङ्कः महद् वैशिष्ट्यं विभर्ति' अतः उक्तमस्ति -

'काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला ।
तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम् ।

गान्धर्वरीत्या शकुन्तलां परिणीय दुष्यन्तः स्वराजधानीं प्रत्यावर्तते । गमनकाले सः स्वनामाङ्कितां मुद्रिकां शकुन्तलायाः हस्ते समर्प्य कथयति 'अहं यथाशीघ्रं त्वां ससम्मानं राजप्रासादं नेष्यामि । राज्ञः गमनानन्तरं शकुन्तला तद्विरहेण खिन्नमनाः सती कुटीरे तिष्ठिति । अस्मिन् समये दुर्वासाः मुनिः तत्राश्रमं प्रत्यागच्छति । दुष्यन्ते दत्तमनाः शकुन्तला दुष्यन्तस्यागमनं ज्ञातुं न पारितवती । अतः सा तत् कृते समुचितम् आतिथ्यं प्रदातुं नैव पारितवती । अपमानितः दुर्वासाः शकुन्तलाकृते अभिशापं दत्तवान् ।

अभिशापोऽयमासीत् यत् - 'यं त्वमनन्यमानसा सती विचिन्तयसि सः त्वां न स्मरिष्यति' । दुर्वाससः प्रत्यागमनकाले अनसूया प्रियम्बदा च (सखीद्वयं) केनापि प्रकारेण मुनेरपमानं विज्ञाय तन्निकटे शकुन्तला कृते क्षमां प्रार्थितवती । मुनिः कथञ्चित् शान्तः सन् उक्तवान् मम वचनं कदाचिदन्यथा न भविष्यति । तथापि अहं कथयामि यत् यदि किमपि चिह्नं सा प्रदर्शयिष्यति तर्हि मम शापः प्रभावहीनः भविष्यति, अन्यथा न । सखीद्वयमेनं शापवृत्तान्तं न कुत्रापि प्रकटितं कृतवत् । सखीद्वयं चिन्तितवत् यत् राज्ञः मुद्रिका शकुन्तलानिकटे वर्तते, अतः सः नूनं शकुन्तलां पत्नीरूपेण अभिज्ञास्यति ।

सोमतीर्थात् प्रत्यागतः कण्वः महर्षिः दिव्यदृष्ट्या आश्रमस्थघटनां ज्ञातवान् । दुष्यन्तेन सह शकुन्तलायाः गान्धर्वविवाहम्, दुष्यन्तसंपर्कात् शकुन्तलां गर्भवतीं च नभोवाण्या परिज्ञाय सः आनन्दितः अभवत् । शापप्रभावेन राजापि शकुन्तलां विस्मृतवान् । येन न कमपि सः शकुन्तलाम् आश्रमतः नेतुं प्रेरयामास । अतः कण्वः शकुन्तलां हस्तिनापुरीं प्रति प्रेषयितुं व्यवस्थां कृतवान् । शकुन्तलया सह कण्वः गौतमीं द्वौ ऋषिकुमारौ शार्ङ्गरवं शारद्वतं च प्रेषयामास । शकुन्तला पतिगृहं गच्छतीति ज्ञात्वा कण्वप्रभावात् विभिन्नाः पादपाः शकुन्तलाकृते मूल्यवन्ति वसनाभूषणानि दत्तवन्तः । शकुन्तला स्वपितुः सकाशात् सखीसकाशात् च क्रमशः दूरीभूता जाता । अस्मिन् समये एकः हरिणः शकुन्तलायाः वस्त्रान्तं समाकृष्य शकुन्तलागमने प्रतिबन्धकं सृष्टवान् । एतेन शकुन्तलां प्रति मृगशिशोः कियत् प्रेम तत् ज्ञातुं शक्यते । शकुन्तलाकृते कण्वः महान्तमुपदेशं दत्त्वा हस्तिनापुरं प्रेषयामास । तत्र उपदेशव्याजेन कण्वः कथयति ।

'शूश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृताऽपि रोषणतया मास्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्यैवं गृहीणीपदं युवतयः वामाः कुलस्याधयः ॥ ४/१८

श्वशुरगृहं प्रति यदा पिता तस्य कन्यां प्रेरयति तदा तस्य पितुः अवस्था कीदृशी करुणमयी भवति तत् सर्वं कण्वस्यावस्थावर्ण्णनप्रसङ्गे कालिदासः स्पष्टतया परिप्रकाशयति । अत्रापि पशुपक्षिणां 'शकुन्तलां प्रति प्रेमभावः स्पष्टरूपेण चित्रितः अस्ति । शकुन्तलां पतिगृहं संप्रेष्य कण्वः अपि मानसिकस्तरे परमां शान्तिमाप्तवान् । सः अद्य चिन्तयति यत् न्यासरूपेण यत् धनं मम निकटे आसीत् तत् धनमद्य यथास्थानं प्रापयन् अहमतीवमानन्दमनुभवामि । एवमेव चतुर्थाङ्कस्य सारः अत्र प्रदत्तः ।

## पञ्चमाङ्कस्य सारः -

पञ्चमाङ्के शकुन्तला गौतम्या शार्ङ्गरव-शारद्वदभ्यां च सह राज्ञः दुष्यन्तस्य हस्तिनापुरं प्रविशति । राजा सन्न्यासोचितसत्कारं तेषां कृते प्रददाति । अनन्तरं शार्ङ्गरवः कण्वमहर्षेः संदेशं दुष्यन्तकृते श्रावयति । राजा शापवशात् शकुन्तलावृत्तान्तं विस्मरति । शकुन्तलया सह तस्य विवाहः आसीदिति राजा न स्वीकरोति । गौतम्या शकुन्तलायाः मुखवस्त्रे अपसारितेऽपि राजा शकुन्तलापरिचयं ज्ञातुं न पारयति । शकुन्तला राज्ञा दुष्यन्तेन प्रदत्तां मुद्रिकां प्रदर्शयितुं यदा स्व - अङ्गुष्ठं पश्यति तदा हन्त ! अङ्गुष्ठे मुद्रिकापि नासीत् । आगमनकाले शचीतीर्थे सा मुद्रिकां हारितवती । शार्ङ्गरवदुष्यन्तयोः मध्ये आवेगपूर्णः वार्तालापः भवति, तथापि राजा शकुन्तलां न स्वीकरोति । एतत् सर्वं दुर्वाससः अभिशापस्य फलम् । एतत् कोऽपि न

जानाति। शकुन्तलां बिहाय गौतमी शार्ङ्गरवः शारद्वतः च प्रत्यावृत्ताः। अस्मिन्नभ्यन्तरे राजपुरोहितः विलपन्तीं शकुन्तलां स्वगृहं नेतुमुद्यतः अभवत्। सः राजानं कथितवान् यत् आप्रसवं गर्भवती शकुन्तला मम गृहे तिष्ठतु। यदि प्रसवानन्तरं जायमानम् अपत्यं भवत्समानं भवति तर्हि शकुन्तला सापत्यं महिषीसम्मानेन सम्मानिता सती अन्तःपुरे स्थास्यति, नोचेत् राजप्रासादात् निष्कासिता भविष्यति। इतः परं पुरोधसा सह शकुन्तला यदा गच्छति तदा अप्सरस्तीर्थनिकटे एकं ज्योतिरागत्य शकुन्तलां नीतवत्। एवमद्भुतां घटनां पुरोहितः राज्ञः निकटे निवेदितवान्। सर्वे एनं वृत्तान्तं ज्ञात्वा आश्चर्यान्विताः भवन्ति। राजाऽपि चिन्ताग्रस्तोजातः। एवं पञ्चमाङ्कस्य सारः वर्तते।

## षष्ठाङ्कस्य सारः -

शचीतीर्थे शकुन्तला पतिगृहागमनसमये दुष्यन्तप्रदत्तां मुद्रिकां हारितवतीति पूर्वमुक्तम्। सा मुद्रिका एकेन रोहितमत्स्येन गिलिता। सौभाग्यवशतः एकः धीवरः तं मत्स्यं जालेन गृहीतवान्। मत्स्यकर्तनकाले तदुदरात् सः मुद्रिकामाप्तवान्। तां मुद्रिकां नीत्वा यदा सः विपण्यां विक्रीणाति, तदा राज्ञः दुष्यन्तस्य नामाङ्कितां मुद्रिकां दृष्ट्वा रक्षिणः तं चौर इति मन्यन्ते स्म। ततः तं धीवरं निगृह्य रक्षिपुरुषाः मुद्रिकालाभविषये पृष्ठवन्तः। राजश्यालः मुद्रिकां नीत्वा राज्ञः निकटं गतवान्। राजा स्वनामाङ्कितां मुद्रिकां दृष्ट्वा शकुन्तलया सह पूर्वाचरितं वृत्तान्तं सर्वमस्मरत्। राजा सन्तुष्टः सन् धीवराय बहुमूल्यं पुरस्कारं दत्वा विमोक्तुमादिदेश। मुद्रिकादर्शनानन्तरं राज्ञ उपरि पतितःअभिशापः दूरीभूतः। राजा शकुन्तलायां कृतमन्याय्यं चिन्तयन् महान् दुःखी जातः। राज्ञः पश्चात्तापजनितामवस्थां मेनकाप्रेरिता एका सखी गोपनेन दृष्टवती। विदूषकेन सह स्थितः सन् राजा शकुन्तलाविरहजनितं दुःखं विस्मर्तुं चेष्टते, शकुन्तलायाः पूर्णं चित्रं कर्तुमिच्छति च सः। अस्मिन् समये मन्त्रिणा प्रेषितमेकं लेखं नीत्वा प्रतिहारी राज्ञे समर्पयति। पत्रे लिखितमासीत् यत् धनमित्रः इति एकः वणिक् दिवङ्गतः। सः निःसन्तान आसीत्। अतः तस्य सर्वाणि धनानि राजकोषे अन्तर्गतानि भवेयुः। राजा एतद् ज्ञात्वा दुःखितोऽभवत्। सः चिन्तितवान् यत् अहं स्वयमपि पुत्रहीनोऽस्मि। मम मरणानन्तरं मम धनसंपत्तीनामधिकारी को वा भवेत्? अतः परं सः मूर्च्छितोऽभवत्।

अस्मिन्नेवाभ्यन्तरे इन्द्रस्य सन्देशमानीय मातलिः राज्ञः पार्श्वे प्रविवेश। इन्द्रः संदेशयति यत् अधुना स्वर्गपुरे दैत्याः उत्पातं कुर्वन्ति। तेषां विनाशाय दुष्यन्तेन आगन्तव्यम् इति। राजा मातलिमुखात् इन्द्रसन्देशं निशम्य दैत्यानां निवारणार्थं तेन सह इन्द्रपुरं प्रस्थितः। एवमस्ति षष्ठाङ्कस्य सारकथा।

## सप्तमाङ्कस्य सारः -

स्वर्गे राजा दैत्यान् पराजितवान्। इन्द्रः आश्वस्तः अभवत्। अतः सः दुष्यन्तं प्रति भव्यसम्बर्धनां विहितवान्। इन्द्रेण सम्मानितः राजा हस्तिनापुरं प्रति यदा प्रत्यावर्तते तदा मध्येमार्गं हेमकूटपर्वते मारीचस्य आश्रमे मारीचं साक्षात्कर्तुमभिललाष। अतः सः मारीचस्याश्रमे रथादवतीर्णवान्। मातलिः मारीचस्यानुमतिमानेतुं प्रस्तितवान्। अस्मिन् समये राजा एकमद्भुतं बालकमाश्रमे अपश्यत्। असौ बालकः एकस्य सिंहशावकस्य दन्तान् गणयन्नासीत्। सिंहशिशुना सह क्रीडन् बालकः मध्ये मध्ये तं सिंहशिशुं कुपितमपि कृतवान् आसीत्। बालकं दृष्ट्वा राज्ञः मनसि वात्सल्यस्नेहः समागतः। आश्रमे एका तपस्विनी

दुष्यन्तं कथयति यत् अस्य बालकस्य मातुर्नाम शकुन्तला। शकुन्तला कस्यापि राज्ञः पत्नी, परन्तु सा पत्या परित्यक्तास्ति। सिंहशशिुना सह क्रीड़नावसरे बालकस्य हस्तात् रक्षाकवचः त्रुटितः। राजा पुनः यदा तं रक्षाकवचं बालकस्य हस्ते निगडयितुं चेष्टते, तदा तपस्विनी तं निवारयति। सा कथयति बालकस्य मातरं पितरं च बिहाय अपरः यदि भूपतितं बालकस्य कवचं स्पृशेत् तर्हि सः कवचः सर्पः भूत्वा तं दङ्क्ष्यति। परन्तु राजा एतत् न श्रुत्वा तं रक्षाकवचं भूतलादानीय बालकस्य हस्ते पुनः निगडितवान्। न कोऽपि सर्पः तं दष्टवान्। राज्ञः मनसि विश्वासः आगतः यत् स एव अस्य बालकस्य पिता। बालकस्य माता शकुन्तला एव तस्य पत्नी, या खलु पुरा कण्वाश्रमे गान्धर्वेण विधिना विवाहिता। शकुन्तलाऽपि इमं पुत्रस्य कवचधारणवृत्तान्तं ज्ञातवती। सा तत्रागत्य स्वस्वामिनः दुष्यन्तस्य परिचयं सम्यक् लब्ध्वा तं सम्मानप्रदर्शनपूर्वकं प्रणमति। राजा शकुन्तलाचरणयोः निपत्य स्वकृतापराधस्य कृते क्षमायाचनं करोति। पुत्रशकुन्तलाभ्यां सह दुष्यन्तः मारीचमुनेः दर्शनार्थं गच्छति। तत्र मारीचः दुर्वाससः शापविषये सर्वं सूचितवान्। अतः शकुन्तलात्यागे दुष्यन्तः निरपराधः इति विषयः स्फुटतां गतः। अन्तिमे मारीचः आशीर्वचनं प्रदाय इन्द्रस्य रथोपरि सर्वान् उपावेश्य हस्तिनापुरीं प्रेषयामास। भरतवाक्येन सह नाटकं समाप्तं भवति। भरतवाक्यम्, यथा -

प्रवर्ततां प्रकृतिहिताय पार्थिवः, सरस्वती श्रुतिमहती महीयताम्
ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः, ७/३५

अस्य तात्पर्यं यत् राजा (पार्थिवः) प्रजाहिताय सदा प्रवृत्तः भवतु। वाणी वेदैर्गुरुत्वयुक्ता सती बर्धताम्। शिवः (नीललोहितः) मम (कवेः कालिदासस्य) पुनर्जन्म नाशयतु। इत्थं सप्तमाङ्कस्य सारः लिखितः।

## ४. अभिज्ञानशाकुन्तलस्य मूलकथा -

दुष्यन्तशकुन्तलोपाख्यानं महाभारते पद्मपुराणे च द्रष्टुं शक्यते। पद्मपुराणापेक्षया महाभारतस्य कथानकं प्राचीनतरमिति प्रतिभाति। यतोहि महाभारतीयं कथावस्तु नीरसं भाति। पद्मपुराणे विद्यमानं कथावस्तु कालिदासकृतशाकुन्तलनाटकस्य कथावस्तु च प्रायशः समानमस्ति। अतः अनुमीयते पद्मपुराणस्य कथावस्तु अभिज्ञानशाकुन्तलाधारेण कृतं वर्तते। महाभारतस्यादिपर्वणि ७० अध्यायतः ७४ अध्यायमध्ये प्रायशः ३०० श्लोकैः दुष्यन्त- शकुन्तलोपाख्यानं वर्णितमस्ति। महाभारतानुसारेण कथावस्तु वक्ष्यमाणप्रकारेणास्ति। तद् यथा - एकदा पुरुबंशीयः राजा दुष्यन्तः ससैन्यः मृगयार्थमरण्यं गतवान्। मृगयानन्तरं सः अरण्ये कण्वस्याश्रममागतः। आश्रमस्य बहिर्भागे सः सैन्यान् अवस्थाप्य स्व शरीरात् राजचिह्नानि समुत्तार्य पुरोहितामात्यैः सह आश्रमस्याभ्यन्तरमागतः। कियद्दूरं गत्वा सः अमात्यपुरोहितादीन् त्यक्त्वा एकाकी कण्वस्य पर्णकुटीरं गतः। तदा फलाद्याहरणाय कण्वः वनं गतवान्, अतःतस्य धर्मपुत्री शकुन्तला दुष्यन्तस्य सत्कारं कृतवती। शकुन्तलां बिलोक्य दुष्यन्तस्य मनसि कामविकारः समुत्पन्नः। सः शकुन्तलां तस्याः परिचयं पृष्टवान्। शकुन्तला स्वजन्मवृत्तान्तं कथितवती। ततः राजा शकुन्तलां क्षत्रियकन्यामिति ज्ञात्वा प्रेमनिवेदनं कृतवान्। शकुन्लता कथितवती मम धर्मपिता

कण्वः फलार्थं बहिर्गतः । सः स्वल्पसमयाभ्यन्तरे आगमिष्यति, मां भवतः हस्ते पत्नीरूपेण अर्पयिष्यति च । राजा दुष्यन्तः गान्धर्वविवाहपक्षपाती आसीत् । अतः सः क्षत्रियोचितगान्धर्वविवाहार्थं शकुन्तलाम् अनुमतां कृतवान् । शकुन्तला प्रार्थितवती यत् तस्याः पुत्रः राज्ञः उत्तराधिकारी भविष्यति । राजा एतत् स्वीकृत्य शकुन्तलया सह संपर्कं विधाय कण्वमहर्षेरागमनात् पूर्वं तस्य शापाद् विभीय आश्रमात् पलायितवान् । पलायनसमये सः शकुन्तलामुक्तवान् यत् समीचीने काले सः ससम्मानं शकुन्तलां हस्तिनापुरं नेष्यतीति ।

कियत् कालानन्तरं कण्वः आश्रमं प्रत्यागतः । सः तपोबलेन सर्वं ज्ञातवान् । शकुन्तला लज्जावशतः कण्वस्य सम्मुखं नागतवती । कण्वः सर्वं ज्ञात्वा शकुन्तलायै तदभीष्टं वरं दत्तवान् । राजधानीम् आगत्य राजा शकुन्तलावृत्तान्तं विस्मृतवान् । कियद्दिनानन्तरं शकुन्तला आश्रमे एकं पुत्रं जनयामास । कण्वः पुत्रस्य जातकर्मादिसंस्कारं सर्वं संपादितवान् । शकुन्तलायाः पुत्रः शिशु-अवस्थायां वने सिंहव्याघ्रादिक्रूरपशुशिशुभिः सह क्रीडितवान् । शिशोः पराक्रमं दृष्ट्वा आश्रमवासिनः तं सर्वदमनः इति नामितवन्तः । ततः यौवनावस्थायामुपनीतः असौ युवराजपदयोग्यः इति विचिन्त्य कण्वः सपुत्रशकुन्तलां हस्तिनापुरं प्रति प्रेषयितुं शिष्यानादिदेश । राजसभायां शकुन्तला स्वपरिचयं दत्तवती पुत्ररूपेण बालकं सर्वदमनं स्वीकर्तुं राजानमुनुरुद्धवती च, परन्तु राजा एतत् न स्वीकृतवान्, पुत्ररूपेण सर्वदमनमपि न स्वीकृतवान् च । एतत् ज्ञात्वा शकुन्तला दुःखिता सती राजानमुक्तवती, राजन् ! क्षुद्रपुरुषवत् भवान् किमर्थमसत्यं वदति । पापमाचरन् पुरुषः चिन्तयति यत् तं न कोऽपि पश्यतीति, परन्तु ईश्वरः सर्वं पश्यति । पापमाचरतः पुरुषस्य अन्तरात्मापि सर्वं जानाति । पत्नी पत्युरर्धाङ्गिनी भवति । पत्न्यां पतिः पुत्ररूपेण पुनर्जन्मग्रहणं करोति । अस्मिन् जगति पुत्रः यथा पितरमानन्दयति तथा अपरः कोऽपि नानन्दयितुं समर्थः । एवं रूपेण शकुन्तला उक्त्वा राज्ञः मनः आकर्ष्टुं चेष्टते, परन्तु दुष्यन्तः किमपि न श्रुतवान् । अतः परं किञ्चित् कुपिता सती शकुन्तला कथितवती यत् भवान् मम पुत्रं स्वपुत्ररूपेण स्वीकरोतु वा न करोतु, परन्तु एकदा असौ समग्रपृथिव्या अधिपतिः भविष्यति, इत्युक्त्वा ततः प्रस्थिता सा सपुत्रा । शकुन्तलायाः प्रस्थानसमये नभोवाणी अभवत्, यत् राजन् शकुन्तला तव पत्नी, सर्वदमनश्च तव पुत्रः । शकुन्तलां सर्वदमनञ्च स्वीकरोतु भवान् । ततः राजा पुरोहितामात्यादीन् उक्तवान् यत् नभोवाणी प्रमाणयति यत् शकुन्तला मम पत्नी, सर्वदमनश्च मम पुत्रः । नभोवाणीतः पूर्वं यदि अहमेताम् अग्रहीष्यम्, तर्हि पुत्रस्य जन्मशुद्धताविषये भवतां मनसि सन्देहः अभविष्यत् । ततः शकुन्तलामुक्तवान् राजा यत् शकुन्तले यदि पूर्वं तव स्वीकारः मयाः कृतः भवेत् तर्हि सर्वे मम कामुकताविषये सन्देहं प्रकटयेयुः । क्रोधवशतः यानपशब्दान् त्वं मां कथितवती तदर्थमहं क्षमां ददामि ।

अनन्तरं राजा शकुन्तलां स्वपट्टमहिषीस्थाने विभूषयामास, अपि च पुत्रं सर्वदमनं भरतनाम्ना नामितं कृत्वा युवराजपदे अभिषेचयामास । इयं भवति महाभारतानुसारेण शकुन्तलाचरित्रस्य कथा । महाभारते दुष्यन्तकृतशकुन्तलापाणिग्रहणं यावत् यत् कथानकमस्ति तदेव पद्मपुराणे समानरूपेण वर्तते, परन्तु उभयोः मध्ये द्वयोः स्थलयोः किञ्चित् पार्थक्यमस्ति । महाभारते यदा स्वयं शकुन्तला स्वजन्मवृत्तान्तं राज्ञः निकटे प्रकाशयति, तदा पद्मपुराणे शकुन्तलायाः जन्मवृत्तान्तः सख्या प्रियम्बदया उक्तः वर्तते ।

द्वितीयतः महाभारते यदा राजा शकुन्तलासमीपात् स्वराजधानीं प्रति आगच्छति तदा शकुन्तलाकृते सः किमपि अभिज्ञानं न ददाति, परन्तु पद्मपुराणे राजा शकुन्तलाकृते स्वीयमङ्गुरीयकं ददातीति वर्णना लभ्यते। महाभारतापेक्षया पद्मपुराण-अभिज्ञानशाकुन्तलयोः कथावस्तु समानमस्ति प्रायशः। पद्मपुराणे वर्णितमस्ति शकुन्तला गर्भावस्थायां सप्तमासान् आश्रमे स्थितवती, परन्तु शाकुन्तलनाटकानुसारेण यस्मिन् दिने कण्वः दुष्यन्त शकुन्तलावृत्तान्तं ज्ञातवान्, सद्य एव सः हस्तिनापुरं प्रति शकुन्तलां प्रेषयामास। पद्मपुराणानुसारेण यदा शकुन्तला पतिगृहम् आगच्छति, तदा तया सह गौतमी, शार्ङ्गरवः, शारद्वतः, प्रियम्बदा चासन्। मार्गे सरस्वतीनद्यां स्नानकाले शकुन्तला दुष्यन्तनामाङ्कितां मुद्रिकां प्रियम्बदाहस्ते अर्पितवती, परन्तु असावधानवशतः सा मुद्रिका प्रियम्बदाहस्तात् नदीजले अपतत्। भयवशात् प्रियम्बदा एनं वृत्तान्तं शकुन्तलायै नोक्तवती। शकुन्तलाऽपि प्रियम्बदाहस्ते मुद्रिकामर्पितवतीति विस्मृतवती। यदा राज्ञः सभायां मुद्रिकाया आवश्यकता जाता, तदा शकुन्तला प्रियम्बदां मुद्रिकाविषये पृष्टवती। प्रियम्बदा अनुच्चस्वरेण शकुन्तलायाः कर्णे कथितवती यत् मुद्रिका नदीजले पतिता इति। एतत्श्रुत्वा मूर्च्छिता जाता शकुन्तला।

अभिज्ञानशाकुन्तलनाटकानुसारेण यदा शकुन्तला पतिगृहं गच्छति तदा तया सह प्रियम्बदा नासीत् केवलं गौतमी, शार्ङ्गरवः, शारद्वतश्च तया सह आसीत्। अन्यच्च मार्गे शचीतीर्थे स्नानसमये स्वयं शकुन्तला दुष्यन्तनामाङ्कितां मुद्रिकां हारितवती। एतत् कथाद्वयं पद्मपुराणाभिज्ञानशाकुन्तलयोर्मध्ये पृथक्रूपेण वर्णितमस्ति। अन्यत् सर्वम् उभयोः समानम्।

महाभारत-पद्मपुराणाभिज्ञानशाकुन्तलेषु विषयसाम्यमबलोक्य महान् आलोचकः वासुदेवविष्णुमिराशी महोदयः स्व विचारं स्वरचिते कालिदासपुस्तके प्रकटयति यत् व्यासः कालिदासश्च पद्मपुराणात् कथां कल्पनाञ्च नीत्वा स्वं स्वं ग्रन्थं रचयेत्, अथवा पद्मपुराणकर्ता कालिदासकृताभिज्ञान-शाकुन्तलात् कियदंशं महाभारताच्च कियदंशं नीत्वा स्वकल्पनाप्रसूतं शकुन्तलाकथानकं रचयेत्। अस्मिन् पक्षद्वये द्वितीयःपक्षः समीचीनतरः प्रतिभाति। अन्यथाऽपि कल्पयितुं शक्यते यत् कालिदासस्य अभिज्ञानशाकुन्तलरचनानन्तरतम् एतादृशमुपाख्यानं पद्मपुराणे किञ्चित्परिवर्तन पूर्वकं योजितं भवेत्।

एतद् यद् वा भवतु महाभारतीयकथावस्तुनः आधारेण कालिदासः स्वकल्पनाप्रसूतम् अभिज्ञानशाकुन्तलनाटकं रचयेत् इति बहवः विद्वासः मतपोषणं कुर्वन्ति। मूलमहाभारतीयकथावस्तुनः सारं संगृह्य महाकविः कालिदासः स्थलविशेषे किञ्चित् परविर्तनपूर्वकं सरसकथावस्तु स्वयम् उत्पाद्य उद्भाव्य च विश्वप्रसिद्धम् अभिज्ञानशाकुन्तलमिति नाटकं रचितवान्।

अभिज्ञानशाकुन्तलनाटकस्य रसपेशलतामुपलभ्य आमेरिकायाः एकः विख्यातः आलोचकः राइडर प्रकाशयति यत् विना कालिदासं संस्कृतसाहित्यस्य मूल्यं नास्ति। वयं कदाचित् कालिदासं त्यक्तुं न प्रभवामः।

"We know that Kalidas was a great poet, because the world has not been to leave him alone" जर्मन्विद्वान् गेटे महोदयः अपि अभिज्ञानशाकुन्तलस्यानुवादमात्रं पठित्वा आनन्दितः अभवत्। सः अभिज्ञानशाकुन्तलनाटकं प्रशंसन् आह - Wouldst thou spring's blossoms and the fruits of its decline wouldst thou see by what the souls enraptured, feasted, fed, wouldst

thou have this earth and heaven in one Soulname combine. I name thee oh Shakuntala and all at once is said.

एतस्य संस्कृतानुवादः म.म मीराशी महोदयेन स्वस्य कालिदासपुस्तके वक्ष्यमाणप्रकारेण कृतः

यथा - 'वासन्तं कुसुमं फलञ्च युगपद् ग्रीष्मस्य सर्वं च यद्
यच्चान्यन्मनसो रसायनमतः सन्तर्पणं मोहनम् ।
एकीभूतमभूतपूर्वमथवा स्वर्लोकभूलोकयो-
रैश्वर्यं यदि वाञ्छसि प्रिय सखे ! शाकुन्तलं सेव्यताम्' ।

एतेन अभिज्ञानशाकुन्तलस्य महत्त्वं कियदस्तीति ज्ञातुं शक्यते । इति ।

## ५. अभिज्ञानशाकुन्तले पञ्च अर्थप्रकृतयः -

नाटकस्य कथावस्तु मुख्यफलानुसारि कारयितुं यस्याः सहयोगः अपेक्षते सा भवति 'अर्थप्रकृतिः' । इयमर्थप्रकृतिः पञ्चविधा । यथा - १. वीजम्, २. विन्दुः ३. पताका, ४. प्रकरी, ५. कार्यम् । एताः पञ्च अर्थप्रकृतयः आधिकारिक-कथावस्तुनिर्बाहसहायिकाः भवन्ति ।

**१. वीजम् -** साहित्यदर्पणानुसारेण वीजस्य लक्षणं यथा - अल्पमात्रं समुद्दिष्टं बहुधा यद् विसर्पति, फलस्य प्रथमोहेतुर्वीजं तदभिधीयते ।

अभिज्ञानशाकुन्तले प्रथमाङ्के मृगमारणात् विरतं राजानं वैखानसः आश्रमाभ्यन्तरं गन्तुं प्रेरयति । राजाऽपि आश्रमाभ्यन्तरं गन्तुं स्वीकरोति । एतद्द्वयं तावत् 'वीज' नामिका अर्थप्रकृतिरुच्यते । यदि राजानं वैखानसः आश्रमं गन्तुं न प्रचोदयेत् अथवा राजा प्रचोदितोऽपि न गच्छेत् तर्हि शकुन्तलाप्रणयः न सम्भवेत् अथवा नाटकस्य एतावत् रूपं न भवेत्, नाटकमन्यथा सम्भवेत् । अत एतद्वीजमुच्यते अस्मात् वीजात् नाटके अनेकप्रकाराणि उपाख्यानानि विकसितानि जातानि ।

**२. विन्दुः-** नाटकस्य द्वितीयाङ्कस्य प्रारम्भे आखेटवृत्तान्तेन मूलकथा विच्छिन्ना भवति । परन्तु पुनः दुष्यन्तस्य उक्तितः 'सखे माधव्य ! अनाप्तचक्षुःफलोऽसि' इत्यस्मात् आरभ्य 'सर्वः खलु कान्तमात्मानं पश्यति, अहन्तु तामेवाश्रमललामभूतां शकुन्तलामधिकृत्य व्रवीमि' इत्यन्तं यावत् कथानकेन पुनः कथा प्रारब्धा भवति । राज्ञः उक्तिरियं विन्दुनामिका अर्थप्रकृतिः भवति । बिन्दोः लक्षणं यथा - अवान्तरार्थ विच्छेदे विन्दुरच्छेदकारणम् - (सा:द)

**३. पताका -** अर्थप्रकृतिषु पताका अन्यतमा भवति । पताकायाः लक्षणं यथा - व्यापि प्रासङ्गिकं वृत्तं पताकेत्यभिधीयते (सा.द)

अभिज्ञानशाकुन्तलस्य चतुर्थेऽङ्के पताका (अर्थप्रकृतिः) वर्तते । तत्र दुष्यन्तविरहेण शकुन्तला खिन्नमनाः भवति । अस्मिन् समये दुर्वासाः तत्रागच्छति । परन्तु अन्यमनस्का शकुन्तला एतत् ज्ञातुं न पारयति । सत्कारं विना दुर्वासाः अपमाननितः भवति । अतः सः शकुन्तलाकृते अभिशापं ददाति । शकुन्तला शापवृत्तान्तं न जानाति । प्रियम्बदा अनसूया च दुर्वाससः निकटे क्षमाप्रार्थनां कृतवती । दुर्वासाः किञ्चित् परिमाणेन तुष्टः सन् कथयति यदि शकुन्तला किमपि चिह्नं दुष्यन्तस्य निकटे उपस्थापयिष्यति,

तर्हि मम शापः प्रभावहीनः भविष्यतीति, इयं मुद्रिका षष्ठाङ्के यदा दुष्यन्तेन अबलोकिता तदा शकुन्तलाविषयकं सर्वं तथ्यं सः स्मृतवान् । अपि च उभयोर्मध्ये मिलनम् अस्याः मुद्रिकायाः योगेन जातम् । अतः अयं मुद्रिकावृत्तान्तः पताका नामिका अर्थ प्रकृतिर्भवति ।

४. **प्रकरी** – अर्थप्रकृतिषु प्रकरी अन्यतमा भवति । प्रकर्याः लक्षणं यथा, प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी मता (सा.द.) । अभिज्ञानशाकुन्तले षष्ठाङ्के दैत्यान् वारयितुं शक्रः मातलिं प्रेषयति । मातलिः दुष्यन्तम् इन्द्रसन्देशं श्रावयित्वा दैत्यविनाशाय इन्द्रपुरं प्रति नीतवान् । ततः दैत्यविनाशकार्यं समाप्य राजा यदा प्रत्यावर्तते तदा मध्येमार्गं मारीचमुनेराश्रमः आगतः । राजा मारीचदर्शनार्थं तत्र रथादुदतरत् । ७माङ्के मारीचाश्रमे पुत्रेण शकुन्तलया च सह मिलितः जातः दुष्यन्तः । मारीचस्याशीर्वादोऽपि दुष्यन्तेन स्वीकृतः । एतादृशः लघुविषयः मुख्यकथावस्तुनः परिपूर्णतायै सहायकः भवतीति कृत्वा प्रकरी इति उच्यते ।

५. **कार्यम्** – कार्यस्य लक्षणं यथा - अपेक्षितं तु यत् साध्यमारम्भो यन्निबन्धनः,

समापनं तु यत्सिद्धौ तत् कार्यमिति सम्मतम् । (सा.द.. ६ष्ठ.प)

नाटकस्यान्तिमे भागे शकुन्तलया पुत्रेण भरतेन च सह दुष्यन्तस्य स्थायिमिलनं भवति । पुत्रं पत्नीञ्च प्राप्य राजा दुष्यन्तः प्रीतः भवति । एतदेव नाटकस्य कार्यमिति हेतोः कार्यनामिका अर्थप्रकृतिः भवति ।

**६. अभिज्ञानशाकुन्तले पञ्च अवस्थाः –** नाटकस्य लक्षणानुसारेण पञ्च अवस्थाः नाटके अवश्यं भवेयुः एताः पञ्च अवस्थाः नाटकीयकथावस्तुनः उत्तरोत्तरमुन्नतिं विदधति । अभिज्ञानशाकुन्तले एताः अवस्थाः कुत्र कुत्र योजिताः सन्ति तद्विषये अधुना आलोच्यते । पञ्च अवस्थाः यथा १. प्रारम्भः, २. प्रयत्नः, ३. प्राप्त्याशा, ४. नियताप्तिः, ५. फलागमः ।

**१. प्रारम्भः** – नाटकस्य प्रथमाङ्के रूपवतीं शकुन्तलां तपोवने बिलोक्य दुष्यन्तः तां प्रति अत्यासक्तः भवति । सा विवाहयोग्या वा नवेति यदा दुष्यन्तस्य मनसि संशयः आगच्छति, तदा

'असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः,
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः' ॥

इत्यादिद्वारा शकुन्तलायां दुष्यन्तस्य आसक्तिः प्रदर्शिता । पुनः दुष्यन्तमबलोक्य शकुन्तलाऽपि आकृष्टा जाता । स्वमनसा शकुन्तला चिन्तयति यत् 'कथमिमं प्रेक्ष्य तपोधनविरोधस्य विकारस्य गमनीयास्मि संवृत्ता' । एतेन शकुन्तलायाः आसक्तिरपि दुष्यन्ते प्रदर्शिता । उभयोः उभयं प्रति आकर्षणात् प्रेम अङ्कुरितं भवति । अतः प्रथमाङ्कस्य समाप्तिं यावत् एतादृशं मिथः आकर्षणकथावस्तु 'प्रारम्भ' इति अवस्थात्वेन परिचितं भवति ।

**२. प्रयत्नः** –द्वितीयतृतीयाङ्कयोः उभौ शकुन्तलादुष्यन्तौ उभयोः प्राप्तिनिमित्तं चेष्टारतौ भवतः । अतः अत्र प्रयत्नरूपा अवस्था वर्तते ।

**३. प्राप्त्याशा** – चतुर्थाङ्के दुर्वासाः शकुन्तलामभिशपति । प्रियम्बदा अनसूया च कथमपि दुर्वाससः क्रोधं किञ्चित् परमिाणेन शान्तं कृतवती । ततः शान्तः ऋषिः उक्तवान् यत् यदि किमपि चिह्नं शकुन्तला दुष्यन्तं दर्शयिष्यति, तर्हि दुष्यन्तः शकुन्तलां पत्नीरूपेण ग्रहीष्यति । एतेन पाठकाः दर्शकाश्च ज्ञातवन्तः यत् नूनं नायिका नायकेन प्राप्तव्या । अतः अत्र प्राप्त्याशा नामिका अवस्था भवति ।

**४. नियताप्तिः –** षष्ठाङ्के धीवरसकाशात् यदा दुष्यन्तनामाङ्कितमुद्रिका उपलव्धा, तदा दुष्यन्तस्य शकुन्तलाप्राप्तिः निश्चिता जाता। अतः अत्र नियताप्तिः इति अवस्था भवति।

**५. फलागमः–** नाटकस्य पञ्चमाङ्के नायकः दुष्यन्तः स्थायिरूपेण स्वनायिकां शकुन्तलां पुत्रं दुष्यन्तञ्च प्राप्नोति। अतः अत्र फलागमः इति अवस्था भवति।

एवं रूपेण अभिज्ञानशाकुन्तले पञ्च अवस्थाः कविना विभिन्नस्थानेषु योजिताः।

**७. अभिज्ञानशाकुन्तले पञ्च सन्धयः –** नाटकलक्षणानुसारेण नाटके पञ्चसन्धीनां महती आवश्यकता वर्तते। पञ्च सन्धयो यथा - १. मुखम्, २. प्रतिमुखम्, ३. गर्भः, ४. विमर्शः, ५.उपसंहृतिः। पञ्चअर्थप्रकृतीनां पञ्चावस्थानाञ्च मिश्रणेन पञ्चसन्धयः उत्पद्यन्ते। अधुना अभिज्ञानशाकुन्तले एतेषां पञ्चसन्धीनां योजनं कुत्र कुत्रास्ति इति आलोच्यते।

**१. मुखसन्धिः–** यत्र वीजसमुत्पत्तिर्नानार्थरससम्भवा
प्रारम्भेण समायुक्ता तन्मुखं परिकीर्तितम्। इति लक्षणम्।

अभिज्ञानशाकुन्तले प्रथमाङ्कादारभ्य द्वतीयाङ्कस्य आखेटविरामं यावत् मुखसन्धेः स्थानम्। द्वितीयाङ्के राजा आखेटात् निवृत्तः सन् कथयति, 'विश्रामं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः' एतावत् पर्यन्तं मुखसन्धिः भवति।

**२. प्रतिमुखसन्धिः –** फलप्रधानोपायस्य मुखसन्धिनिवेशिनः।
लक्ष्यालक्ष्य इवोद्भेदो यत्र प्रतिमुखं च तत्॥ इति लक्षणम्।

द्वितीयाङ्कस्थ-आखेटनिवृत्तितः तृतीयाङ्कस्य समाप्तिं यावत् प्रतिमुखसन्धिर्भवति।

**३. गर्भः –** फलप्रधानोपायस्य प्रागुद्भिन्नस्य किञ्चन
गर्भो यत्र समुद्भेदो ह्रासान्वेषणवान् मुहुः। इति लक्षणम्।

चतुर्थाङ्कादारभ्य पञ्चमाङ्के दुष्यन्तस्य शकुन्तलाप्रत्याख्यानं यावत् विषयः गर्भसन्धिरित्युक्तः' नाटकस्य मुख्यविषयः तत्र गर्भीकृतः भवति। अतः अयं गर्भसन्धिरित्युक्तः।

**४. विमर्शसन्धिः –** यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोऽधिकः
शापादैः सान्तरायश्च स विमर्ष इति स्मृतः। इति लक्षणम्।

पञ्चमाङ्के दुष्यन्तस्य शकुन्तलाप्रत्याख्यानादारभ्य षष्ठाङ्कस्य समाप्तिं यावत् विमर्शसन्धिर्भवति।

**५. उपसंहृतिः –** वीजवन्तो मुखाद्यर्था विप्रकीर्ण्णा यथायथम्।
एकार्थमुपनीयन्ते यत्र निर्वहणं हि तत्॥ इति लक्षणम्।

७माङ्कस्य प्रारम्भात् समाप्तिं यावत् उपसंहृतिः सन्धिः भवति। उपसंहृतेरन्यनाम निर्वहणमपि अस्ति। अनेन प्रकारेण अभिज्ञानशाकुन्तले पञ्चसन्धयः दर्शिताः।

**८. अभिज्ञानशाकुन्तले पञ्च प्रस्तावनाः –** नाटकस्य लक्षणानुसारेण पञ्चप्रस्तावनासु या काऽपि वा एका प्रस्तावना अवश्यं नाटकस्य प्रारम्भे तिष्ठेत्। प्रस्तूयते कथावस्तु अनया इति प्रस्तावना। यया नाटकीयं कथावस्तु सूचितं भवति सा भवति प्रस्तावना। प्रस्तावनाया लक्षणं यथा -

नटी विदूषको वाऽपि पारिपार्श्विक एव वा ।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते ।
चित्रैः वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः ।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनाभिधा ॥ (सा.द. ६/३२)

अत्र तात्पर्यमिदं यत् नाटकारम्भे नटी, विदूषकः, किम्बा पारिपार्श्विकः सूत्रधारेण सह यत्र विचित्रैः वाक्यैः प्रस्तुतनाटकमाक्षिप्य वार्तालापं कुर्वन्ति, अपि च तेषां वार्तालपेन किमात्मकं नाटकमिदं भवेत् इति सामाजिकाः ज्ञातुं प्रभवन्ति तदेव प्रस्तावना उच्यते । प्रस्तावनायाः नामान्तरम् आमुखं भवति ।

इयं प्रस्तावना पञ्चविधा । यथा - १. उद्घात्यकः, २. कथोद्धातः, ३. प्रयोगातिशयः, ४. प्रवर्तकम्, ५. अवलगितकम् । एषु पञ्च विधेषु अत्र शाकुन्तले अवलगितकम् इति प्रस्तावना वर्तते । अवलगितस्य लक्षणं यथा - 'यत्रैकत्र समावेशात् कार्यमन्यत् प्रसाध्यते
प्रयोगे खलु तद्ज्ञेयं नाम्नाबलगितं बुधैः' । (सा.द. ६ष्ठ परिच्छेदः)

# ९. शाकुन्तले दुष्यन्तस्य चरित्रचित्रणम् -

राजा दुष्यन्तः अभिज्ञानशाकुन्तलनाटकस्य नायकः भवति । सः धीरोदात्तः नायकः । आत्मप्रशंसारहितत्व-क्षमावत्त्व-वीरत्व-गम्भीरत्व-स्थिरत्व-गर्वराहित्यादिगुणाः धीरोदात्तनायकस्य प्रमुखाः गुणाः भवन्ति । एते सर्वे गुणाः दुष्यन्ते आसन् । सः पुरुवंशी क्षत्रियः महान् रूपवान् चासीत् । प्रियम्बदा आश्रमे प्रथमतया दुष्यन्तं वीक्ष्य कथयति, - 'चतुरगम्भीराकृतिर्मधुरं प्रियमालपन् प्रभाववानिव लक्ष्यते' । अस्य पराक्रमशीलतया शूरवीरतया च इन्द्रः अपि प्रभावितः आसीत्, येन असौ राक्षसवधार्थं तेन निमन्त्रितः । अस्य धनुष्टङ्कारमात्रेण विघ्नानि दूरीभूतानि भवन्ति ।

आश्रमे अस्य मधुरभाषणेन सर्वे सन्तुष्टाः आसन् । मुनीनां कृते अस्य महानादरः आसीत् । कृष्णसारमारणाय उद्यतः असौ प्रथमसर्गे वैखानसवचनेन ततः निर्वृतो भवति । आश्रमे यद्यपि सुन्दरीं शकुन्तलां दृष्ट्वा असौ मानसिकस्तरे तां प्रति समाकृष्ट आसीत्, तथापि नैतिकदृष्ट्या सा परिणीता वा न अथवा सा विवाहयोग्या वा न इति सम्यक्तया ज्ञातुं चेष्टते । यदि सा तस्य विवाहयोग्या न भवेत् तर्हि सः तां परित्यजेत् । राजत्वेन तस्यायं विचारः समीचीनः भवति । यद्यपि सः बहुपत्नीकः तथापि शकुन्तलां प्रति सः कदाचित् न्यूनस्नेहः नासीत् । असौ संगीतज्ञातापि आसीत् । हंसपदिकायाः संगीतमाकर्ण्य सः कथयति 'अहो रागपरिवाहिनी गीतिः' । सः अपि एकः सुन्दरः चित्रकरः भवति ।

एतैः सुगुणैः परिपूर्णोऽपि तस्य काचित् दुर्बलता आसीत् । सः आश्रमे सुन्दरीं शकुन्तलां वीक्ष्य तां प्रति समाकृष्टः अभवत् । वृक्षलतामध्ये आत्मगोपनपूर्वकं सः तरुणीनां कामानुकूलमालापं शृणोति । मात्रा आहूतोऽपि सः शकुन्तलाप्रेमासक्तः सन् राजधानीं प्रति न गत्वा विदूषकं प्रेषयति । आश्रमे शकुन्तलां गान्धर्वविवाहेन पत्नीरूपेण स्वीकृत्य कण्वस्यागमनात् पूर्वं सः स्वनगरं प्रस्थितः । एतत् सर्वं तस्य मानवोचितदुर्बलतायाः परिचायकम् । दुर्वाससः शापवशात् सः शकुन्तलां विस्मरति । पञ्चमाङ्के 'अनिर्वर्ण्यं परकलत्रम्' 'अनार्यः परदारव्यवहारः' इत्यादि उक्तितः तस्य धार्मिकभावनायाः सूचना लभ्यते ।

धनमित्रवणिजः मृत्योरनन्तरं यदा सः सूचितः यत् निःसन्तानस्य वणिजः सर्वाः संपदः राजाधीनाः भवेयुरिति, तदा सः तद्धनग्रहणे अरुचिं दर्शयन् कथयति धनमित्रवणिक् बहुपत्नीकः भवेत् । अन्यत्र कुत्र निवसन्ती काऽपि तस्य पत्नी अन्तःसत्त्वा भवेत्, तत् सर्वं परीक्षणीयम् । एतेन तस्य परद्रव्याहरणे निर्लोभत्वं सूच्यते ।

षष्ठाङ्के धीवरसकाशादधिगतां स्वनामाङ्कितां शकुन्तलायै प्रदत्तां मुद्रिकां बिलोक्य सः पश्चात्तापं करोति, स्वनगरे वसन्तोत्सवपालनं निषेधति च । सप्तमाङ्के तस्य चरित्रं समधिकमुज्ज्वलं दृश्यते । अत्र सर्वदमनं दृष्ट्वा तं प्रति तस्य वात्सल्यममता अतिशेते । शकुन्तलां तत्राबलोक्य राजा तस्याः चरणतले निपतति ।

अनेन प्रकारेण महाकविः कालिदासः दुष्यन्तस्य चरित्रं चित्रयति ।

**१०. शकुन्तलायाः चरित्रचित्रणम् –** अभिज्ञानशाकुन्तले नायिका शकुन्तला भवति । महाकविः कालिदासः आदर्शभारतीयनारीरूपेण शकुन्तलां चित्रयति । असौ मुग्धा नायिका आसीत् । प्रायशः अष्टादशवर्षदेशीया सा भवेत्, यदा दुष्यन्तेन तस्याः परिचयो जातः तदा तस्याः सौन्दर्यं बिलोक्यं राजा मन्त्रमुग्धः जातः । असाधारणं लावण्यंमस्याः शरीरात् निःसृतमासीत् । 'न प्रभातरलं ज्योतिरुदेति वसुधातलात्' इति उक्तिः अस्याः सौन्दर्याधिक्यं स्पष्टयति । तपोवने सा वर्द्धिता आसीत् । अतः तस्याः चरित्रे सुशीलता सरलता मुग्धता च आसीत् । राज्ञः प्रथमदर्शने यद्यपि तस्याः मनसि कामविकारः समुत्पन्नः तथापि तस्य विकारस्य वर्द्धने असौ सहायतां न कृतवती । किं नु खलु इमं जनं प्रेक्ष्य तपोवनविरोधिनो विकारस्य गमनीयाऽस्मि संवृता ।' राजा यदा एनां पश्यति तदा लज्जया इयं नतवदना आसीत् । सखीसमक्षमियं राज्ञःकृते स्व मनोभावमपि लज्जावशतः न प्रकटयितुं शशाक । बहु आग्रह प्रकटनानन्तरमियं कथञ्चित् स्व कामावस्थां सखीनिकटे प्रकटितवती ।

अस्याः प्रकृतिप्रेम समधिकमासीत् । आश्रमे वृक्षलतादीनां मूलेषु जलदानं कुर्वती सा भ्रातृभगिनीस्नेहं तेषां कृते प्रकटितवती । 'अस्ति मे सोदरस्नेहः एतेषु' इति अस्याः उक्तितः एतत् स्पष्टतया ज्ञायते । वृक्षालबालेषु जलमप्रदाय सा जलपानमपि न कृतवती । प्रियमण्डनापि सा कदाचित् मण्डनार्थं पल्लवचयनं न कृतवती । साऽपि लतानां वृक्षाणाञ्च प्रथमकलिकोद्गमे उत्सवं पालयति । पादपेन सह वनज्योत्स्नायाः आलिङ्गनम्, गर्भवत्याः हरिण्याः भाविसन्तानजन्म, पितृमातृहीनमृगशिशुपालनञ्चेत्यादिविषयेषु तस्याः कौतूहलमासीत् । एतेन एतेषां कृते तस्याः अनाबिलं सौहार्द्यं प्रकटितमासीत् ।

सा पतिव्रता आसीत् । पतिं बिहाय अन्यं प्रति तस्याः कामना नासीत् । दुष्यन्तं प्रति यदा सा समाकृष्टा आसीत् तदा दुष्यन्तातिरिक्तः कोऽपि तस्याःकृते अधिकः नासीत् । राज्ञःहस्तिनापुरगमनानन्तरं तस्याःमनः नितरां दुष्यन्तमनुस्मृतवत्, येन सा दुर्वाससः आतिथ्यमपि विस्मृतवती । यदा सा हस्तिनापुरे राज्ञा न परिचिता, तदा सा अवश्यं किञ्चित् कुपिता आसीत्, तथापि अनन्तरं सा निजं भाग्यं निन्दित्वा तूष्णीमभवत् । 'नूनं मे सुखप्रतिबन्धकं पुराकृतं तेषु दिवसेषु परिणामाभिमुखमासीत् ।' कण्वं गौतमीं तपस्विनः प्रियम्बदाम् अनसूयां च प्रति तस्याः अगाधः स्नेहः आसीत् । नाटकस्य अन्तिमभागे सा स्वपतिं प्राप्य अत्यधिकमानन्दमनुभवति । एवंरूपेण शकुन्तलायाः चरित्रं शाकुन्तले नाटके चित्रितम् ।

**११. कण्वस्य चरित्रचित्रणम् –** महर्षिकण्वः नाटकेऽस्मिन् आश्रमाधिपतिर्भवति । आश्रमस्य असौ मुख्यत्वेन विभिन्नानि कार्याणि संपादयितुं अन्यान् नियोजयति । शकुन्तलाप्रियम्बदानसूयाः वृक्षलतादिषु जलादिदानाय सः नियुक्तवान् । स्वस्यानुपस्थितौ अतिथिसत्काराय शकुन्तलायां दायित्वं न्यस्तम् आसीत् । अन्ये ऋषिकुमाराः फलकुसुमसमिदाहरणे नियुक्ताः आसन् । शकुन्तलायाः भावि-अमङ्गल विनाशाय सः सोमतीर्थं प्रति गत्वा तत्र पूजापाठादिकं संपादितवान् । सः परमनैष्ठिकः ब्रह्मचारी अपि आसीत् । सः श्रौतविध्यनुसारेण अग्निहोत्री आसीत् । तस्याश्रमे यज्ञशाला आसन् । तपः प्रभावात् सः सर्वमपि ज्ञातुं शक्नोति । तस्य तपः प्रभावात् राक्षसाः तस्योपस्थितौ आश्रमे किञ्चित् विघ्नमुत्पादयितुं न शक्नुवन्ति । तस्य तपः प्रभावात् वृक्षादयः अपि शकुन्तलायाः पतिगृहगमनसमये मूल्यवद्वसनाभूषणादिकं जनयामासुः । यद्यपि शकुन्तला तस्य पालिता कन्या तथापि तस्याः पतिगृहगमनसमये तस्य मनः दुःखितमभवत् । तस्य कण्ठः रुद्धः आसीत्, तस्य चेतना जडीभूता जाता ।

तपस्वी भूत्वापि सः साधारणलोकक्रियाकलापज्ञः आसीत् । यदा सोमतीर्थात् प्रत्यागत्य सः शकुन्तलादुष्यन्तवृत्तान्तमजानात् तदा सः सपदि एव शकुन्तलां पतिगृहं प्रेषयितुं सर्वमायोजितवान् । तस्मिन् समये शकुन्तलाकृते सः यादृशं मूल्यवन्तमुपदेशं दत्तवान् सः उपदेशः सर्वेषां भारतीयानां कृते अमूल्यरत्नवदास्ते । (शुश्रूषस्व गुरून्..... इत्यादिपद्यम्) असौ सन्न्यासी अपि सांसारिकमानवजीवनेन सह परिचितः आसीत् । पतिगृहगमनसमये यदा शकुन्तला वदति, 'पितः ! देशान्तरे कथमहं जीवितं धारयिष्यामि' तदा असौ उत्तरति, पुत्रि ! चिन्तां मा कुरु । सुयोग्यपतिगृहे स्थित्वा त्वं यदा तत्रत्यकर्मसु लग्ना भविष्यसि, पुनः त्वमपि जननी भविष्यसि, तदा त्वं शनैः शनैः अस्मान् विस्मरिष्यसि । यावत्कालं शकुन्तला तस्याश्रमे आसीत् तावत् कालं सः अन्यस्य द्रव्यं न्यासरूपेण रक्षतीति चिन्तयति । यदा शकुन्तलां सः पतिगृहं प्रेषयति तदा न्यासरूपेण रक्षितं वस्तु सः तद्ग्रहीत्रे प्रदाय महान्तं सन्तोषं समनुभवति । एतदेव कण्वस्य चरित्रं संक्षेपेण निरूपितम् ।

**१२. प्रियम्बदा-अनसूययोः चरित्रचित्रणम् –** प्रियम्बदा अनसूया च उभे शकुन्तलायाः सख्यौ भवतः । एतास्तिस्रः आयुर्दृष्ट्या प्रायशः समानाः भवन्ति । एताः अपि तिस्रः अपूर्वसुन्दर्यः भवन्ति । आश्रमे यदा राजा एताः पश्यति तदा स्वयं कथयति 'अहो ! मधुरमासां दर्शनम्' । पुनः 'अहो समवयोरूपरमणीयं भवतीनां सौहार्द्यम्' । अप्सरोगर्भसम्भवात् शकुन्तला अपरद्वयापेक्षया किञ्चित् सुन्दरतरी भवेत् । आश्रमे राजानं दृष्ट्वा प्रथमतया अनसूया तेन सहालापं करोति । शकुन्तलाजन्मवृत्तान्तमपि इयमनसूया राज्ञः समीपे समुपस्थापयति । शकुन्तलापतिगृहगमनानन्तरं यदा उभे अनसूया प्रियम्बदा च क्रन्दितवत्यौ, तदा महर्षिकण्वः इमां प्रथमतया आश्वासितवान् । एतेन इयं शकुन्तलाप्रियम्बदयोरपेक्षया किञ्चित् ज्येष्ठेति प्रतिभाति । अभिज्ञानशाकुन्तलनाटके कुत्रचित् अनसूयाप्रियम्बदयोः चरित्रे साम्यं कुत्रचित् वैषम्यं च दृश्यते । तथाहि साम्यं तावत् शकुन्तलां प्रति द्वयोः स्नेहप्रेमभावः समानः आसीत् । शकुन्तलां ते भगिनीमिवापश्यताम् । आश्रमे वृक्षमूले जलसेचनकर्मणि उभे शकुन्तलायाः सहायकारिण्यौ आस्ताम् । शकुन्तलायाः कामपीडितावस्थां बिलोक्य उभे

चिन्ताव्याकुलितहृदये अपि अभवताम् । तस्याः स्वस्थतानिमित्तं उभे अपि उपायान् चिन्तयामासतुः । इत्थं शकुन्तलया सह राज्ञः मिलनचिन्तापि ताभ्यां कृता । यदा दुष्यन्तशकुन्तलयोः मिलनं लताकुञ्जे अभूत् तदा द्वे अपि कार्यान्तरव्याजेन ततः बहिरागते । तदा गौतम्याः उपस्थितिमपि ते 'चक्रवाकवधु ! आमन्त्रयस्व प्रियजनम्, उपस्थिता रजनी' इति सम्बोधनपूर्वकं सूचितवत्यौ । दुर्वाससः अभिशापं श्रुत्वा ते सातिशयदुःखम् अनुभूतवत्यौ । अपि च दुर्वाससं केनापि प्रकारेण न्यूनकोपं विधाय शापमुक्तिमार्गं ते प्राप्तवत्यौ । ते उभे शिष्टाचारसंपन्ने विनयिन्यौ प्रियवादिन्यौ चास्ताम् । सर्वेषु कार्येषु उभे कुशले अपि आस्ताम् शकुन्तलायाः पतिगृहगमनावसरे एते उभे तस्याः सुन्दरं सज्जीकरणमकुरुताम् । एतदेव अनसूया-प्रियम्बदाचरित्रे साम्यमस्ति ।

उभयोः चरित्रे वैषम्यमिदं प्रतिभाति यत् - अनसूया प्रियम्बदापेक्षया अधिकरूपेण चिन्ताशीला गम्भीरा चासीत् । प्रियम्बदा स्वनामानुसारेण सर्वदा प्रियभाषिणी, अनसूया च असूयाहीना आसीत् । अनसूया शकुन्तलाजन्मविषये सर्वं यथावत् राज्ञः निकटे कथितवती । प्रियम्बदा शकुन्तलायाः विवाहविषयकं मनोभावं यदा प्रकाशयति, तदा शकुन्तला ईषत्कुपिता सती तस्मात् पलायितुमिच्छति, परन्तु पियम्बदा तां गमनात् निवारयन्ती कथयति अधुनाऽपि मत्कृते त्वं जलपूर्णघटद्वयं परिशोधयितुमर्हसि जलपूर्णघटद्वयमपरिशोध्य इतोपि त्वं गन्तुं नार्हसि । प्रियवादिनीत्वात् तस्याः वचनं शकुन्तला नान्यथा चिन्तयति । अनसूया भविष्यचिन्तनं प्रियम्बदापेक्षया अधिकं करोति । दुष्यन्तनिकटे शकुन्तलायाः भावि जीवनं यथा सुखमयं भवेत् तथा इयमाश्वासनां कामयते, कस्यचिदपि कार्यस्य कृते यदा प्रियम्बदा त्वरामाश्रयते, तदा अनसूया तस्य कार्यस्य कृते गम्भीरं चिन्तनं प्रकटयति । शकुन्तलां प्रति यदा दुर्वासाः अभिशापं ददाति, तदा अनसूया तथा विचलिता न भवति यथा प्रियम्बदा विचलिता भवति । दुष्यन्तः भाविनि काले शकुन्तलां स्मरेत् वा न इति संशयं यदा अनसूया प्रकटयति तदा प्रियम्बदा कथयति 'न तादृशाः आकृतिविशेषाः गुणविरोधिनो भवन्ति' । परन्तु अन्तिमे एतत् कथनं विपरीतमभवत् । एवं उभयोरनसूयाप्रियम्बदयोर्मध्ये वैषम्यमस्ति ।

## १३. बोधप्रश्नाः -

१. का नाम अर्थप्रकृतिः ? अभिज्ञानशाकुन्तले कुत्र कुत्र सा कविना योजिता ?

२. अभिज्ञानशाकुन्तलस्य मूलकथा महाभारतानुसारेण वर्ण्णयत ?

३. अभिज्ञानशाकुन्तलम् इति नामकरणस्य याथार्थ्यं किम् ?

४. कालिदासकृतस्य अभिज्ञानशाकुन्तलस्य कथावस्तु संक्षिप्य लिखत ?

५. शकुन्तलायाः चरित्रं चित्रयत ।

# तृतीयभागः ( Unit - III)

**अस्मिन् विभागे वक्ष्यमाणविषयोपरि आलोचना कृता अस्ति। १- प्रथमाङ्कस्य विषयक्रमः- क) नान्दीश्लोकालोचना, ख) प्रस्तावना, ग) मृगमनुसरतः राज्ञः वर्ण्णनम्, घ) भयार्तमृगस्य पलायनम्, ङ) मृगमारणे ऋषिकुमाराणां निषेधः, च) दुष्यन्तकृते ऋषिप्रदत्तः आशीर्वादः, छ) आश्रमवर्ण्णना, ज) शकुन्तलावर्ण्णना, झ) भ्रमरप्रशंसा, ञ) शकुन्तलादिनिकटे दुष्यन्तस्य प्रवेशः, ट) दुष्यन्तशकुन्तलयोः मिथः अनुरागवर्ण्णनम्।**

**२- द्वितीयाङ्कस्य विषयक्रमः - क) दुष्यन्तस्य शकुन्तलाविषयिणी चिन्ता, ख) मृगयाया उपकारितावर्ण्णनम्, ग) मृगयातः दुष्यन्तस्य विरतिः, घ) विदुषकनिकटे दुष्यन्तस्य शकुन्तलानुरागवर्ण्णनम्।**

**३- बोधप्रश्नाः।**

---

## १. प्रथमाङ्कस्य विषयक्रमः -

**क) नान्दीश्लोकालोचना -** नाटकस्य लक्षणानुसारेण नाटकारम्भे नान्दीपाठः कर्तव्यः। विश्वनाथः कविराजः साहित्यदर्पणे नान्दीलक्षणमित्थं प्रकाशयति, यथा -

'आशीर्वचनससंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता'।(सा.द. ६/११)

अत्र तात्पर्यमिदं यत् देवता-ब्राह्मण-राजादीनाम् आशीर्वादयुक्ता स्तुतिः यत्र विधीयते तत्र सा नान्दी इति कथ्यते। सा नान्दी मङ्गलसूचकम् शङ्खम्, चन्द्रम्, अब्जम्, कोकम्, कैरवं च बोधयति, अर्थात् सा नान्दी तथोक्ता भवति। अपि च इयं नान्दी द्वादशपदा, अष्टपदा, चतुष्पदा वा भयेत्। यत्र पुनः नान्दीपद्ये अभिधेयविषयस्य सूचनं लभ्यते तत्र पत्रावली नान्दी भवति। शाकुन्तलस्य नान्दीपद्ये 'या सृष्टिः ....' इत्यादिस्थले प्रतिवाक्यस्य पदग्रहणात् चतुष्पदा नान्दी भवति। अत्रापि अभिधेयविषयसूचनात् पत्रावलीनान्दी भवति। यथा स्रष्टुः आद्यसृष्टिरूपेण शकुन्तला, विधिहुतं वहतीत्यत्र शकुन्तलाया गर्भधारणम्, ये द्वे कालं विधत्तः इत्यत्र द्वे पदेन अनसूया प्रियम्बदा च, श्रुतिविषयगुणा इत्यत्र शकुन्तलायाः गुणप्रचारः, सर्ववीजप्रकृतिः इत्यत्र सर्वदमनस्य पुत्रस्य उत्पत्तिः, प्राणिनः प्राणवन्तः इत्यत्र पत्न्या पुत्रेण च सह दुष्यन्तस्य नगरप्रत्यावर्तनं प्रजानामानन्दः च ज्ञायते। अतः नाटकीयवीजस्य विन्यासात् पत्रावली नान्दी अपि अत्र भवति। नान्दीश्लोको यथा -

या सृष्टिः स्रष्टुराद्या बहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्ववीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः' ॥

**अन्वयः –** या (तनुः) स्रष्टुः आद्या सृष्टिः । या विधिहुतं हविः वहति । या च होत्री । ये द्वे कालं विधत्तः । श्रुतिविषयगुणा या विश्वं व्याप्य स्थिता । यां सर्ववीजप्रकृतिः इत्याहुः । यया प्राणिनः प्राणवन्तः । ताभिः प्रत्यक्षाभिः अष्टाभिः तनुभिः प्रपन्नः ईशः वः अवतु ।

**अर्थः –** अस्मिन् नान्दीपद्ये कालिदासः स्वकृतनाटकस्य निर्विघ्नपरिसमाप्तये स्वस्य इष्टदेवम् अष्टमूर्तिधरं शिवं स्तौति ।।

काः काः शिवस्याष्टमूर्तयः इति प्रतिपादयितुं सः लिखति या सृष्टिः....' या शिवस्य जलमयी मूर्ति र्विधातुः प्रथमा सृष्टिः भवति, अर्थात् सृष्टिनिर्माणकाले विधाता जलमादौ ससर्ज । इयं जलमयी मूर्तिः शिवस्य एका तनुः । पुनः या तनुः विधिपूर्वकं हुतं हविः धारयति, अर्थात् विधानपूर्वकं हुतं घृतं देवतानां कृते प्रापयति, अर्थात् अग्निरूपा मूर्तिः । इयं भवति शिवस्य द्वितीया तनुः । या होत्री, अर्थात् हवनकत्री, यजमानमूर्तिरित्यर्थः । यजमानमूर्तिरेव शिवस्य तृतीया तनुः । यन्मूर्तिद्वयं कालं (समयम्) विदधाति । अर्थात् सूर्यरूपा मूर्तिः, चन्द्ररूपा मूर्तिः च । एतत् मूर्तिद्वयं दिन-रात्रि मास-ऋतु-वर्षरूपेण समयविधानं करोति । इदं सूर्यचन्द्ररूपमूर्तिद्वयं शिवस्य चतुर्थी पञ्चमी च मूर्तिः । या मूर्तिः श्रुतिविषयगुणा, शब्दगुणकम् आकाशम् इति लक्षणात् शब्दगुणत्वमाकाशेऽस्ति । शब्दः श्रुत्या (कर्ण्णेन) श्रूयते । अतः श्रुतिविषयगुणत्वेन आकाशमुक्तमस्ति, अर्थात् आकाशरूपा या मूर्तिः । इयं शिवस्य षष्ठी मूर्तिः । इयमाकाशरूपा मूर्तिः सर्वं विश्वं व्याप्य तिष्ठति । या मूर्तिः सर्ववीजप्रकृतिः, अर्थात् धान्यादिवीजानां कारणभूता पृथिवीरूपा मूर्तिः । पृथिवीमाश्रित्य धान्यादिवीजानि प्रादुर्भवन्ति । इयं पृथिवीरूपा मूर्तिः शिवस्य ७मी तनुः । या मूर्तिः प्राणिनां प्राणधारणे कारणम्, अर्थात् पवनरूपा मूर्तिः । प्रश्वासेन पवनं गृहीत्वा सर्वे प्राणिनः जीवन्ति । अतः पवनरूपा मूर्तिः शिवस्य अष्टमी मूर्तिः । एताभिः अष्टाभिः मूर्तिभिः प्रत्यक्षभूतः यः ईशः (शिवः) सः युष्मान् (वः) पातु, पवनस्य साक्षात् चक्षुरिन्द्रियगोचरत्वाभावेनापि अङ्गप्रत्यङ्गैरनुभूयमानत्वात् प्रत्यक्षत्वमुक्तम् ।

अत्र कालिदासस्याभिप्रायोऽयं यत् शिवः युष्माकं रक्षाकर्त्ता, सः सर्वव्यापकः, धरणीतले सर्वे पदार्थाः शिवमयाः । एते अष्टप्रकाराः शिवस्य शरीररूपाः । अष्टमूर्तिधरस्य शिवस्य स्तुतिः अत्र कालिदासेन कृता वर्तते ।

नान्द्यनन्तरं महाकविः कालिदासः प्रस्तावनां योजयितुं सूत्रधारनट्योरालापं प्रस्तौति । रङ्गमञ्चे सूत्रधारः स्वपत्नीं नटीमुद्दिश्य कथयति आर्य्ये ! यदि नेपथ्यविधानमवसितं तर्हि इतस्तावदागम्यताम्, ततः नटी आगत्य कथयति, आर्य्यपुत्र ! इयमस्मि । ततः सूत्रधारः कथयति - आर्य्ये अभिरूपभूयिष्ठा (पण्डितपूर्ण्णा) परिषदियम् । अद्य खलु कालिदासग्रथितवस्तुना अभिज्ञानशाकुन्तलनामधेयेन नवेन नाटकेनोपस्थातव्यमस्माभिः, तत् प्रतिपात्रमाधीयतां यत्नः । ततः नटी कथयति - सुविहित प्रयोगतया न किमपि परिहास्यते । ततः सूत्रधारः कथयति - आर्य्ये कथयामि ते भूतार्थम् ।

'आ परितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्
वलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ।'

**अर्थः –** नटी यदा कथयति, आर्य्य ! अस्माभिः नाटकं भूयोभूयः अभ्यस्तम्। अतः अस्मासु नाटकीयपात्रेषु पात्रीषु वा नाटकविषये महती दक्षता वर्तते। कोऽपि परिहासस्य पात्रं न भवेत्। तदा सूत्रधारः नटीमुद्दिश्य कथयति, यावत्कालम् अस्माकं नाट्यप्रयोगं दृष्ट्वा विद्वांसः दर्शकाः परितुष्टाः न भवन्ति तावत् कालम् अस्माकं नाट्यप्रयोगः समीचीनः इति वक्तुं न शक्यते।

यतो हि प्रशिक्षितानां चेतः वलवदपि स्वस्मिन् कदाचित् कदाचित् विश्वासशून्यं भवति। अर्थात् निर्दिष्टं कार्य्यं समीचीनतया कृतं न कृतं वा इति विषये संदिग्धं मनः भवति, यदा पर्य्यवेक्षकाः कार्य्यं प्रशंसन्ति तदा कार्य्यं सफलं भवतीति मन्तव्यम्। अत्र पद्ये अर्थान्तरन्यासः अलङ्कारः।

ततः परं सूत्रधारः एकं गीतं गातुं नटीं कथयति। नटी अपि सद्यः समागतं ग्रीष्मकालमाश्रित्य गीतमेकं गायति, तद्यथा - 'सुभगसलिलावगाहाः पाटलसंसर्गिसुरभिवनवाताः

प्रच्छायसुलभनिद्राः दिवसाः परिणामरमणीयाः।'

**अन्ययः –** सुभगसलिलावगाहाः, पाटलसंसर्गिसुरभिवनवाताः, प्रच्छायसुलभनिद्राः परिणामरमणीयाः दिवसाः भवन्ति।

**अर्थः –** नटी ग्रीष्मकालस्य दिवसान् वर्ण्णयति। सा कथयति, ग्रीष्मदिने शीतलजलस्नानं सुभगं (सुखकरम्) भवति, वनवातः पाटलपुष्पसंसर्गेण सुरभितः भवति, वृक्षच्छायायां निद्रा सुलभा भवति, अपि च दिवसावसानवेलायां सूर्य्यतापन्यूनात् समयः रमणीयः अनुभूयते। अत्र स्वभावोक्तिरलङ्कारः।

ततः अन्यदेकं गीतं गायति नटी। यथा -

'ईषदीषच्चुम्वितानि भ्रमरैः सुकुमारकेसरशिखानि।
अवतंसयन्ति दयमानाः प्रमदाः शिरीषकुसुमानि'॥

**अन्वयः –** भ्रमरैः ईषदीषच्चुम्बितानि सुकुमारकेसरशिखानि शिरीषकुसुमानि दयमानाः प्रमदाः अवतंसयन्ति।

**अर्थः –** अस्मिन् ग्रीष्मदिने भ्रमरैः अल्पम् अल्पं चुम्बितानि कोमलकेसरयुक्तानि शिरीषकुसुमानि प्रमदाः धीरं धीरं स्वकेशभूषणं कुर्वन्ति।

ततःपरं सूत्रधारः नटीं कथयति, आर्य्ये त्वया साधु गीतम्। रागवद्धचित्तवृत्तिरालिखित इव सर्वतोरङ्गः। तदिदानीं कतमं प्रकरणमाश्रित्य एनमाराधयामः। ततः नटी कथयति। ननु आर्य्यमिश्रैः प्रथममेवाज्ञप्तमभिज्ञानशाकुन्तलं नाम अपूर्वं नाटकं प्रयोगेऽधिक्रियतामिति।

**ख) प्रस्तावना –** ततः सूत्रधारः कथयति, आर्य्ये सम्यगनुवोधितोऽस्मि। अस्मिन् क्षणे विस्मृतं खलु मया। **'तवास्मि गीतरागेण हारिणा प्रसभं हृतः।**
**एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा'॥**

**अन्वयः –** अतिरंहसा सारङ्गेण एष राजा दुष्यन्त इव अस्मि (अहम्) तव हारिणा गीतरागेण प्रसभं हृतः।

**अर्थः –** नटः रङ्गमञ्चमागत्य नटीं गीतमेकं गातुं कथयति। नटी सुन्दरस्वरेण ग्रीष्मकालम् आश्रित्य सुन्दरं गीतमेकं गीतवती। तस्याः गीतेन नटः अपहृतमनाः अभवत्। सः ततः नटीं कथयति तव गीतेन अहमपहृतोऽस्मि। यथा राजा दुष्यन्तः वेगगामिना मृगेण अपहृतः जातः। अर्थात् मृगयार्थमागतः दुष्यन्तः यथा तेन मृगेण दूरमध्वानमाकृष्टः अभवत् तथा नटः नटीगीतेन समाकृष्टः अभवत्। इतः परं रङ्गमञ्चे दुष्यन्तः एकं मृगमनुधावन् दृष्टः सामाजिकैः।

अत्रानेन प्रकारेण नाटकस्य विषयवस्तुसूचनात् प्रस्तावना भवति। पञ्च प्रस्तावनामध्ये इयं भवति अवलगिताख्या प्रस्तावना। लक्षणं यथा -

'यत्रैकत्र समावेशात् कार्यमन्यत् प्रसाध्यते
प्रयोगे खलु तज्ज्ञेयं नाम्नाऽवलगितं बुधैः'। (सा.द.)

अत्र तात्पर्य्यमिदं यत् एकस्मिन् विषये समावेशात् सादृश्योपन्यासात् हेतोः यत्र अन्यत् कार्य्यम् उपमानरूपं पात्रप्रवेशरूपं कार्य्यं साधितं भवति तत्र अवलगितनाम्नी प्रस्तावना भवति। अवलगति पात्रप्रवेशेन सुन्दरमवसजतीति अवलगितम्।

## ग. मृगमनुसरतः राज्ञः वर्ण्णनम् –

(ततः प्रविशति मृगानुसारी सशरचापहस्तो राजा रथेन सूतश्च।)

सूतः - (राजानं मृगं चावलोक्य)

कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके
मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम्॥

**अन्वयः –** कृष्णसारे अधिज्यकार्मुके त्वयि च चक्षुः ददत् (अहं) मृगानुसारिणं (त्वाम्) साक्षात् पिनाकिनम् इव पश्यामि।

**अर्थः –** उपवने मृगमनुधावन्तं राजानमुद्दिश्य सारथिः कथयति, देव! अग्रे पलायमानं कृष्णसारम् आरूढगुणं धनुः धृतवन्तं त्वाञ्च विलोक्य अहं चिन्तयामि भवान् साक्षात् पिनाकी इव।

अत्रेदं बोद्धव्यं यत् पुरा कदाचित् ब्रह्मा स्व युवत्यां पुत्र्यां समाकृष्टः सन् तां रन्तुमुद्यतः अभवत्। एतेन भीता सा मृगीरूपेण पलायिता। ब्रह्माऽपि मृगरूपं गृहीत्वा तामनु अधावत्। सा शिवं शरणं गता। शिवः स्व धनुः पिनाकं धृत्वा मृगरूपधारिणः ब्रह्मणः पश्चात् धावित्वा तं मारयितुम् उद्यतः आसीत्। पिनाकधनुर्धारी शिवः यथा मृगमनु अधावत् तथा अत्र दुष्यन्तः मृगमनुधावतीति सूतस्याभिप्रायः।

## घ. भयार्तमृगस्य पलायनवर्ण्णनम् –

ततः मृगस्य शीघ्रगामित्वमालक्ष्य राजा सारथिं कथयति, सूत ! पश्य असौ मृगः इदानीम् अस्मन्निकटात् दूरतरः भवति। राज्ञः वचनं श्रुत्वा सारथिः कथयति, आयुष्मन्! उद्घातिनी भूमिरिति मया रश्मिसंयमनात् रथस्य मन्दीकृतो वेगः। तेन मृग एष विप्रकृष्णान्तरः। संप्रति समदेशवर्तिनस्ते न दुरासदोभविष्यति। ततः घोटकानां गतिवेगं सूचयन् सारथिः कथयति।

**ग्रीवाभङ्गभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः**
**पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्**
**दर्भैरर्धाबलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा**
**पश्योदग्रप्लुतत्वात् वियति बहुतरं स्तोकमुर्व्या प्रयाति ।**

**अन्वयः –** अनुपतति स्यन्दने ग्रीवाभङ्गाभिरामं मुहुः दत्तदृष्टिः, शरपतनभयात् भूयसा पश्चार्धेन पूर्वकायं प्रविष्टः श्रमविवृतमुखभ्रंशिभिः अर्धावलीढैः दर्भैः कीर्णवर्त्मा उदग्रप्लुतत्वात् वियति बहुतरम् उर्व्यां स्तोकं प्रयाति, इति पश्य ।

**अर्थः –** दुष्यन्तः मृगयार्थं वनं गत्वा तत्र एकमाश्रममृगमनुधावति । तदानीं भयेन पलायमानस्य मृगस्य अवस्थां राजा सारथिनिकटे सूचयति । राजा कथयति हे सूत ! त्वं पश्य । अधुना मृगमनुधावन्तम् अस्माकं रथम् असौ ग्रीवाभङ्गपूर्वकं वारम्बारं पश्यति । अर्थात् अस्माकमयं रथः तत्सविधात् कियद्दूरे वर्तते इति ज्ञातुं सः मृगः पुनः पुनः ग्रीवाभङ्गपूर्वकमबलोकयति । कदाचित् मम शरः तस्योपरि पतेत्, अतः भयेन शरीरस्य पश्चात्भागं पूर्वभागेन लुक्कायितं करोति । वेगेन धावनात् तस्य मुखात् अर्धभक्षितः घासः भूमौ पतति । लम्फप्रदानेन सः आकाशे बहुसमयं नयति भूमौ केवलं पदस्थापनाय अल्पसमयं तिष्ठति ।

अत्र आत्मरक्षार्थं भयेन पलायमानस्य मृगस्यावस्थावर्णनात् स्वभावोक्तिरलङ्कारः भयानकरसश्च ।

**मुक्तेषु रश्मिषु निरायतपूर्वकाया निष्कम्पचामरशिखा निभृतोद्ध्र्वकर्णाः ।**
**आत्मोद्धतैरपि रजोभिरलङ्घनीया धावन्त्यमी मृगजवाक्षमयैव रथ्याः ।।**

**अन्वयः –** मुक्तेषु रश्मिषु मृगजवाक्षमया इव निरायतपूर्वकायाः निष्कम्पचामरशिखाः निभृतोद्ध्र्वकर्णाः आत्मोद्धतैः अपि रजोभिः अलङ्घनीयाः अमी रथ्याः धावन्ति ।

**अर्थः –** असमतलभूभागत्वात् मृगस्य पश्चाद्भागे दुष्यन्तस्य रथः वेगेन गन्तुं न समर्थः, तेन अग्रे धावन् मृगः बहुदूरं पलायितः । राजा यदा एतद्विषये सारथिं पृष्टवान् तदा सारथिः कथयति संप्रति समदेशवर्तिनस्ते दुरासदो मृगो न भविष्यति । समतलभुवि रथवेगं वर्धयन् सारथिः कथयति, राजन् अधुना मया घोटकानां खलीनः (लगाम् इति जनभाषायाम्) शिथिलीकृतः । मृगवेगं प्रति असहिष्णवः इव अश्वाः अधुना श्रीघ्रधावने निजशरीरमायतं कुर्वन्ति । तेषां भूषणार्थं शिरसि संयुताः चमरीपिच्छाः निश्चला भवन्ति । तेषां कर्णाः अपि ऊद्ध्र्वमुखाः सन्तः स्थिराः भवन्ति । स्वखुरोत्थितैः धूलिपटलैः अपि एते अश्वाः अलङ्घनीयाः भवन्ति, अर्थात् इयता वेगेन ते धावन्ति येन स्वपदस्पर्शेन पृथिवीतः उत्थिता धूलिरपि तान् लङ्घितुं न शक्नोति । अत्र घोटकानां शीघ्रधावनं वर्णितमस्ति, अतः स्वभावोक्तिरलङ्कारः ।

**यदालोके सूक्ष्मं व्रजति सहसा तद् विपुलतां**
**यदद्धा विच्छिन्नं भवति कृतसन्धानमिव तत्**
**प्रकृत्या यद्वक्रं तदपि समरेखं नयनयो**
**र्न मे दूरे किञ्चित् क्षणमपि न पार्श्वे रथजवात् ।**

**अन्वयः –** यत् सूक्ष्मम् आलोके तत् रथजवात् सहसा विपुलतां व्रजति, यत् अर्द्धा विच्छिन्नं तत् कृतसन्धानम् इव भवति, यत् प्रकृत्या वक्रं तदपि नयनयोः समरेखं (भवति) क्षणमपि किञ्चित् मे दूरे न पार्श्वे न च (भवति)

**अर्थः –** यदा सारथिः समतलभुवि घोटकान् शीघ्रं धावितुं प्रचोदयति तदा रथस्य शीघ्रगामित्वम् अनुभूय राजा कथयति, अधुना रथवेगः शीघ्रतरः जातः । तेन यत् वस्तु दूरे सूक्ष्मरूपेण दृष्टं तत् सहसा बृहद्रूपं दृश्यते । यत् वस्तु वस्तुतः पृथक् पृथक् आसीत् तत् सर्वं सम्मीलितमिव दृश्यते, यत् प्रकृत्या वक्रं तत् सरलमिव दृश्यते, अपि च न किञ्चिद्वस्तु मम पार्श्वे अथवा दूरे तिष्ठति । रथवेगात् एतत् सर्वं सम्भवति । अस्मिन् श्लोके स्वभावोक्तिरलङ्कारः, यत् सूक्ष्ममालोके तद् विपुलतां व्रजतीति कथनेन विरोधाभासः, 'कृतसन्धानमिव' इति स्थले उत्प्रेक्षा च ।

## ङ. मृगमारणे ऋषिकुमाराणां निषेधः –

न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे पुष्पराशाविवाग्निः
क्व वत हरिणकानां जीवितं चातिलोलं
क्व च निशितनिपाताः वज्रसाराः शरास्ते ।

**अन्वयः –** मृदुनि मृगशरीरेऽस्मिन् पुष्पराशौ अग्निरिव अयं बाणः न खलु न खलु सन्निपात्यः । क्व च हरिणकानाम् अतिलोलं जीवितम्, क्व च निशितनिपाताः वज्रसाराः ते शराः ?

**अर्थः –** उपवने यदा राजा दुष्यन्तः मृगं मारयितुं तमनु रथेन धावति, तदा एकः वैखानसः तत्रोपस्थितः सन् राजानं वारयति । सः मृगमारणे लग्नमानसं राजानं कथयति, हे राजन् ! अयमाश्रममृगः । कोमले अस्मिन् मृगे तव बाणपतनं पुष्पराशौ वह्निपतनवत् भविष्यति । कोमलमृगाणां अतिलोलं जीवनं क्व, तव वज्रवत् कठिनाः शराः क्व ? अतः कोमलः आश्रममृगोऽयं न हन्तव्यः । अत्रार्थान्तरन्यासः अलङ्कारः । पुष्पराशाविवाग्निः इत्यत्र उपमा, हरिणानां चञ्चलं जीवनं क्व, वज्रसाराः शराश्च क्व इति कथनेन विषमालङ्कारः ।

'तत् साधुकृतसन्धानं प्रतिसंहर सायकम्
आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि' ।

**अन्वयः –** तत् साधुकृतसंधानं सायकं प्रतिसंहर । वः शस्त्रम् आर्तत्राणाय (वर्तते) अनागसि प्रहर्तुं न ।

**अर्थः –** अस्मिन् श्लोके मृगमारणोद्यतं दुष्यन्तं तत् कर्मणः निवारयितुं पुनः प्रचोदयन् वैखानसः कथयति । हे राजन् ! मृगमुद्दिश्य भवान् यं शरं धनुषि आरोपयति तं शरं ततः परावृत्य तूणीरे स्थापयतु । यतो हि भवतः शरः आर्तत्राणाय उद्दिष्टः न तु निरपराधं प्रहर्तुम् । अर्थात् भवादृशां वीराणां शस्त्रं सर्वदा दुःखपीडितानां प्राणिनामुद्धाराय समुद्दिष्टमस्ति । न तु कदाचित् निरपराधं प्राणिनं मारयितुम्, अत्रार्थान्तरन्यासालङ्कारः ।

## च. दुष्यन्तकृते ऋषिप्रदत्तः आशीर्वादः -

जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव
पुत्रमेवं गुणोपेतं चक्रवर्तिनमाप्नुहि ।'

**अन्वयः -** पुरोः वंशे यस्य जन्म, तव इदं युक्तरूपम् । एवं गुणोपेतं चक्रवर्तिनं पुत्रम् आप्नुहि ।

**अर्थः -** 'न खलु न खलु बाणः मृदुनि मृगशरीरे सन्निपात्यः' इत्यादिवचनमाकर्ण्य यदा राजा दुष्यन्तः मृगमारणात् विरतः अभवत् तदा सः पूर्वोक्तः वैखानसः प्रीतः सन् राज्ञः कृते आशीर्वादं ददाति । आशीर्वादप्रदानव्याजेन सः कथयति, हे राजन् ! भवतः जन्म पुरुवंशे भवति । मृगमारणविरतत्वं तव वंशानुगुणकार्यम्, यदिदानीं त्वया बिहितम् । अतः मया आशीः प्रदीयते यत् त्वं त्वत्सदृशं चक्रवर्तिनं पुत्रं लभस्व ।

आशीर्वादप्रदानानन्तरं वैखानसः राजानं कथयति, हे राजन् ! समिदाहरणाय प्रस्थिताः वयम्, एष खलु कण्वस्य कुलपतेः अनुमालिनीतीरम् आश्रमोदृश्यते । न चेदन्यकार्य्यातिपातः, तर्हि प्रविश्य प्रतिगृह्यतामातिथेयः सत्कारः । अपि च -

रम्यास्तपोधनानां प्रतिहतविघ्नाः क्रियाः समवलोक्य
ज्ञास्यसि कियद्भुजो मे रक्षति मौर्वीकिणाङ्क इति ॥

**अन्वयः -** तपोधनानां प्रतिहतविघ्नाः रम्याः क्रियाः समवलोक्य मौर्वीकिणाङ्कः मे भुजः कियद्रक्षति इति ज्ञास्यसि ।

**अर्थः -** वैखानसः कण्वमहर्षेराश्रमं प्रति गन्तुं राजानं दुष्यन्तं निमन्त्रयति । सः पुनः कथयति राजन् भवान् आश्रमं गत्वा स्वचक्षुषा तपोधनानां विघ्नरहितं रमणीयं तपस्यादिकार्य्यकलापं विलोक्य ज्ञातुं पारयिष्यति यत् भवतः धनुष्टङ्कारजन्यव्रणचिह्नितः भुजः कियता परिमाणेन आश्रमं निरुपद्रवं करोतीति । भवतः सुशासनेन यथा राज्यं समृद्धं तथा अस्माकमयमाश्रमोऽपि । एतत् भवान् आश्रमं गत्वा साक्षात् पश्यतु इत्यर्थः ।

अनन्तरं राजा वैखानसं पृच्छति, किं कुलपतिः कण्वः आश्रमे इदानीमस्ति ?

वैखानसः - इदानीं दुहितरं शकुन्तलाम् अतिथिसत्काराय नियुज्य दैवमस्याः प्रतिकूलं शमयितुं सोमतीर्थं गतः ।

राजा - भवतु तामेव द्रक्षामि । सा खलु विदितभक्तिं मां महर्षेः कथयिष्यति ।

ततः राजा सारथिं कथयति, सारथे ! अश्वान् प्रचोदय । पुण्याश्रमदर्शनेन तावत् आत्मानं पुनीमहे । ततः सारथिः रथं चालयति ।

## छ. आश्रमवर्ण्णना -

ततः सारथिं राजा कथयति- अकथितोऽपि ज्ञायते एष आभोगस्तपोवनस्येति । ततः सूतः कथयति, कथं भवान् जानाति इयं सीमा तपोवनस्येति । ततः राजा कथयति -

नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा -
स्तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः ।

**अन्वयः –** अत्र क्वचित् तरूणाम् अधः शुकगर्भकोटरमुखभ्रष्टाः नीवाराः (दृश्यन्ते) क्वचित् प्रस्निग्धाः उपलाः इङ्गुदीफलभिदः एव सूच्यन्ते । क्वचित् विश्वासोपगमात् अभिन्नगतयः मृगाः शब्दं सहन्ते । क्वचित् च तोयाधारपथाः वल्कलशिखानिष्यन्दरेखाङ्किताः (दृश्यन्ते) ।

**अर्थः –** अस्मिन् श्लोके राजा दुष्यन्तः सारथिकृते आश्रमपरिचयं प्रददाति । यत्र दुष्यन्तः वैखानसवचनेन मृगमारणात् निवृत्तः अभवत् ततः किञ्चित् दूरं गत्वा सः सारथिं कथयति, इदं स्थानम् आश्रमस्य आभोगः (निकटवर्त्तिस्थानम्) इति ज्ञायते । यतोहि अत्र क्वचित् आश्रमान्तेवासिभिः प्रस्तरोपरि इङ्गुदीफलात् तैलनिष्कासनं कृतम् । अतः प्रस्तरखण्डाः प्रस्निग्धाः दृश्यन्ते । अत्राश्रमे अस्माकं काचित् क्षतिर्नास्तीति विभाव्य निश्चलतया मृगाः अस्माकं रथशब्दम् अपि सहन्ते । झरणा पुष्करिणीमार्गाश्च ब्रह्मचारिणाम् अवगाहनादिकर्म समाप्य प्रस्थितानां वल्कलशिखानिःसृतैः जलैः चिह्निताः दृश्यन्ते । अतः स्वतः ज्ञायते यत् इदं स्थानम् आश्रमान्तर्गतमिति ।

कुल्याम्भोभिः पवनचपलैः शाखिनोधौतमूलाः
भिन्नो रागः किसलयरुचामाज्यधूमोद्गमेन
एते चार्वागुपवनभुवि च्छिन्नदर्भाङ्कुरायाम्
नष्टाशङ्काः हरिणशिशवः मन्दमन्दं चरन्ति' ।

**अन्वयः –** पवनचपलैः कुल्याम्भोभिः शाखिनः धौतमूलाः (सन्ति) आज्यधूमोद्गमेन किसलयरुचां रागः भिन्नः (भवति) एते च नष्टाशङ्काः हरिणशिशवः च्छिन्नदर्भाङ्कुरायाम् उपवनभुवि अर्वाक् मन्दमन्दं चरन्ति ।

**अर्थः –** अस्मिन् श्लोके पुनः आश्रमविषये दुष्यन्तः सारथिं सूचयति । सः कथयति हे सारथे ! इदमाश्रमस्थानमिति अन्यैः लक्षणैः अपि सूचितं भवति । तथा हि कुत्रिमक्षुद्रझरणाजलैः पवनचञ्चलैः तटभागवर्तिनः वृक्षाः क्षालितमूलाः भवन्ति । तपोवने जलाभावपूरणाय एतादृशी कृत्रिमजलझरी निर्मीयते एव । प्रातः सायंञ्च होमकुण्डसमुद्भवैः धूमैः नवपल्लवानां रागः भिन्नः भवति । अर्थात् होमधूमसंपर्केण रक्तवर्णाः पल्लवाः वर्णान्तरतामागताः । आश्रमे स्थिताः मृगशिशवः भयहीनाः सन्तः अस्माकं रथस्य निकटे विच्छिन्नकुशयुक्तायां भुवि धीरं धीरं चरन्ति । आश्रमे हिंसाभावः नास्ति, अतः अस्माकं कृते हिंसां कोऽपि न कुर्यादिति मत्वा अस्माकं रथमश्वान् च दृष्ट्वाऽपि हरिणशिशवः निर्भयेन चरन्ति । 'अर्वाक्' इति निकटार्थे अव्ययपदम् ।

'शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य
अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र' ।

**अन्वयः –** इदम् आश्रमपदं शान्तम्, बाहुः च स्फुरति । इह अस्य फलं कुतः । अथवा भवितव्यानां द्वाराणि सर्वत्र भवन्ति ।

**अर्थः –** आश्रमप्रवेशानन्तरं दुष्यन्तस्य दक्षिणभुजस्य स्फुरणं जातम् । भारतीयज्योतिषशास्त्रानुसारेण दक्षिणभुजाक्षिस्फुरणेन स्त्रीधनादिलाभो भवति । अतः राजा चिन्तयति इदमाश्रमपदं शान्तमस्ति । अत्र तपस्विनः दयादाक्षिण्यादीनां साक्षात् मूर्तयः निवसन्ति । अत्र बाहुस्फुरणस्य फलं (स्त्रीधनादिलाभः) कुतो वा प्राप्तुं शक्यते । अथवा मत्कृते यत् किञ्चित् भवितव्यं भोग्यमस्ति तन्मया भोक्तव्यम् । भवितव्यस्य द्वाराणि सर्वत्र विद्यन्ते । आश्रमो भवतु अथवा राजप्रासादोभवतु, यत्र यत् भोक्तव्यमस्ति तत्र तत् अवश्यं भोक्तव्यम् । भाविनि काले शकुन्तलायाः लाभः इति भुजस्फुरणस्य फलमवगन्तव्यम् ।

## ज. शकुन्तलावर्ण्णना –

'शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य
दूरीकृताः खलु गुणैरुद्यानलताः वनलताभिः'

**अन्वयः –** यदि आश्रमवासिनः जनस्य इदं शुद्धान्तदुर्लभं वपुः (भवति तर्हि) वनलताभिः गुणैः उद्यानलताः दूरीकृताः खलु ।

**अर्थः –** राजा दुष्यन्तः यदा आश्रमाभ्यन्तरं प्रविशति, तदा वृक्षवाटिकायाः दक्षिणभागे तरुणीनां मिथः आलापं श्रुतवान् । सः तत्र गत्वा सखीभ्यां सह वृक्षमूले जलसेचनरतां शकुन्तलां दृष्ट्वा चिन्तयति, अहो ! आश्रमे स्थितायाः अस्याः तरुण्याः रूपमतीवं सुन्दरम् । एतादृशं रूपं ममान्तःपुरे स्थितानां रमणीनामपि नास्ति । अतः अस्याः रूपं शुद्धान्तदुर्लभं भवति । अहमत्र चिन्तयामि यत् यत्नपूर्वकम् उद्याने वर्द्धिता लताः अयत्नपरिवर्द्धिताभिः वनलताभिः गुणैः पराजिताः इति । अत्र शकुन्तला अयत्नपरिवर्द्धित-वनलतारूपेण चित्रिता । यत्नपूर्वकम् अन्तःपुरे स्थिताः राजरमण्यः उद्यानलतारूपेण चित्रिताश्च सन्ति । राजरमणीरूपापेक्षया शकुन्तलायाः रूपाधिक्यात् वनलताभिः उद्यानलताः गुणैः दूरीकृताः इत्युक्तम् ।

'इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां च्छेत्तुमृषिर्व्यवस्यति' ।

**अन्वयः –** यः ऋषिः इदम् अव्याजमनोहरं वपुः किल तपः क्षमं साधयितुमिच्छति, सः ध्रुवं नीलोत्पलपत्रधारया शमीलतां च्छेत्तुं व्यवस्यति ।

**अर्थः –** आश्रमे अतिसुन्दरी कोमलाङ्गीं शकुन्तलां जलसेचनकर्मणि नियुक्तामबलोक्य राजा दुष्यन्तश्चिन्तयति, यः ऋषिः कोमलाङ्गीं शकुन्तलां तपस्यायोग्ये अतिकठिने आश्रमवृक्षसेचनकर्मणि योजयति, सः नूनं नीलपद्मधारया शमीवृक्षस्य च्छेदनं कर्तुमिच्छति । अत्र तात्पर्यमिदं यत् यथा नीलोत्पलपत्रधारा शमीवृक्षच्छेदने अनर्हा तथा इयमपि सुन्दरी कोमलाङ्गी जलसेचनरूपे कठिनकर्मणि अनर्हा । अत्र निदर्शना अलङ्कारः ।

‘सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्’

**अन्वयः –** सरसिजं शैवलेन अनुविद्धमपि रम्यं (भवति) हिंमाशोः मलिनमपि लक्ष्म लक्ष्मीं तनोति । इयं तन्वी वल्कलेनापि अधिकमनोज्ञा (भवति) हि मधुराणाम् आकृतीनां मण्डनं किमिव न भवति ।

**अर्थः –** उपवने वल्कलपरिहितां सुन्दरीं नवनीताङ्गीं शकुन्तलां दूरात् लतावृक्षच्छिद्रमध्ये अबलोक्य राजा दुष्यन्तश्चिन्तयति, यत् शैवलेन आवृतमपि सरसिजं रमणीयं भवति, अर्थात् असुन्दरवस्तुना शैवलेन वेष्टितमपि कमलं सुन्दरं दृश्यते । तद्वत् पूर्णचन्द्रस्य शरीरे स्पष्टरूपेण प्रतिभातमपि लक्ष्म (कलङ्कः) तदीयशोभां विस्तारयति । तद्वत् इयं शकुन्तला तन्वङ्गी वल्कलावृतापि सातिशयं मनोज्ञा दृश्यते । सुन्दरीणाम् आकृतीनां किं वा मण्डनं न भवति ? अर्थात् यत् वस्तु प्रकृत्या रमणीयं तत्कृते यत् किञ्चित् भूषणं भवतु नाम तेन तत् रमणीयं दृश्यते ।

अत्र परमरूपवती शकुन्तला वल्कलावृतापि सातिशयरमणीया दृश्यते इति कवेरभिप्रायः । पटवस्त्रस्थाने वल्कलं धरन्ती शकुन्तला शैवालावृतकमलिनीव कलङ्कावृतशशिलेखा इव च चकास्तीति सारः । अत्रार्थान्तरन्यासः अलङ्कारः ।

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू ।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ।

**अन्वयः –** अस्याः अधरः किसलयरागः खलु । बाहू विटपानुकारिणौ, अङ्गेषु कुसुममिव लोभनीयं यौवनं सन्नद्धम् ।

**अर्थः –** अस्मिन् श्लोके राजा दुष्यन्तः शकुन्तलायाः सौन्दर्यं परिकल्पयति । शकुन्तलायाः अधरः नवकिसलयवत् रक्तवर्णः, बाहुयुगलं लतावत् कोमलं दीर्घञ्च । तस्याः शरीरे कुसुमवत् लोभनीयं यौवनं सन्नद्धमस्ति । यथा लतायां लोभनीयं कुसुमं सर्वान् आकर्षति तथा शकुन्तलायाः लोभनीयं यौवनमिति कवेः अभिप्रायः । अत्रोपमालङ्कारः ।

अनन्तरं राजा शकुन्तलामुद्दिश्य चिन्तयति, यत् - अपि नाम कुलपतेरियम् असवर्णक्षेत्रसम्भवा स्यात् । अथवा कृतं सन्देहेन । यतो हि -

‘असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः ।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तः करणं प्रवृत्तयः’ ।

**अन्वयः –** आर्यं मे मनः अस्याम् यत् अभिलाषि (अतः) इयं क्षत्रपरिग्रहक्षमा (इति)असंशयम् । हि सन्देहपदेषु वस्तुषु सताम् अन्तःकरणप्रवृत्तयः प्रमाणं (भवन्ति)

**अर्थः** – शकुन्तलां दृष्ट्वा पत्नीरूपेण तां स्वीकर्तुमभिलषति दुष्यन्तः। परन्तु कण्वस्याश्रमे स्थिता शकुन्तला कदाचित् तस्य कण्वस्य ब्रह्मर्षेः कन्या भवेत्, अतः ब्राह्मणकन्या दुष्यन्तस्य क्षत्रियस्य कृते ग्रहणयोग्या न स्यात्, इत्यादिविषये चिन्तयन् अन्तिमं सिद्धान्तं नयति राजा दुष्यन्त। यः सिद्धान्तः अत्र वर्णितः श्लोके।

राजा चिन्तयति, नूनमियं शकुन्तला मया क्षत्रियेण ग्रहणयोग्या (विवाहयोग्या) अस्ति। यतः अस्यां मम मनः साभिलाषि भवति, अर्थात् क्षत्रियग्रहणयोग्या इति मम मनः कथयति। यतोहि सन्देहस्थलेषु किं करणीयं किमकरणीयमिति चिन्तादोलाधिरूढानां सज्जनानां मनः एव प्रमाणम्। ते सज्जनाः स्वं मनः पृच्छन्ति किं कर्तव्यमिति। ततः सज्जनानां अन्तःकरणपवृत्तिः यत् कथयति तदेव समीचीनमिति मत्वा तदनुसारेण ते कार्यमपि संपादयन्ति। तद्वत् शकुन्तला आश्रमवासिन्यपि मया क्षत्रियेण विवाहयोग्या वा नेति संदेहे मम मनः कथयति यदियं नूनं मम विवाहयोग्या इति। ब्राह्मणकन्यां विहाय अन्यजातित्रयात् क्षत्रियः कन्याग्रहणं कुर्यादिति धर्मशास्त्रं प्रमाणम्। अत्रार्थान्तरन्यासालङ्कारः।

## झ) भ्रमरप्रशंसा –

अस्मिन्नभ्यन्तरे एकः भ्रमरः शकुन्तलायाः मुखं परितः भ्रमति। शकुन्तला भ्रमरवाधां रूपयति। ततः राजा सस्पृहं विलोक्य कथयति -

‘चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः।
करौ व्याधुन्वत्याः पिवसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषात् मधुकर हतास्त्वं खलु कृती’।

**अन्वयः** – हे मधुकर! त्वं वेपथुमतीं चलापाङ्गां दृष्टिं स्पृशसि। कर्णान्तिकचरः त्वं रहसि आख्यायी इव मृदु स्वनसि। करौ व्याधुन्वत्याः रतिसर्वस्वम् अधरं पवसि। वयं तत्त्वान्वेषात् हताः, त्वं खलु कृती।

**अर्थः** – उद्याने जलदानरतां शकुन्तलां प्रति एकः मधुकरः आकृष्टः सन् तस्या मुखमण्डले भ्रमति। दुष्यन्तः एतादृशं दृश्यं दृष्ट्वा मधुकरम् उद्दिश्य सासूयमिव कथयति, हे भ्रमर! त्वं भयेन कम्पनशीलां शकुन्तलायाः चञ्चलापाङ्गयुक्तां दृष्टिं स्पृशसि। तस्याः कर्णसविधे किञ्चिद् गोपनकथां कथयितुमिव त्वं मृदु स्वनसि। तव सकाशात् रक्षां प्राप्तुं करद्वयं चालयन्त्याः तस्याः रतिसर्वस्वमधरं पिवसि। एतत् कुर्वाणः त्वं खलु कृती। वयं तु इयं का, मत्परिग्रहयोग्या भवेद् वा नेति तत्त्वान्वेषणे हताः, अर्थात् एतद् विचिन्त्य चिन्ताक्लिष्टाः भवामः।

अत्र शकुन्तलायां दुष्यन्तेन यत् कर्तव्यं तत् कश्चित् मधुपः करोति, परन्तु दुष्यन्तः कर्तुं न पारयतीति ज्ञात्वा सः कथयति हे मधुप! त्वं खलु कृती। अत्र व्यतिरेकालङ्कारः।

## ञ. शकुन्तलादिनिकटे दुष्यन्तस्य प्रवेशः -

अनन्तरं सखीद्वयं शकुन्तलां कथयति यत् 'के आवां परित्रातुम्, दुष्यन्तमाक्रन्द। राजरक्षितव्यानि तपोवनानि नाम्। ततः राजा कथयति - अवसरोऽयमात्मानं प्रकाशयितुम्। न भेतव्यम्, न भेतव्यम्।

'कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम्
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु'।

**अन्वयः -** दुर्विनीतानां शासितरि पौरवे वसुमतीं शासति कः अयं मुग्धासु तपस्विकन्यासु अविनयम् आचरति।

**अर्थः -** यदा मधुकरेण शकुन्तला पीडिता सती आत्मरक्षणाय सख्योः साहाय्यमिच्छति, तदा सख्यौ कथयतः के आवां तव परित्राणाय। प्रजारक्षणतत्परं दुष्यन्तमाह्वय। सः कदाचित् त्वां रक्षेत्। एतत् श्रुत्वा तरुणीनां निकटं गन्तुमुचितः अवसरः लब्धः इति विचिन्त्य उपर्युक्तं पद्याकारितं पदं श्रावयन् दुष्यन्तः तरुणीनां निकटं सर्पति। सः कथयति, दुष्टानां शासके पुरवंशराजे पृथिवीशाननं कुर्वति सति कः अयं दुष्टः मधुपः (मद्यपः) मुग्धतपस्विकन्यासु दुर्विनयमाचरति, अर्थात् यदि कश्चित् दुष्टः राज्ये उपद्रवं करोति, तर्हि राजा तं दण्डयति। एवंविधायां परिस्थितौ आश्रमे पुनः कः मधुपः (मद्यपः) तपस्विकन्यासु दुर्विनयमाचरति। वस्तुतः राजा जानाति अयं एकः भ्रमरः। भ्रमरस्य नामान्तरं मधुपः। मधुपशब्देन मद्यपोऽपि बुध्यते। शकुन्तलादीनां यथा ज्ञानं भवेत् राजा मद्यपं नियन्त्रयितुं तत्रागतः इति। अत्र प्रकृतः दुष्यन्तः शकुन्तला च अप्रकृतपौरवशब्देन तपस्विकन्याशब्देन च कथितः भवति, अतः अप्रस्तुतप्रशंसालङ्कारः।

अनन्तरम् अनसूया राजानं कथयति - 'न खलु किमप्यत्याहितम्, इयं नौ प्रियसखी मधुकरेणाभिभूयमाना कातरीभूता। (इति शकुन्तलां दर्शयति)।

ततः तपस्विकन्यकाभिः सह राज्ञः परिचयः आलापमाध्यमेन जातः। शकुन्तलायाः अप्सरःसम्भवत्वं राजा अनसूयावचनात् जानाति। ततः शकुन्तलायाः अपसरःसम्भवत्वं समर्थयन् राजा चिन्तयति -

'मानुषीषु कथं नु स्यादस्य रूपस्य सम्भवः
न प्रभातरलं ज्योतिरुदेति वसुधातलात्'।

**अन्वयः -** मानुषीषु अस्य रूपस्य सम्भवः कथं नु स्यात्? प्रभातरलं ज्योतिः वसुधातलात् न उदेति।

**अर्थः -** राजा दुष्यन्तः शकुन्तलायाः उद्भवं मेनकाविश्वामित्रसंपर्कात् विज्ञाय तस्याः सौन्दर्यं प्रशंसन् कथयति सर्वथा अप्सरसः सम्भवैषा। अस्याः शकुन्तलायाः यत् सौन्दर्यं वर्तते तत् सौन्दर्यं कदाचित् मानुषस्त्रीणां पक्षे न सम्भवति। अस्याः एतस्य रूपस्य सम्भवः मानुष-उत्पन्नत्वे न सम्भवेत्। तथाहि प्रभया तरलं ज्योतिः (विद्युत्) कदाचित् पृथिवीतलात् नोदेति, अर्थात् विद्युत् यथा आकाशे एव उत्पद्यते न पृथिवीतले तथा शकुन्तलायाः यत् रूपमस्ति तदेव केवलमप्सरसः सम्भवत्वेन सम्भवेत् न मानुषोत्पन्नत्वेन इति। अस्मिन् पद्ये प्रतिवस्तूपमालङ्कारो वर्तते।

इतः परं राजा प्रियम्बदां पृच्छति, किं भवत्याः इयं सखी विवाहसमयं यावत् वैखानसव्रतमाचरिष्यति, अथवा विवाहं न कृत्वा चिरं हरिणाङ्गनाभिः सह उपवने निवत्स्यति। प्रियम्वदा कथयति, आर्य्य ! धर्माचरणेऽपि परवशोऽयं जनः । गुरोः पुनरस्याः अनुरूपवरप्रदाने संकल्पः । शकुन्तलाविवाहसम्बन्धि वचनं प्रियम्बदामुखात् निशम्य राजा आत्मगतं चिन्तयति।

भव हृदय साभिलाषं संप्रति सन्देहनिर्णयो जातः
आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम्'

**अन्वयः –** हृदय ! साभिलाषं भव । संप्रति सन्देहनिर्णयः जातः । यदग्निम् आशङ्कसे तत् इदं स्पर्शक्षमं रत्नम् ।

**अर्थः –** राजा दुष्यन्तः पूर्वं कण्वाश्रमे शकुन्तलां दृष्ट्वा तां कण्वस्य ब्रह्मर्षेः कन्यारूपेण चिन्तितवान् । अतः ब्राह्मणकन्यया सह क्षत्रियस्य विबाहः नोचितः इति मत्वा तस्य मनः खिन्नमासीत् । अधुना सखीमुखात् शकुन्तलाया जन्म क्षत्रियस्य विश्वामित्रस्य संपर्कात् भवतीति श्रुत्वा तां विवोढुं स्वयं समर्थः इति विजानाति । क्षत्रियस्य कृते क्षत्रियकन्यायाः पाणिग्रहणं सुशकमिति बुद्ध्वा स्व हृदयं राजा कथयति हे हृदय ! अधुना शकुन्तला प्राप्तये त्वं साभिलाषम् (आशायुक्तम्) भव । अधुना प्रियम्बदामुखात् शकुन्तलायाः जन्मवृत्तान्तं निशम्य ज्ञायते यदियमपि क्षत्रियकन्या । अतः मत्परिग्रहयोग्या भवेत् वा न इति संदेहस्य निर्णयः जातः । पूर्वं ब्रह्मर्षेः कण्वस्य कन्यारूपेण याम् अग्नितुल्यामस्पर्शां ज्ञातवत्, अधुना सा क्षत्रियकन्या इति विज्ञाय स्पर्शक्षमरत्नतुल्या जाता । यदि सा वस्तुतः ब्रह्मर्षेः कन्या अभविष्यत् तर्हि क्षत्रियपक्षे सा विवाहयोग्या नेति अग्निवत् अस्पृश्या भवेत् । परन्तु अधुना सा क्षत्रियसम्भवा इति विज्ञाय मत्कृते विवाहयोग्या जाता । अतः स्पर्शक्षमरत्नवत् सा अधुना संजाता । अस्मात् कारणात् दुष्यन्तः स्व हृदयं सम्बोध्य कथयति हे हृदय ! शकुन्तलां पत्नीरूपेण प्राप्तुम् अभिलाषं पोषय अधुना। अत्र काव्यलिङ्गमलङ्कारः ।

ततः प्रियम्बदामुखात् आत्मविवाहवृत्तान्तं श्रुत्वा किञ्चित् कुपिता शकन्तुला तस्मात् स्थानात् गन्तुमिच्छति। अनसूया शकुन्तलां कथयति - सखि ! न युक्तमकृतसत्कारमतिथिविशेषं विसृज्य स्वच्छन्दतो गमनम्, परन्तु शकुन्तला न किञ्चिदुक्त्वा प्रस्थितैव। ततः प्रियम्बदा शकुन्तलां निरुद्ध्य गमनात् निवारयति । सा कथयति मम सकाशात् त्वं जलपूर्णघटद्वयं धारयसि । एतदपरिशोध्य न गन्तुमर्हसि । ततः राजा स्वाङ्गुलीयकप्रदानेन शकुन्तलां मोचयितुमिच्छति। ततः सखीद्वयं मुद्रिकोपरि लिखितानि अक्षराणि (दुष्यन्तः इति) अनुवाच्य परस्परमवलोकयतः । ततः प्रियम्बदा कथयति, - तेन हि नार्हत्यैतदङ्गुलिवियोगम् । आर्य्यस्य वचनेन इदानीम् अनृणा एषा । (किञ्चिद् विहस्य) हला शकुन्तले ! मोचितासि अनुकम्पिना आर्य्येण। अथवा महाराजेन। गच्छेदानीम्। ततः राजा स्वात्मनि शकुन्तलायाः अनुरागं चिन्तयति।

'वाचं न मिश्रयति यद्यपि मद्वचोभिः कर्णं ददात्यभिमुखं मयि भाषमाणे ।
कामं न तिष्ठति मदाननसम्मुखीना भूयिष्ठमन्यविषया न तु दृष्टिरस्याः' ।

**अन्वयः –** (इयम्) यद्यपि मद्वचोभिः (साकम्) वाचं न मिश्रयति (तथापि) मयि भाषमाणे सति कर्णम् अभिमुखं ददाति। (इयमपि) कामं मदाननसम्मुखीना न तिष्ठति, अस्या दृष्टिः तु भूयिष्ठम् अन्यविषया न।

**अर्थः –** उपवने सखीभ्यां प्रियम्बदानसूयाभ्यां सह आलापसमये राजा स्वं प्रति अनुरक्तां शकुन्तलां कथमपि ज्ञातुं समर्थोऽभवत्। राजा आत्मगतं प्रकाशयति यत् इयं शकुन्तला मद्वचनेन सह स्वकीयां वाचं न मिश्रयति, अर्थात् मया सह साक्षात् नालपति। परन्तु यदि किञ्चिदहं वक्तुमारभे तर्हि मम वचनं श्रोतुं सा दत्तकर्णा भवति, अपि च मम सम्मुखे सा मुखं दत्वा न तिष्ठति, अर्थात् ममाननं सा साक्षात् न बिलोकयति लज्जया, तथापि सा अन्यविषयं प्रति दृष्टिपातं न करोति, अर्थात् मया अधिष्ठितात् स्थानात् सा अन्यत्र दृष्टिं न निक्षिपति। अस्मिन् श्लोके दुष्यन्तं प्रति शकुन्तलायाः अनुरागः प्रकटितः अस्ति। अत्रानुरागोत्पत्तिकार्याय कर्णप्रदानम्, अन्यविषयं प्रति दृष्टेरप्रदानञ्च कारणद्वयमुपस्थापितम्। अतः समुच्चयः अलङ्कारः।

ततः उपवने वन्यहस्त्युपद्रवः संजातः इति नेपथ्यात् सूचना आगता। ततः ऋषिकन्यकाः उटजं प्रति प्रस्थिताः। प्रस्थानसमये शकुन्तलायाः दुष्यन्तं प्रति अनुरागः कालिदासेन प्रकट्यते।

इतःपरं गद्यखण्डेन महाकविः दुष्यन्तशकुन्तलयोः मिथः अनुरागं दर्शयति यथा, शकुन्तला - अनसूये अभिनवकुशसूच्या परिक्षतं मे चरणम्, कुरवकशाखापरिलग्नं च वल्कलम्, तावत् परिपालय मां यावदेतन्मोचयामि। (शकुन्तला राजानमबलोकयन्ती सव्याजं विलम्ब्य सह सखीभ्यां निष्क्रान्ता)

राजा - मन्दौत्सुक्योऽस्मि नगरगमनं प्रति। यावत् अनुयात्रिकान् समेत्य नातिदूरे तपोवनस्य निवेशयेयम्। न खलु शक्नोमि शकुन्तलाव्यापारादात्मानं निर्वर्तयितुम्'।

एतेन गद्यखण्डद्वयेन उभयोः उभयोः कृते कियान् अनुरागः वर्तते इति एतत् ज्ञातुं शक्यते। अनन्तरं पुनः पद्यद्वारा दुष्यन्तस्य शकुन्तलां प्रति स्थितमनुरागं कविः दर्शयति।

यथा- 'गच्छति पुरः शरीरं धावति पश्चादसंस्तुतं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य'।

**अन्वयः –** मम शरीरं पुरः गच्छति, चेतः प्रतिवातं नीयमानस्य केतोः चीनांशुकमिव असंस्तुतं पश्चात् धावति।

**अर्थः –** अत्र शकुन्तलानुरक्तः दुष्यन्तः स्वनगरं प्रति गन्तुं नोत्सहते इति स्वयं कथयति। सः कथयति शकुन्तलां बिहाय आश्रमात् यद्यहं गमिष्यामि, तर्हि मम शरीरं केवलमग्रे गच्छेत्, परन्तु मम चञ्चलं मनः पश्चात्स्थितां शकुन्तलां प्रति गच्छति। यथा अग्रे धावतः रथस्य पताका (चीनांशुकम्) वायोः विपरीतदिशा बलादुड्डीयते। एतेन दुष्यन्तः स्पष्टरूपेण प्रकाशयति यत् शकुन्तलां बिहाय सः आश्रमात् स्वराजधानीं प्रति गन्तुं न कामयते। अत्र उपमालङ्कारः।

अनेन प्रकारेण अभिज्ञानशाकुन्तलस्य प्रथमाङ्के स्थितं विषयवस्तु क्रमिकतया प्रकाशितम्।

# द्वितीयाङ्कः

## २. द्वितीयाङ्कस्य विषयक्रमः -

द्वतीयाङ्कस्य प्रारम्भे विदूषकस्य उपस्थितिः दृश्यते। अरण्ये अधिकं कालं यापयितुं सः नेच्छति। परन्तु शकुन्तलासमासक्तः राजा नगरं प्रति गन्तुं नोत्सहते। अस्यां परिस्थितौ सः अपश्यत् यत् राजा बाणासनहस्ताभिः यवनीभिः वनपुष्पमालाधारिणीभिः परिवृत्तः सन् आगच्छति। सः तत्र राज्ञः नेत्राकर्षणाय अङ्गभङ्गविकल इव भूत्वा अतिष्ठत्। राजा तदानीमागत्य आत्मना चिन्तयति,

'कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनाश्वासि।
अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते'।

**अन्वयः -** प्रिया कामं सुलभा न। मनः तु तद्भावदर्शनाश्वासि। अकृतार्थेऽपि मनसिजे उभयप्रार्थना रतिं कुरुते।

**अर्थः -** अत्र शकुन्तलाप्रेमासक्तः राजा दुष्यन्तः मनसा चिन्तयति यत् मम प्रिया शकुन्तला यद्यपि मयि अनुरक्ता तथापि इदानीं यावत् सा मम कृते सुलभा नास्ति। तस्याः अनुरागव्यंजकस्निग्धकटाक्षनिक्षेपादिचेष्टाविशेषैः मम मनः आश्वासितम्, अर्थात् सा मम कृते सुलभा भवेदिति तस्याः अनुरागादिभिः ज्ञायते। कन्दर्पः यावत् कालम् असफलः अस्ति, अर्थात् आवयोः मिलनेन कन्दर्पः सफलः स्यात्, परन्तु आवयोः मिलनाभावात् कन्दर्पः असफलः भवति। अतः कन्दर्पः अकृतार्थः इति उक्तमस्ति। कन्दर्पे असफले सति उभयप्रार्थना अर्थात् प्रियायाः मम च परस्परम् अनुरागः उभयोः कृते रतिमुत्पादयति।

अत्र शकुन्तलया सह दुष्यन्तस्य यद्यपि साक्षात् मिलनमद्यावधि न भवति तथापि शकुन्तलाविषयकमनुरागं स्मारं स्मारं दुष्यन्तः परमां प्रीतिमाप्नोति। एतत् सः स्वयमनुभूय स्वगतं कथयति। अत्रार्थान्तरन्यासालङ्कारः।

## क. दुष्यन्तस्य शकुन्तलाविषयिणी चिन्ता -

ततः शकुन्तलायाः पूर्वाचरितं राजा स्मरति।

स्निग्धं वीक्षितमन्यतोऽपि नयने यत्प्रेरयन्त्या तया
यातं यच्च नितम्बयोर्गुरुतया मन्दं बिलासादिव।
मा गा इत्युपरुद्धया यदपि सा सासूयमुक्ता सखी
सर्वं तत् किल मत्परायणमहो कामी स्वतां पश्यति।

**अन्वयः -** तया अन्यतः नयने प्रेरयन्त्या अपि यत् स्निग्धं वीक्षितम्, नितम्बयोः गुरुतया बिलासादिव यच्च मन्दं यातम् मा गाः इत्युपरुद्धया सा सखी सासूयम् यत् उक्ता तत्सर्वं मत्परायणम् अहो ! कामी स्वतां पश्यति।

**अर्थः –** अस्मिन् श्लोके शकुन्तलायाः पूर्वचरितं राजा दुष्यन्तः स्मृत्वा तत्सर्वं निजकृते समुद्दिष्टमासीदिति मनुते। राजा स्मरति, शकुन्तला अन्यस्यां दिशि नयनं पातयन्ती अपि मां स्निग्धं बिलोकितवती, नितम्बयोः पृथुलत्वात् सा यत् धीरगमनं कृतवती, 'त्वम् इतोगन्तुं नार्हसि' इति उक्त्वा यदा सखी तां गमनात् निवारयति तदा सा कृत्रिमासूयावशा सती सखीं यदुक्तवती, तत् सर्वं मामभिलक्ष्य सा कृतवतीति। अहो आश्चर्यस्य विषयः अयं यत् कामी जनः सर्वदा नायिकाया अन्योद्दिष्टं कार्यम् आत्मनःकृते उद्दिष्टमिति मनुते।

अत्र शकुन्तलां प्रति यतः राजा आसक्तः भवति ततः शकुन्तलया यत् यत् कार्यं क्रियते तत् सर्वं दुष्यन्तमुपलक्ष्य क्रियते इति सः चिन्तयति। अत्र दुष्यन्तस्य शकुन्तलां प्रति कामुकभावनात्वं प्रतिफलितमस्ति। अत्रार्थान्तरन्यासालङ्कारः।

टिप्पणी - नितम्बयोः गुरुतया = स्त्रीणां नितम्बभागः (कटिपश्चाद्भागः) पृथुलः भवति। तेन तासां सौन्दर्यं वर्धते। गमनेऽपि मन्दता आगच्छति।

विलासः - प्रियजनदर्शनेन स्त्रीणां जायमानः शृङ्गारिकः भावविशेषः।

सासूयम् - असूयया सह यथा स्यात् तथा। गुणेषु दोषाविष्करणमसूया। परन्तु अत्र सखीं प्रति शकुन्तलायाः एतादृशभावाभावात् क्रोधार्थे असूयाशब्दः प्रयुक्तः।

कामी स्वतां पश्यति - कामी जनः स्वस्य प्रियजनस्य सर्वाणि कर्माणि स्वस्य कृते उद्दिष्टानि इति मनुते। सः स्वप्रेयस्याः सर्वेषु कार्येषु प्रेमप्रभावं पश्यति। सः अपि चिन्तयति यत् मम प्रिया यत्किञ्चित् करोति तत् सर्वं मामुद्दिश्य एव करोति। अतः कामी जनः स्व कामानुकूलत्वं प्रियायाः सर्वेषु कार्येषु पश्यति।

## ख. मृगयाया उपकारितावर्ण्णनम् –

'अनवरतधनुर्ज्यास्फालनक्रूरपूर्वं रविकिरणसहिष्णु स्वेदलेशैरभिन्नम्।
उपचितमपि गात्रं व्यायतत्वादलक्ष्यं गिरिचर इव नागः प्राणसारं विभर्ति'।

**अन्वयः –** देवः गिरिचर इव अनवरतधनुर्ज्यास्फालनक्रूरपूर्वं रविकिरणसहिष्णु स्वेदलेशैः अभिन्नम् उपचितमपि व्यायतत्वात् अलक्ष्यं प्राणसारं गात्रं विभर्ति।

**अर्थः –** अस्मिन् श्लोके सेनापतिः कथयति यत् मृगया दुष्यन्तस्य गुणबृद्धिं (मूल्यबृद्धिम्) करोति। तथा हि राजा दुष्यन्तः वनचरहस्ती इव केवलं बलं वहति, अर्थात् महाबलवान् भवति। यथा हस्ती अनवरतं धनुषः (प्रियालवृक्षस्य) ज्या-आस्फालनेन, (शाखामाकृष्य भूमौ पातनेन) कठिनपूर्वभागः भवति, अर्थात् शुण्ढेन वृक्षाणां समाकर्षणकरणात् शरीरस्य शुण्ढादिपूर्वभागः अति कठिनः भवति, तथा राजा दुष्यन्तोऽपि अनवरतं धनुर्ज्या-आस्फालनेन कठिनकरः भवति। राजाऽपि हस्तीव सूर्यकिरणसहिष्णु बलं धारयति, परिश्रमेणापि स्वेदविन्दू राज्ञः शरीरे न भवति। एतेन तस्य शरीरपुष्टता ज्ञायते। क्षीणम् अलक्ष्यं च प्राणसारं सः विभर्ति।

अपि च- ‘मेदच्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः
सत्त्वानामपि लक्ष्यते विकृतिमत्चित्तं भयक्रोधयोः ।
उत्कर्षः स च धन्विनां यदिषवः सिद्ध्यन्ति लक्ष्ये चले
मिथैव व्यसनं वदन्ति मृगयामीदृग् विनोदः कुतः’ ।

**अन्वयः –** मेदच्छेदकृशोदरं वपुः लघु उत्थानयोग्यं भवति । सत्त्वानामपि भयक्रोधयोः विकृतिमच्चित्तं लक्ष्यते, धन्विनां स च उत्कषः, यत् चले लक्ष्ये इषवः सिध्यन्ति । मृगयां मिथ्या व्यसनं वदन्ति । ईदृक् विनोदः कुतः ?

**अर्थः –** अत्र श्लोके पुनः मृगयायाः गुणत्वं प्रतिपादयन् सेनापतिः राजानं कथयति हे राजन् ! मृगयाकरणेन शरीरस्य मेदह्रासः भवति, येन शरीरं सहजचलनक्षमं भवति । मृगयासमये मृगादिपशूनां भयक्रोधजातः मानसिकविकारः द्रष्टुं शक्यते । यदि धावमाने मृगे कस्यचित् धनुर्धारिणः शरः बिद्धः भवति तर्हि तत्र धनुर्धारिणः उत्कर्षः प्रकाशितः भवति । अतः मृगया केवलं व्यसनमिति ये कथयन्ति ते मिथ्या वदन्ति । मृगयासमये यः विनोदः लक्ष्यते तादृशः विनोदः अन्यत्र न लभ्यते । अत्र मृगयायाः गुणत्वं पुनः सेनापतिः प्रकाशयति । अस्मिन् पद्ये काव्यलिङ्गमलङ्कारः ।

इतः परं मृगयां प्रशंसन्तं सेनापतिं विदूषकः तिरस्करोति । विदूषकस्य तिरस्कारं कालिदासः एकेन गद्यखण्डेन प्रकाशयति । यथा -

विदूषकः - (सरोषम्) ‘अपेहि रे उत्साहहेतुक ! अत्र भवान् प्रकृतिमापन्नः, त्वं तावदटवीतोऽटवीमाहिण्ड्यमानः नरनासिकालोलुपस्य जीर्णऋक्षस्य कस्यापि मुखे पतिष्यसि ।’

## ग. मृगयातः दुष्यन्तस्य विरतिः -

इतः परं राजा दुष्यन्तः सेनापतिं कथयति, ‘भद्र सेनापते ! आश्रमसंनिकृष्टे स्थिताः स्मः । अतस्ते वचोनाभिनन्दामि ।

‘गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु ।
विश्रब्धं क्रियतां वराहततिभिः मुस्ताक्षतिः पल्वले
विश्रामं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः’ ॥

**अन्वयः –** महिषाः शृङ्गैः मुहुः ताडितं निपानसलिलं गाहन्ताम् । छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु । वराहततिभिः विश्रब्धं पल्वले मुस्ताक्षतिः क्रियताम् । इदम् अस्मद्धनुः च शिथिलज्याबन्धं विश्रामं लभताम् ।

**अर्थः –** मृगयार्थं सेनापतिवचनम् अश्रद्दधानः राजा दुष्यन्तः कथयति हे सेनापते ! अहम् इदानीं मृगयां कर्तुं नोत्सहे । अतः निर्भयेन वन्यमहिषाः शृङ्गैः मुहुः ताडितजलाशयजलाः अवगाहनं कुर्वन्तु । वृक्षच्छायायां एकत्रिताः सन्तः मृगाःरोमन्थनं कुर्वन्तु, अर्थात् पूर्वभक्षितघासस्य पुनः चर्वणं कुर्वन्तु ।

वराहसमूहाः विश्रब्धं यथा स्यात् तथा अल्पजलयुक्ते पङ्किले तड़ागे मुस्ता-उत्पाटनं कुर्वन्तु । अपि च मम इदं धनुः शिथिलगुणयुक्तं सत् विश्रामं करोतु । मृगयाशून्यकाले धनुषि गुणः नारोप्यते । अतः तदानीं धनुः शिथिलगुणयुक्तं भवति । अत्र स्वभावोक्तिरलङ्कारः ।

इतः परं राजा परिजनानुद्दिश्य कथयति भवन्तो मृगयावेशमपनयन्तु । ततः सर्वे परिजनादयः प्रस्थिताः ।

## घ. विदूषकनिकटे दुष्यन्तस्य शकुन्तलानुरागवर्ण्णनम् -

विदूषकः राजानं कथयति, राजन् ! अधुना त्वया निर्मक्षिकं (मक्षिकाणामभावः, जनशून्यमित्यर्थः) कृतम् । सांप्रतमेतस्यां पादपच्छायायां विरचितलतावितानदर्शनीयायामासने निषीदतु भवान्, यावदहमपि सुखासीनो भवामि । ततः एकान्ते पादपशीतलच्छायायुक्ते स्थाने वसन् राजा विदूषकं कथयति - माधव्य त्वम् अनाप्तचक्षुःफलोऽसि । येन त्वया दर्शनीयं न दृष्टम् ।'

विदूषकः - ननु भवानग्रतो मे वर्तते' । राजा शकुन्तलासौन्दर्यमधिकृत्य विदूषकं कथयति ।

सुरयुवतिसम्भवं किल मुनेरपत्यं तदुज्झिताधिगतम् ।
अर्कस्योपरि शिथिलं च्युतमिव नवमालिकाकुसुमम् ॥

**अन्वयः** - अर्कस्योपरि च्युतं शिथिलं नवमालिकाकुसुमम् इव सुरयुवतिसम्भवं तत् उज्झिताधिगतं मुनेः अपत्यं किल ।

**अर्थः** - शकुन्तला सौन्दर्यविषये राजा विदूषकं कथयति, मित्र ! इयं शकुन्तला नवमालिकाकुसुमतुल्या भवति । यथा नवमालिकाकुसुमं दैवात् वृन्तच्युतं सत् रक्तमन्दारवृक्षे पतितं कथमपि आत्मानं रक्षति, तथा इयं सुन्दरी कोमलाङ्गी शकुन्तला मेनकागर्भोत्पन्ना, तया परित्यक्ता च सती मुनिना कण्वेन पालिता तिष्ठति । अत्रोपमालङ्कारः ।

इतःपरं राज्ञः शकुन्तलासक्तित्वं ज्ञात्वा विदूषकः उपहस्य कथयति, राजन् ! यथा कस्यापि पिण्डखर्जुरैरुद्वेजितस्य तिन्त्रिण्यामभिलाषोभवेत् तथा स्त्रीरत्नपरिभाविनो भवतः इयमभ्यर्थना ।

राजा कथयति - न तावदेनां पश्यसि येन एवमवादीः । ततः परं राजा श्लोकद्वयेन शकुन्तलासौन्दर्यं वर्णयति । यथा -

चित्रे निवेश्य परिकल्पितसत्त्वयोगा रूपोच्चयेन मनसा विधिना कृता नु ।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः' ।

**अन्वयः** - धातुः विभुत्वं तस्याः वपुश्च अनुचिन्त्य मे सा विधिना चित्रे निवेश्य परिकल्पितसत्त्वयोगा, मनसा नु रूपोच्चयेन कृता अपरा स्त्रीरत्नसृष्टिः इति प्रतिभाति ।

**अर्थः** - अत्र शकुन्तलायाः सौन्दर्यं विदूषकपुरस्तात् वर्णयन् दुष्यन्तः प्रकाशयति यत् सखे ! माधव्य (विदूषकस्य नाम) शकुन्तला इयती रूपवती यत् अहं चिन्तयामि ब्रह्मा प्रथमतया रूपं मनसा परिकल्प्य चित्रे निवेशितवान् । ततः तत्र जीवन्यासप्रदानपूर्वकम् अद्वितीयस्त्रीरत्नं सृष्टवान् । अत्र शकुन्तलाया अप्रतिमं सौन्दर्यं कालिदासः दुष्यन्तमुखेन प्रकाशयति ।

इतः परम् अपरेण श्लोकेन एकेन पुनः कालिदासः दुष्यन्तमुखेन शकुन्तलायाः सौन्दर्यं प्रकाशयति। तद् यथा -

'अनाघ्रातं पुष्पं किसलयमलूनं कररुहै -
रनाबिद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः।'

**अन्वयः** – अनघं तत् रूपम् अनाघ्रातं पुष्पम्, कररुहैः अलूनं किसलयम्। अनाबिद्धं रत्नम्, अनास्वादितं नवं मधु। अखण्डं च पुण्यानां फलमिव (अस्ति)। विधिः कं भोक्तारं समुपस्थास्यति इति अहं न जाने।

**अर्थः** – अस्मिन् श्लोके शकुन्तलायाः स्वर्गीयसौन्दर्यं वर्णयन् दुष्यन्तः कथयति, सखे ! शकुन्तलायाः रूपम् अनाघ्रातकुसुममिव। नखैः अच्छिन्नं किसलयमिव। सूचीबिद्धरहितरत्नमिव। रसनया आस्वादरहितरसं मधु इव। अपि च अखण्डसुकृतानां फलमिव विभाति। कथनस्य तात्पर्यमिदं यत् यथा लतायां सद्योविकसितं केनापि न आघ्रातं कुसुमं शोभते, नूतनपत्रं नखैः अच्छिन्नं यथा शोभते, रत्नमपि सूच्यादिना अबिद्धं सत् यथा उज्ज्वलं विभाति, अपि च अखण्डपुण्यफलं यथा देदीप्यते तथा अस्याः शकुन्तलायाः रूपमपि शोभते। अस्यां परिस्थितौ एतादृशस्य रूपस्य कः उपभोक्ता विधिना परिकल्पितः अस्ति तदहं न जाने। अर्थात् स एव महान् पुण्यवान् जनः यः एतादृशरूपवतीं शकुन्तलामुपभोक्षति। अत्र मालोपमा अलङ्कारः।

इतः परं श्लोकद्वयेन कविः दुष्यन्तं प्रति शकुन्तलायाः अनुरागं वर्णयति। तथाहि

'अभिमुखे मयि संहृतमीक्षणं हसितमन्यनिमित्तकृतोदयम्।
विनयवारितवृत्तिरतस्तया न विवृतो मदनो न च संवृतः'।

**अन्वयः** – मयि अभिमुखे सति ईक्षणं संहृतम्, अन्यनिमित्तं कृतोदयं हसितम्। अतः तया विनयवारितवृत्तिः मदनः न विवृतः न च संवृतः'।

**अर्थः** – नूतनतारुण्यविभूषिता शकुन्तला यदा नूतनतया मदनाक्रान्ता भवति तदा सा कथमनुरागं प्रकटयन्ती व्यवहरति तत् दुष्यन्तमुखेन कविः प्रकाशयति। दुष्यन्तः कथयति, सखे यदा अहं तस्याः मुखं पश्यामि तदा सा मम मुखात् निजमुखं परावृत्य अन्यत्र दृष्टिपातं करोति। अन्यत् किञ्चित् कारणमुपलक्ष्य सा हसति।

वस्तुतः मामुद्दिश्य सा हसति, परन्तु अन्यनिमित्तं सा हसतीति दर्शयति। यद्यपि तारुण्यवशात् तस्याः मदनः उद्वृत्तः भवति, तथापि सा विनयेन मदनं दमयति। येन मदनः स्पष्टतया न दमितः भवति अथवा न प्रकाशितः भवति। नूतनयौवनेन उद्भासितानां प्रथमतया कामाकुलानामवलानां प्रायशः सर्वासाम् एतादृशी अवस्था जायते। अत्र उपवने प्रथमतया युवकं राजानं दुष्यन्तमबलोक्य शकुन्तलायाः जायमानाम् अवस्थां वर्णयति कविः। पुनः अन्येन श्लोकेन शकुन्तलायाः दुष्यन्तं प्रति अनुरागं वर्णयति कविः।

तथा हि -

'दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे तन्वी स्थिता कतिचिदेव पदानि गत्वा
आसीद् विवृत्तवदना च विमोचयन्ती शाखासु वल्कलमसक्तमपि द्रुमाणाम्' ।

**अन्वयः –** कतिचित् एव पदानि गत्वा तन्वी अकाण्डे दर्भाङ्कुरेण चरणः क्षतः इति स्थिता । द्रुमाणां शाखासु च असक्तमपि वल्कलं विमोचयन्ती विवृत्तवदना आसीत् ।

**अर्थः –** दुष्यन्तः शकुन्तलायाः अनुरागिणीत्वं प्रकाशयन् कथयति, तन्वी (कृशतनुः) सा शकुन्तला कतिचित् पदानि गत्वा अकाण्डे (असमये) कुशाग्रेण पदं क्षतं जातमिति व्याजेन मां (दुष्यन्तम्) बिलोकयितुं अग्रे न गत्वा तिष्ठति । पुनश्च कथमपि चलितुमुपक्रान्ता सा कियद्दूरं गत्वा वृक्षशाखासु अलग्नमपि परिहितवल्कलं मोचयितुमभिनयन्तीव आसीत् । अर्थात् ममाबलोकने इच्छुका सती चरणः कुशाङ्कुरेण क्षतः, अपि च वल्कलं वृक्षशाखासु लग्नम् इति व्याजमनुसृत्य पश्चादबलोकयति । येन सा मां पुनः पुनः द्रष्टुं शक्नुयात् । अत्र विरोधाभासः अलङ्कारः । एतेन शकुन्तलायाः दुष्यन्तं प्रति अनुरागः प्रदर्शितः ।

राजधानीं प्रति गन्तुं मातुः आह्वानम् उपलभ्य दुष्यन्तः चिन्तयति, यथा -

'कृत्यानां भिन्नदेशत्वात् द्वैधीभवति मे मनः ।
पुरः प्रतिहतं शैले स्रोतः सोतोवहो यथा' ।

**अन्वयः –** कृत्ययोः भिन्नदेशत्वात् मे मनः पुरःशैले प्रतिहतं स्रोतोवहः स्रोतः यथा द्वैधीभवति ।

**अर्थः –** शकुन्तलायाः दुष्यन्तं प्रति अनुरागप्रकाशवर्णनानन्तरम् आश्रमे रक्षसामुपद्रवं निवारयितुम् ऋषीणां पक्षतः निमन्त्रणं यदा दुष्यन्तः प्राप्तवान्, तस्मिन् समये राजधानीतः मातुः उपवासव्रतसमापनोत्सवे योगं प्रदातुं मातुरादेशोऽपि तेन लब्धः । अतः एकस्मिन् समये द्वयोः कार्ययोः भिन्नभिन्न स्थानसाधनयोग्ययोः कृते दुष्यन्तस्य मनः व्याकुलितम् । यथा अग्रे विद्यमाने पर्वते द्रुतं प्रवहन्ती नदी वाधिता सती द्वैधीभवति तथा कुत्र किं कार्यं करिष्यतीति दुष्यन्तस्य मनः द्वैधीभावापन्नं जातम् । अत्र उपमालङ्कारः ।

ततः राजा शकुन्तलाप्रणयासक्तः आश्रमे राक्षसनिवारणकर्मणि लग्नः भवितुमभिललाष । सः विदूषकं स्वप्रतिनिधिरूपेण मातुः उपवाससमाप्तिकर्मणि योगं दातुं राजधानीं प्रेषितवान् । कदाचित् सः चापल्यवशात् अन्तःपुरे राज्ञीणां निकटे शकुन्तलाविषयं प्रकाशयेत् इति विभीय राजा विदूषकं 'शकुन्तलाविषयकः वृत्तान्तः मिथ्या' इति कथयति श्लोकेन । तथाहि -

'क्व वयं क्व परोक्षमन्मथो मृगशावैः सममेधितो जनः
परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः' ।

**अन्वयः –** सखे ! वयं क्व मृगशावैः समम् एधितः परोक्षमन्मथः जनः क्व । मया यत् शकुन्तलाविषयकं तथ्यम् उक्तं तत् परिहासविजल्पितम् । परमार्थेन तद् वचः न गृह्यताम् ।

**अर्थः –** अथ दुष्यन्तः विदूषकं प्रति कथयति, हे सखे ! वयं क्व ? अर्थात् अस्मादृशाः सर्वगुणयुक्ताः राजानः क्व ? मृगशिशुभिः सह वर्धमानः कामभावानभिज्ञः (परोक्षमन्मथः) शकुन्तलारूपी जनः क्व ? पूर्वं मया तद् विषये यत् कथितं तत् सर्वं परिहासेन उक्तम् । सत्यकथात्वेन तत् सर्वं न ग्रहणीयम् ।

अत्र आशयः अयं यत्, यथा राजा कामकेलीषु अभिज्ञः तथा इयं तपोवने पालिता शकुन्तला न भवति । संसारवैराग्यादिगुणाः तपस्विनां सुलभाः । अतः दुष्यन्तेन सह शकुन्तलायाः प्रेम न सम्भवेत् । पूर्वमेतस्मिन् विषये राजा विदूषकं यदुक्तवान् तत् सर्वं परिहासजल्पनमासीत् इति राजा कथयति । अस्मिन् श्लोके विषमः अलङ्कारः ।

अनेन प्रकारेण द्वितीयाङ्कस्य कथावस्तु क्रमिकतया प्रकाशितम् ।

## ३. बोधप्रश्नाः –

१. अभिज्ञानशाकुन्तलस्य मङ्गलाचरणपद्यं व्याख्यात ।

२. का नाम प्रस्तावना । तल्लक्षणं भेदान् च प्रतिपाद्य अभिज्ञानशाकुन्तले तां विचारयत् ।

३. शकुन्तलायाः सौन्दर्यं वर्णयत ।

४. दुष्यन्ते शकुन्तलायाः अनुरागः कथं ज्ञायते ।

५. मृगयायाः गुणत्वं सेनापतिः केन प्रकारेण प्रकाशयति ।

६. शकुन्तलायाः जन्मवृत्तान्तं प्रकाशयत ।

# चतुर्थभागः ( Unit - IV)

**अस्मिन् विभागे अधोलिखिताः विषयाः आलोचिताः सन्ति। १- तृतीयाङ्कस्य विषयक्रमः- क) विष्कम्भकमाध्यमेन पूर्वापरविषययोजनम्, ख) मालिनीतटकुञ्जे विरहिण्याः शकुन्तलायाः अवस्थानम्, ग) विरहिण्याः शकुन्तलायाः अवस्थादर्शनम्, घ) लतागृहे सखीनिकटे शकुन्तलायाः मनोभावप्रकाशनम्, ङ) दुष्यन्तं प्रति शकुन्तलायाःप्रेमपत्रलिखनम्, च) लतागृहे दुष्यन्तशकुन्तलयोः मिलनम्, छ) लतागृहं प्रति गौतम्याः आगमनम्,**

**२. चतुर्थाङ्कस्य विषयक्रमः - क) शकुन्तलाकृते दुर्वाससः अभिशापः, ख) प्रभातवर्णनम्, ग) कण्वस्य शकुन्तलायाः गर्भवतीत्वज्ञानम्, स्वामिगृहप्रेरणानुमतञ्च, घ) शकुन्तलाकृते पादपादीनां वस्त्राभूषणप्रदानम्, ङ. शकुन्तलाकृते कण्वस्य आशीर्वादः, च. शकुन्तलायाः पतिगृहगमनेन पशुलतादीनाम् अवस्था, छ) शकुन्तलाकृते कण्वस्य उपदेशप्रदानम्, पतिगृहप्रेरणञ्च।**

**३. बोधप्रश्नाः।**

---

## १. तृतीयाङ्कस्य विषयक्रमः -

## क. विष्कम्भकमाध्यमेन पूर्वापरविषययोजनम् -

तृतीयाङ्कस्य प्रारम्भे शुद्धविष्मम्भकः वर्तते। विष्कम्भकः, प्रवेशकः चूलिका, अङ्कावतारः, अङ्कमुखम् इति पञ्च-अर्थोपक्षेपकेषु विष्कम्भकः अन्यतमः। विशेषेण स्कम्भ्नाति पूर्वापरविषयं योजयतीति विष्कम्भकः, अस्य लक्षणं यथा दर्पणे - वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।
संक्षिप्तार्थस्तु विष्कम्भः आदावङ्कस्य दर्शितः॥

नाटके पूर्वापरघटनाचक्रस्य संयोगि कथावस्तु विष्कम्भकः इत्युच्यते। शुद्धसंकीर्णभेदेन विष्कम्भकः द्विविधः। यत्र विष्कम्भके मध्यमपात्रं किम्बा मध्यमपात्रद्वयमालपति तत्र शुद्धविष्कम्भकः, यत्र नीचमध्यमपात्रद्वयमालपति तत्र संकीर्णविष्कम्भकः भवति। अत्र प्रयुक्तः विष्कम्भकः शुद्धः अस्ति। अस्मिन् विष्कम्भके राज्ञा दुष्यन्तेन रक्षः कर्तृकविघ्नानां निराकरणरूपः अतीतवृत्तान्तः, शकुन्तलायाः कामवाधाजनितावस्थायाः भाविवृत्तान्तश्च इति अनयोः सूचना मध्यमपात्रेण शिष्येण च प्रदत्तास्ति।

## ख. मालिनीतटकुञ्जे शकुन्तलायाः अवस्थानम् -

राजाऽपि शकुन्तला विरहेण खिन्नमानसः भवति। सः आश्रमे इतस्ततः भ्रमन् शकुन्तलामन्विष्यति। मध्याह्नसमये राजा सूर्य्यातपस्य तीव्रतामनुभूय कथयति - 'इमामुग्रातपवेलां प्रायेण लताबलयवत्सु मालिनीतीरेषु सखीजना शकुन्तला गमयति। अहो प्रवातसुभगोऽयमुद्देशः। तथाहि -

शक्योऽरविन्दसुरभिः कणबाही मालिनीतरङ्गाणाम् ।
अङ्गैरनङ्गतप्तैरविरलमालिङ्गितुं पवनः ।

**अन्वयः –** अनङ्गतप्तैरङ्गैः अरविन्दसुरभिः मालिनीतरङ्गाणां कणवाही पवनः अविरलम् आलिङ्गितुं शक्यः ।

**अर्थः –** यज्ञकार्यसमाप्त्यनन्तरं शकुन्तलाविरही दुष्यन्तः तामन्विष्य मालिनीनदीतीरमागतः । तत्र नदीजले विकसितानाम् अरविन्दानां सौरभेण मालिनीतरङ्गसंपर्कितः पवनः सुरभितः भवति । दुष्यन्तः चिन्तयति, अहमपि कामपीडिताङ्गप्रत्यङ्गैः अमुं पवनमालिङ्गामि, येन मे कामवाधा किञ्चित् न्यूना भवेत् । ततः सः लताकुञ्जद्वारे स्त्रीणां पदचिह्नं पश्यति ।

'अभ्युन्नता पुरस्तादवगाढा जघनगौरवात् पश्चात्
द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा ।'

**अन्वयः –** अस्य पाण्डुसिकते द्वारे पुरस्तात् अभ्युन्नता जघनगौरवात् पश्चात् अवगाढा अभिनवा पदपङ्क्तिः दृश्यते ।

**अर्थः –** विरही दुष्यन्तः शकुन्तलामन्विष्य मालिनीतीरमागतः । तीरप्रदेशे एकस्मिन् वेतसलतापरिवेष्टिते मण्डपे शकुन्तला तिष्ठेदिति सम्भाव्य लतामण्डपस्य द्वारसमीपं सः आगतः लतामण्डपस्य द्वारदेशे सः कानिचन पदचिह्नानि अपश्यत् । तानि पदचिह्नानि कीदृंशि इति अत्र श्लोके कविः वर्णयति । पदचिह्नानाम् अग्रभागः अभ्युन्नतः (उन्नतः) पश्चाद्भागः जघनगौरवात् किञ्चित् निम्नः (अवगाढः) दृश्यते । अतः तर्कयितुं शकयते यत् गाढयौवनालिङ्गिताः तरुण्यः लतामण्डपं प्रविशेयुरिति । वस्तुतः नितम्बभाराक्रान्ताः तरुण्यः यदा गच्छन्ति तदा तासां नितम्बभारेण पदस्य पश्चाद् भागः कोमलभूमौ गभीरं क्षतं सृजति । नदीतीरे बालुकाराशौ तरुणीनां शकुन्तलादीनामपि गमनेन एवं पदचिह्नानि दुष्यन्तः दुष्टवान् ।

अत्र पदचिह्नैः शकुन्तला लतामण्डपे भवेदिति अनुमानात् अनुमानः अलङ्कारः भवति ।

## ग. विरहिण्याः शकुन्तलायाः अवस्थादर्शनम् –

ततः राजा विटपान्तरेणान्तरितः सन् सखीभ्यां सेवितां शकुन्तलां पश्यन् कथयति - बलवदस्वस्थशरीरा शकुन्तला दृश्यते । (सवितर्कम्) किमयमातपदोषः स्यात् उत यथा मे मनसि वर्तते । (साभिलाषं निर्वर्ण्य) अथवा कृतं सन्देहेन ।

'स्तनन्यस्तोशीरं शिथिलितमृणालैकवलयं
प्रियायाः सावाधं किमपि कमनीयं वपुरिदम् ।
समस्तापं कामं मनसिजनिदाघप्रसरयो -
र्न तु ग्रीष्मस्यैवं सुभगमपराद्धं युवतिषु' ।

**अन्वयः –** प्रियायाः स्तनन्यस्तोशीरं शिथिलितमृणालैकबलयं सावाधमिदं वपुः किमपि कमनीयं (दृश्यते । युवतिषु मनसिजनिदाघप्रसरयोः तापः समः कामम्, तु ग्रीष्मस्य अपराद्धमेवं सुभगं न ।

**अर्थः –** विटपान्तरितः राजा पीडितां सखीसेवितां मालिनीतीरे लतामण्डपे स्थितां शकुन्तलां पश्यति। अत्र श्लोके पीडितां शकुन्तलां वीक्ष्य राज्ञः मनोभावं कविः वर्णयति। राजा पश्यति, शकुन्तलायाः स्तनयोः उपरि उशीरं न्यस्तमस्ति। शरीरदौर्वल्यात् शरीरे मृणालबलयं शिथिलितमस्ति। पीडायुक्तमिदं प्रियायाः शरीरमत्यन्तं कमनीयमस्ति। यद्यपि ग्रीष्मतापबलात् कन्दर्पतापबलाच्च शरीरे जायमाना वाधा समाना, तथापि युवतिजनेषु ग्रीष्मजनितवाधा एतादृशी सुलभा न भवति, अर्थात् शकुन्तलायाः इयं पीडा कामजन्या नूनं भवेत्।

ततः लतामण्डपे शकुन्तलायाः दुरवस्थामालक्ष्य प्रियम्बदा अनसूयां कथयति, ‘ अनसूये ! तस्य राजर्षेः प्रथमदर्शनादारभ्य पर्युत्सुकेव शकुन्तला। किं न खलु अस्यास्तन्निमित्तोयमातङ्को भवेत्’। ततः उभे शकुन्तलां दुरवस्थायाः कारणं पृच्छतः। ततः शकुन्तलायाः अवस्थां कविः वर्णयति श्लोकेन।

क्षामक्षामकपोलमाननमुरः काठिन्यमुक्तं स्तनं
मध्यःक्लान्ततरः प्रकामविनतावंसौ छविः पाण्डुरा
शोच्या च प्रियदर्शना च मदनक्लिष्टेयमालक्ष्यते
पत्राणामिव शोषणेन मरुता स्पृष्टा लता माधवी’।

**अन्वयः –** आननं क्षामक्षामकपोलम्। उरः काठिन्यमुक्तस्तनम्। मध्यः क्लान्ततरः। अंसौ प्रकामविनतौ। छविः पाण्डुरा। इयं मदनक्लिष्टा पत्राणां शोषणेन मरुता स्पृष्टा माधवीलतेव शोच्या च प्रियदर्शना च लक्ष्यते।

**अर्थः –** विरहावस्थायां स्थितायाः शकुन्तलायाः आननम् अतिशयेन क्षीणं भवति। वक्षःस्थलं काठिन्यरहितस्तनमस्ति। शरीरस्य मध्यभागः अत्यधिकः क्लान्तः भवति। स्कन्धप्रदेशः यथेष्टमानतः। तस्याः शरीरस्य कान्तिरपि पाण्डुरवर्णा भवति। अतएव कन्दर्पपीडिता इयं शकुन्तला पत्रशुष्ककारिणा उत्तप्तपवनेन स्पृष्टा माधवीलता इव शोचनीया दर्शनीया च दृश्यते, अर्थात् यथा कोमला माधवीलता उत्तप्तपवनसंपर्केण क्लिष्टा भवन्त्यपि पूर्वसौन्दर्यबलेन दर्शनीया भवति तथा इयं शकुन्तलाऽपि कामजन्यतापेन पीडिता दर्शनीया चास्ति। अत्र उपमालङ्कारः, शोच्या प्रियदर्शना च इति स्थले विरोधाभासः च।

## घ. लतागृहे सखीनिकटे शकुन्तलायाः मनोभावप्रकाशनम् –

ततः सखीद्वयस्य कृते स्व दुरवस्थायाः कारणं वक्तुकामा शकुन्तला प्रकाशयति, यतः प्रभृति मम दर्शनपथमागतः सः तपोधनरक्षितः राजर्षिः (किञ्चित् लज्जिता) तत आरभ्य तद्गतेनाभिलाषेण एतदवस्थास्मि संवृत्ता। तद्यदि वाम् अनुमतं तदा तथा क्रियतां यथा तस्य राजर्षेरनुकम्पनीया भवामि। अन्यथा अवश्यं सिञ्चतं मे तिलोदकम्।

ततः प्रियम्बदा कथयति, सखि ! दिष्ट्या अनुरूपस्तेऽभिनिवेशः। सागरमुज्झित्वा कुत्र वा महानदी अवतरति ? कः इदानीं सहकारमन्तरेण अतिमुक्तकलतां पल्लवितां सहते ? एतेन सखीद्वयस्य समर्थनं शकुन्तलां प्रति वर्तते इति ज्ञायते।

ततः परं दुष्यन्तेन सह शकुन्तलायाः मिलनं कथं भवेदिति सखी चिन्तयति । ततः प्रियम्बदा कथयति, शकुन्तला प्रेमपत्रं लिखतु । अहं पत्रमिदं पुष्पमध्ये संस्थाप्य देवताप्रसादव्याजेन दुष्यन्तनिकटं प्रापयिष्यामि । एतत् श्रुत्वा शकुन्तला कथयति, अहं पत्रस्थविषयं चिन्तयामि, परन्तु कदाचित् राजा एतत् अवधीरयेत् इत्यपि भावयामि । राजा एतत् श्रुत्वा स्वयं लतामण्डपस्य बहिः चिन्तयति -

'अयं स ते तिष्ठति सङ्गमोत्सुको विशङ्कसे भीरु ! यतोऽवधीरणाम् ।
लभेत वा प्रार्थयिता न वा श्रियं श्रिया दुरापः कथमीप्सितो भवेत्' ।

**अन्वयः –** हे भीरु ! यतः अवधीरणां विशङ्कसे सः अयं ते सङ्गमोत्सुकः (जनः) तिष्ठति । प्रार्थयिता श्रियं लभेत वा न वा, श्रिया ईप्सितः कथं दुरापः भवेत् ।

**अर्थः –** राजा शकुन्तलायाः शङ्काववचनं निशम्य स्वयं लतामण्डपबहिर्भागे चिन्तयति - हे भीरु ! शकुन्तले ! यस्मात् दुष्यन्तात् त्वम् अवधीरणां (अपमानम्) शंकसे, सः एव साक्षात् तव सङ्गमोत्सुकः सन् तव निकटे उपस्थितः अस्ति । कदाचित् प्रार्थी धनं प्राप्नुयात् वा न इति सन्देहः जायते, परन्तु धनं यदि इच्छति कस्यचित् याचकस्य निकटं गन्तुं तर्हि तत्र असम्भवः नास्ति, अर्थात् नूनं धनं याचकमाप्नुयात् ।

अत्र प्रार्थी दुष्यन्तः भवति । श्रीः (धनम्) शकुन्तला भवति । कदाचित् शकुन्तलां प्राप्तुं दुष्यन्तस्य प्रार्थना विफला भवेत्, परन्तु दुष्यन्तं प्राप्तुं शकुन्तला कदाचित् विफला न भवेत् । तस्याः कृते दुष्यन्तः सर्वदा सुलभः इति भावः । अत्रार्थान्तरन्यासालङ्कारः ।

## ङ. दुष्यन्तं प्रति शकुन्तलायाः प्रेमपत्रलिखनम् -

ततः शकुन्तला प्रेमपत्रं लिखित्वा सखीनिकटे वाचयति, यथा -

'तव न जाने हृदयं मम पुनः कामो दिवापि रात्रावपि
निर्घृण ! तपति बलीयस्त्वयि वृत्तमनोरथाया अङ्गानि' ।

**अन्वयः –** हे निर्घृण ! तव हृदयं न जाने, त्वयि वृत्तमनोरथायाः मम अङ्गानि कामः दिवाऽपि रात्रावपि च बलीयः तपति ।

**अर्थः –** शकुन्तलायाः प्रेमपत्रविषयः अस्मिन् श्लोके वर्तते । शकुन्तला नलिनीपत्रे स्वनखमाध्यमेन लिखति, हे निर्दय दुष्यन्त ! अहं तव हृदयं न जानामि । तव मनसि मां प्रति कीदृशः भावः अस्तीति अहं न जानामि । त्वयि मम मनः संलग्नमस्ति । कामदेवः त्वयि न्यस्तहृदयां मां रात्रौ दिवसेऽपि च अत्यन्तं पीडयति । कामवाधया ममाङ्गानि प्रज्वलन्तीत्यर्थः ।

## च. लतागृहे दुष्यन्तशकुन्तलयोः मिलनम् -

लतामण्डपबहिर्भागे स्थितः राजा यदा शकुन्तलाप्रेमपत्रस्य विषयवस्तु साक्षात् तन्मुखात् श्रुणोति तदा सहर्षमुपसृत्य कथयति -

'तपति तनुगात्रि ! मदनस्त्वामनिशं मां पुनर्दहत्यैव ।
ग्लपयति यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः' ।

**अन्वयः –** हे तनुगात्रि ! मदनः त्वाम् अनिशं तपति, मां पुनः दहति एव। दिवसः यथा शशाङ्कं ग्लपयति तथा कुमुद्वतीं न।

**अर्थः –** लतामण्डपे स्थितां शकुन्तलामुपसृत्य दुष्यन्तः कथयति, हे कृशशरीरे शकुन्तले ! त्वां कामः सर्वदा तपति, मां तु सः दहति एव। दिवसः यथा चन्द्रं पीडयति तथा कमलिनीं न पीडयति। अत्र तात्पर्यमिदं यत् दिवसः अवश्यं सूर्यतापेन कमलिनीं पीडयेत्, परन्तु तेन सा तथा पीडिता न भवति, यथा चन्द्रः पीडितः भवति। शकुन्तलापेक्षया दुष्यन्तः समधिकः कामपीडितः इति भावार्थः। अत्र दृष्टान्तः अलङ्कारः 'तनुगात्रि' पदे पुनरुक्तवदाभासश्च।

अनन्तरं राज्ञा सह आलापकाले अनसूया राजानमुद्दिश्य कथयति, बहुवल्लभाः राजानः श्रूयन्ते। यथा नौ प्रियसखी बन्धुजनशोचनीया न भवति तथा निर्वाहय। राजा एतत् श्रुत्वा वदति।

'परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य मे
समुद्ररसना चोर्वी सखी च युवयोरियम्'।

**अन्वयः –** परिग्रहबहुत्वेऽपि मे कुलस्य द्वे प्रतिष्ठे ! समुद्ररसना उर्वी च युवयोः इयं सखी च।

**अर्थः –** राजा स्वान्तःपुरे शकुन्तलायाः प्राधान्यं प्रतिजानीते। सखीद्वयस्य पुरस्तात् सः प्रकाशयति, यत् यद्यपि मम परिग्रहाः (स्त्रियः) अनेकाः सन्ति तथापि मम वंशस्य प्रतिष्ठाद्वयं नूनमहं रक्षिष्यामि। किं किं तत् प्रतिष्ठाद्वयमिति जिज्ञासायां राजा कथयति, एका तावत् आसमुद्रपृथिवी। अपरा इयं युवयोः सखी शकुन्तला च। अहमेतयोः मर्यादामवश्यं रक्षिष्यामि।

राज्ञः मुखात् एतत् वचनं श्रुत्वा सखीद्वयं निश्चिन्तं जातम्। ततः निर्जने लतामण्डपे दुष्यन्तसमीपे शकुन्तलां बिहाय मृगशिशुं तन्मातुः निकटे संयोजयाव इत्युक्त्वा अनसूया प्रियम्बदा च ततः निर्गते। सखीद्वयस्य निर्गमनेन शकुन्तला किञ्चित् उद्विग्ना अभवत्। ततः राजा शकुन्तलां शान्त्वयन् कथयति - अलमावेगेन। नन्वयमाराधयिता जनस्तव समीपे वर्तते। अपि च -

'किं शीतलैः क्लमविनोदिभिरार्द्रवातान्
संचारयामि नलिनीदलतालवृन्तैः।
अङ्के निधाय करभोरु ! यथा सुखं ते
संवाहयामि चरणावुत पद्मताम्रौ'।

**अन्वयः –** शीतलैः क्लमविनोदिभिः नलिनीदलतालवृन्तैः आर्द्रवातान् किं संचारयामि ? उत हे करभोरु ! ते पद्मताम्रौ चरणौ अङ्के निधाय यथासुखं संवाहयामि।

**अर्थः –** लतामण्डपे निर्जने एकाकिनीं शकुन्तलामाप्य राजा रिरंसुः जातः। सः प्रेम्णा शकुन्तलां कथयति, हे करभोरु ! त्वं तु पीडिता असि। अहं किं तव कृते पद्मपत्रव्यजनकेन व्यजनं करिष्यामि, अथवा तव पद्मपादद्वयमहं ममाङ्के निधाय संवाहयामि ? (मर्दयामि) येन केनापि व्याजेन तरुण्याः अङ्गस्पर्शः कामिनां मोदाय भवति। अत्र राजा कामी। सः शकुन्तलायाः अङ्गस्पर्शं कर्तुमिच्छति।

ततः शकुन्तलाऽपि 'न माननीयेष्वात्मानमपराधयिष्ये' इत्युक्त्वा गन्तुमिच्छति । राजा बलात् तां निर्वर्तयति । तत्र शकुन्तला कथयति - 'पौरव ! रक्ष विनयम्, मदनसंतप्तापि न खलु आत्मनः प्रभवामि । राजा उत्तरति - 'भीरु ! अलं गुरुजनभयेन । दृष्ट्वा ते विदितधर्मा तत्रभवान् नात्र दोषं ग्रहीष्यति कुलपतिः ।

अपि च - 'गान्धर्वेण विवाहेन बह्व्यो राजर्षिकन्यकाः
श्रूयन्ते परिणीतास्ताः पितृभिश्चाभिनन्दिताः' ।

**अन्वयः** - बह्व्यः राजर्षिकन्यकाः गान्धर्वेण विवाहेन परिणीताः, ताः पितृभिः अभिनन्दिताः च श्रूयन्ते ।

**अर्थः** - अत्र राजा शकुन्तलां गान्धर्वविवाहार्थं प्रचोदयति । राजा कथयति बह्व्यः राजर्षिकन्याः गान्धर्वविवाहेन परिणीताः, पितृभिश्चापि अनुमताः सन्ति । अतः त्वं यद्यपि पितुः अधीना, तथापि मया सह गान्धर्वविवाहं कर्तुमर्हसि । तव पिता अपि अनन्तरमावयो र्गान्धर्वविवाहं स्वीकरिष्यति । ततः शकुन्तलया सह दुष्यन्तः रहःक्रीडामारब्धवान् ।

## छ. लतागृहं प्रति गौतम्याः आगमनम् -

लतामण्डपे शकुन्तलया सह दुष्यन्तस्य रहःक्रीडासमये गौतमी पीडितां शकुन्तलां द्रष्टुं तत्रागता । एतत् सूचयितुं सखीद्वयं कथयति, चक्रवाकवधु, आमन्त्रयस्व सहचरम् । उपस्थिता रजनी (अत्र रजनी पदेन गौतमी बुध्यते) दुष्यन्तः विटपान्तरितः सन् आत्मानं गोपायति । ततः गौतमी शकुन्तलां लतामण्डपात् उटजं प्रति नयति । शकुन्तलागमनात् परं राजा लतामण्डपे पूर्वस्थानमागत्य शोचति -

'मुहुरङ्गुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम्
मुखमंसविवर्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्वितं नु' ।

**अन्वयः** - पक्ष्मलाक्षाः मुहुः अङ्गुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम् अंसविवर्ति मुखं कथमपि उन्नमितं न तु चुम्बितम्' नु ।

**अर्थः** - अत्र श्लोके शकुन्तलायाः मुखचुम्बने असमर्थस्य राज्ञः अनुतापः वर्णितः, राजा कथयति - यदा अहं शकुन्तलायाः अधरं चुम्बितुं चेष्टां कृतवान्, तदा सा तस्याः अङ्गुलिम् अधरोपरि स्थापितवती । येनाधरे चुम्बनं कर्तुं न शक्यते । न केवलमधरे अङ्गुलिस्थापनम् अपि च न न अधरं मम चुम्बतु इति प्रतिषेधाक्षरं बृवती सा तस्याः मुखमपि स्कन्धदेशं प्रति नीतवती । एवं पक्ष्मलाक्ष्याः मुखं मया कथमपि उन्नमितं न तु चुम्बितम् ।

अत्र शकुन्तलायाः अधरचुम्बने असफलस्य राज्ञः पश्चात्तापः पर्णितः अस्ति । अनन्तरं आश्रमे राक्षसानामुपस्थितिः सूचिता । राजा राक्षसोपस्थितिं निवारयितुं तस्मात् प्रस्थितः अनन्तरं तपस्विभिः विसर्जितः सः स्वनगरं गतः ।

## २. चतुर्थाङ्कस्य विषयक्रमः -

## क. शकुन्तलाकृते दुर्वाससः अभिशापः -

चतुर्थाङ्कस्य प्रारम्भे शुद्धविष्कम्भकेन शापवृत्तान्तः वर्णितः, विष्कम्भकविषये पूर्वस्मिन्नङ्के सूचना दत्तास्ति । विष्कम्भकः प्रवेशकश्च इति उभयोः भेदविषये षष्ठाङ्के धीवरवृत्तान्ते आलोचितमस्ति । प्रथमतः

सखीद्वयं पुष्पचयनं कुरुतः । उटजे शकुन्तला दुष्यन्तेन सह पूर्वाचरितवृत्तान्तस्य चिन्तन्ते मग्ना । अस्मिन् समये दुर्वासाः मुनिः आश्रममागतः । दुष्यन्तसन्निहितमनाः शकुन्तला एतत् ज्ञातुं न शशाक । अलवृधातिथिसत्कारः अपमानितः दुर्वासाः शकुन्तलाकृते अभिशापं ददाति, यथा -

'विचिन्तयन्ती यमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम् ।
स्मरिष्यति त्वां न स बोधितोऽपि सन् कथां प्रमत्तः प्रथमं कृतामिव' ।

**अन्वयः –** अनन्यमानसा त्वं यं विचिन्तयन्ती सती उपस्थितं तपोधनं मां न वेत्सि सः बोधितः सन् अपि त्वां प्रमत्तः प्रथमं कृतां कथामिव न स्मरिष्यति ।

**व्याख्या –** अत्र श्लोके कुपितः दुर्वासाः अभिशपति यत् हे शकुन्तले त्वम् अनन्यमानसा सती एकाग्रचित्तेन यस्य स्मरणं करोषि, येन मादृशमपि तपोधनम् अत्र आश्रमे समुपस्थितं न जानासि, सः त्वां कदाचन न स्मरिष्यति । बलवता प्रयत्नेन सः बोधितः अपि भवतु, तथापि त्वां सः न ज्ञास्यति । यथा कश्चित् उन्मत्तः जनः पूर्वं किं कथितवान् तन्न स्मरति तथा तव चिन्ताविषये स्थितः जनः त्वां न स्मरिष्यति ।

दुष्यन्तविषये चिन्तामग्ना शकुन्तला इमं शापवृत्तान्तं ज्ञातुं नापारयत् । परन्तु उद्याने पुष्पचयनरता अनसूया प्रियम्बदा च एतत् ज्ञातवती । अतः ते प्रकृतिकुपितस्य मुनेः पदयोः पतित्वा यथा सत्कारेण तं किञ्चित् न्यूनकोपं कृतवत्यौ । मुनिः किञ्चित् संतुष्टः सन् उक्तवान् यत् मम वचनं कदापि अन्यथा न भवेत्, तथापि किञ्चित् अभिज्ञानाभरणदर्शनेन शापः निवर्तिष्यते इति । अयं शापवृत्तान्तः अत्र शुद्धविष्कम्भकद्वारा प्रदर्शितः अस्ति ।

## ख. प्रभातवर्ण्णनम् -

अनन्तरं सुप्तोत्थितः शिष्यः प्रविशति । तन्मुखेन प्रभातवर्णना कविना कृता वर्तते । यथा -

'यात्यैकतोऽस्तशिखरं पतिरोषधीनाम्
आविष्कृतोऽरुणपुरःसर एकतोऽर्कः ।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवात्मदशान्तरेषु' ।

**अन्वयः –** ओषधीनां पतिः एकतः अस्तशिखरं याति, एकतः अरुणपुरःसरः अर्कः आविष्कृतः । तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां लोकः आत्मदशान्तरेषु नियम्यते इव ।

**अर्थः –** प्रातःकाले शिष्यः विमुक्तनिद्रः सन् कुटीराद्बहिरागत्य पश्यति, यत् एकस्मिन् पार्श्वे (पश्चिमायां दिशि) चन्द्रः अस्तमेति । पूर्वस्यां दिशि अरुणं सारथिरूपेण पुरस्कृत्य सूर्यः उदेति । अथ एकस्य तेजसः उदयकाले अन्यस्य तेजसः अस्तः भवति । अत एव एकस्मिन् समये उभयोः तेजसोः अवस्थां दृष्ट्वा संसारे सर्वे लोकाः नियन्तिताः भवन्ति । रात्रौ उन्नतः चन्द्रः प्रभाते नश्यति, अपि च रात्रौ तेजःशून्यः अदृश्यः सूर्यः प्रभाते उदेति । तथा अधुना अत्यारूढिः कश्चित् जनः अपि श्वः नश्येत् । अदृश्यमानः कोऽपि जनः उन्नतिपथे श्वः विलसेत्, इति ।

पुनः प्रभातं वर्णयन् शिष्यः कथयति, चन्द्रे अन्तर्हिते सति कुमुदिनी नेत्रानन्दं न जनयति। चन्द्रस्यावर्तमानत्वात् सा मलिना भवति। अतः दर्शकानां नेत्रानन्दं न जनयति। अत्रार्थान्तरन्यासालङ्कारद्वारा कविः एतत् समर्थयन् कथयति, प्रियस्य प्रवासगामित्वात् यथा अबलानां दुःखं दुःसहं भवति, तथा चन्द्रस्याभावे कुमुदिन्या अवस्था भवति। पुनः शिष्यमुखेन कविः कथयति, अग्रसंध्या (प्रातःसन्ध्या) प्रथमसूर्यकिरणान् कर्कन्धूनाम् (वदरीकोलीनाम्) उपरि पातयित्वा ताः रञ्जिताः करोति। मयूरोऽपि निद्रां परित्यजन् दर्भास्तरणयुक्तमुटजशिखरं त्यजति। हरिणोऽपि यज्ञवेदीसमीपे वीतनिद्रः सन् स्वखुराग्रेण भूमिं विदारयन् उत्तिष्ठते। अनन्तरं सः स्वाङ्गमायतं करोति। पुनः प्रभातं वर्णयन् शिष्यः कथयति, रात्रौ यः चन्द्रः पर्वतश्रेष्ठस्य शिखरे पादं संस्थाप्य अन्धकारनिवारणं प्रौढ्या कृतवानासीत्, सोऽयं चन्द्रः अधुना प्रातःकाले अल्पावशेषमयूखः सन् गगनात् पतति। हि महान्तः जनाः अपि शिखरस्थानमाप्य काले पतन्ति।

## ग. कण्वस्य शकुन्तलायाः गर्भवतीत्वज्ञानं स्वामिगृहप्रेरणानुमतञ्च -

तीर्थात् प्रत्यावृत्तः कण्वः प्रातः संन्ध्यां निर्वर्तयितुं यदा यज्ञमण्डपं प्रविशति तदा कश्चिदशरीरी छन्दोमय्या वाण्या कण्वं श्रावयति यत् - 'दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः
अवेहि तनयां ब्रह्मन् अग्निगर्भां शमीमिव'।

**अन्वयः** – हे ब्रह्मन् भुवः भूतये दुष्यन्तेन आहितं तेजः दधानां तनयां अग्निगर्भां शमीमिव अवेहि।

**अर्थः** – अशरीरिवाणी प्रकाशयति, हे ब्रह्मन् राज्ञा दुष्यन्तेन पृथिवीकल्याणाय शकुन्तलायां गर्भाधानरूपेण किञ्चित् तेजः (वीर्यम्) स्थापितमस्ति। अतः भवान् स्वतनुजां शकुन्तलां अग्निगर्भां शमीमिव जानातु। यथा शमीवृक्षाभ्यन्तरे तेजीयान् अग्निः तिष्ठति, तथा तव कन्यागर्भे दुष्यन्तस्थापितवीर्याग्निर्वर्तते।

मुनिः एतत् विज्ञाय प्रातः शकुन्तलामुपेत्य कथितवान्, वत्से! सुशिष्याय दत्ता विद्येव अशोचनीयासि संवृत्ता। अद्यैव ऋषिलक्षितां त्वां भर्तुः सकाशं विसर्जयामि।

## घ. शकुन्तलाकृते पादपादीनां वस्त्राभूषणप्रदानम् -

ततः शकुन्तलायाः पतिगृहगमनाय आयोजनं प्राचलत्। अस्मिन्नभ्यन्तरे द्वौ ऋषिकुमारौ शकुन्तलायाः अलङ्करणार्थम् उपायनानि आनीतवन्तौ। एतत् मूल्यवदुपायनं कुतः आनीतमिति गौतम्याः प्रश्ने प्रथमः ऋषिकुमारः कथयति, एतत् कण्वस्य प्रभावात् लब्धम्। द्वितीयः ऋषिकुमारः कथयति -

क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपरागसुभगो लाक्षारसः केनचित्
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै-
र्दत्तान्याभरणानि नः किसलयोद्भेदप्रतिद्वन्द्विभिः'।

**अन्वयः** – केनचित् तरुणा इन्दुपाण्डुमाङ्गल्यं क्षौमम् आविष्कृतम्। केनचित् चरणोपरागसुभगः लाक्षारसः निष्ठ्यूतः। अन्येभ्यः किसलयोद्भेदप्रतिद्वन्द्विभिः आपर्वभागोत्थितैः वनदेवताकरतलैः आभरणानि दत्तानि।

**अर्थः –** शकुन्तलायाः कृते माङ्गल्यमाभरणं तपोवने विद्यमानैः पादपैः प्रदत्तमिति प्रकाशयितुं द्वितीयः ऋषिकुमारः कथयति यत् केनचित् तरुणा चन्द्रवत् पाण्डुरवर्णं पटवस्त्रं (क्षौमम्) प्रदत्तम् । केनचित् तरुणा पादरञ्जनयोग्यः लाक्षारसः प्रदत्तः । अपरैरपि पादपैः वनदेवताकरतलैः किसलयसमानैः अन्यानि आभरणानि प्रदत्तानि । एतैः आभरणैः अनसूया प्रियम्बदा च शकुन्तलां मण्डयतः ।

अनन्तरं कण्वः स्नानादिकर्म समाप्य शकुन्तलायाः पतिगृहगमनम् उद्घोषयति ।

‘यास्यत्यद्यशकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं न तनयाविश्लेषदुःखैर्नवैः’ ॥

**अन्वयः –** शकुन्तला अद्य यास्यतीति हृदयम् उत्कण्ठया संस्पृष्टम् । कण्ठः स्तम्भितवाष्पवृत्तिकलुषः, दर्शनं चिन्ताजडम् । अरण्यौकसः मम तावत् स्नेहात् इदम् ईदृशं वैक्लव्यम्, गृहिणः नवैः तनयाविश्लेषदुःखैः कथं न पीड्यन्ते ।

**अर्थः –** शकुन्तलायाः पतिगृहगमनम् उद्घोषयन् कण्वः तस्याः विच्छेदेन कथं दुःखम् अनुभवतीति अत्र श्लोके वर्तते । कण्वः कथयति अद्य शकुन्तला पतिगृहं यास्यतीति हेतोः मम हृदयम् उत्कण्ठया आवृतम् । वाष्पावरुद्धेन कण्ठः मम कलुषितः भवति । दृष्टिरपि चिन्तया जडीभूता भवति । यदि पालितकन्यास्नेहिनः वनवासिनः मम अवस्था तस्याः विच्छेदेन एतादृशी विकला भवति, तर्हि कन्यायाः जन्मदाता पिता तस्याः विच्छेदेन कीदृशीं पीडां न प्राप्नुयात् ?अयं चतुर्थाङ्कस्य प्रसिद्धश्लोकेषु प्रथमः ।

## ङ. शकुन्तलाकृते कण्वस्य आशीर्वादः –

ततः कण्वः शकुन्तलाकृते शुभाशिषं प्रदाय कथयति ।

‘ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव ।
सुतं त्वमपि सम्राजं सेव पुरुमवाप्नुहि’ ।

**अन्वयः –** शर्मिष्ठा ययातेरिव भर्तुः बहुमता भव । सा पुरुमिव त्वम् अपि सम्राजं सुतम् अवाप्नुहि ।

**अर्थः –** आशीर्वादप्रदानव्याजेन कण्वः शकुन्तलां कथयति, हे वत्से ! यथा शर्मिष्टा (वृषपर्वणः असुरराजस्य कन्या) ययातेः (नहुषपुत्रस्य) प्रियतमा आसीत् तथा त्वं तव स्वामिनः दुष्यन्तस्य बहुमता (प्रियतमा) भव । अपि च सा शर्मिष्ठा यथा पुरुनामकं पुत्रं जनयामास तथा त्वमपि चक्रवर्तिनं पुत्रं लभस्व ।

ततः परं कण्वःसद्यः हुताग्निप्रदक्षिणाय शकुन्तलामाह्वयति । अग्निप्रदक्षिणकाले वैतानाग्निः शकुन्तलां पावयतु इति सः आशास्ते । ऋक्छन्दसा एकं श्लोकं कविः कण्वमुखेन तदा वाचयति ।

यथा – ‘अमी वेदीं परितः क्लृप्तधिष्ण्याः समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः
अपघ्नन्तो दुरितं हव्यगन्धैः वैतानास्त्वां वह्नयः पावयन्तु’ ।

**अन्वयः –** समिद्वन्तः वेदीं परितः क्लृप्तधिष्ण्याः प्रान्तसंस्तीर्णदर्भाः अमी वैतानाः वह्नयः हव्यगन्धैः दुरितम् अपघ्नन्तः त्वां पावयन्तु ।

**अर्थः –** आश्रमे यज्ञमण्डपे हुताग्निप्रदक्षिणकाले कण्वः आशीर्वादप्रदानव्याजेन शकुन्तलां कथयति, हे वत्से यज्ञकाष्ठयुक्ताः वेदीं परितः बिहितस्थानाः प्रान्तविस्तीर्णदर्भाः यज्ञाग्नयः (आहवनीय-गार्हपत्य-दक्षिणाग्नयः) हुतगन्धैः तव दुरितं नाशयन्तु, त्वाञ्च पवित्रीकुर्वन्तु । ततः शार्ङ्गरवादीन् आहूय शकुन्तलां विसर्जयति कण्वः । शकुन्तलायाः गमनकाले उच्चैः कण्वः लतावृक्षान् सम्बोध्य कथयति ।

'पातुं न प्रथमं व्यवस्यति पयः युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनाऽपि भवतां स्नेहेन या पल्लवम् ।
आदौ वः कुसुमप्रसूतिसमये यस्याः भवत्युत्सवः ।
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ।'

**अन्वयः –** या युष्मासु अपीतेषु प्रथमं पयः न व्यवस्यति । भवतां स्नेहेन या प्रियमण्डना अपि पल्लवं नादत्ते । वः आदौ कुसुमप्रसूतिसमये यस्याः उत्सवः भवति, सा इयं शकुन्तला पतिगृहं याति । सर्वैः अनुज्ञायताम् ।

**अर्थः –** अत्र कण्वः लतावृक्षान् सम्बोध्य कथयति, हे लताः वृक्षाः ! या शकुन्तला प्रतिदिनं युष्माकम् आलबालेषु जलं न दत्वा जलं न पीतवती । स्वयम् आभूषणप्रिया अपि भवतां स्नेहेन भवतां पत्रमपि या च्छित्वा मण्डनरूपेण न गृह्णाति, अर्थात् भवतां पत्रच्छेदमपि या न करोति, यदा नूतनतया भवतां कुसुमम् उत्पद्यते तदा यस्याः उत्सवः भवति, अर्थात् या वृक्षलतासु प्रथमतया पुष्पोद्गमं दृष्ट्वा आनन्देन नृत्यति, सा इयं शकुन्तला अधुना स्वपतिगृहं गच्छति । एतत् भवन्तः सर्वे जानन्तु । शाकुन्तले चतुर्थाङ्के प्रसिद्धश्लोकचतुष्टये अयं द्वितीयः प्रसिद्धः श्लोकः ।

## च. शकुन्तलायाः पतिगृहगमनेन पशुलतादीनाम् अवस्था –

ततः शकुन्तलां नीत्वा गौतमी शार्ङ्गरवः शारद्वतश्च दुष्यन्तनगरं प्रति प्रस्थिताः । शकुन्तलायाः विच्छेदेन आश्रमस्य वृक्षलतापशुपक्षिणः दुःखिताः भवन्ति । एतत् कविः प्रियम्बदामुखेन प्रकाशयति, यथा –

'उद्गीर्णदर्भकवलाः मृग्यः परित्यक्तनर्तनाः मयूराः ।
उपसृतपाण्डुपत्राः मुञ्चन्त्यश्रूणीव लताः' ।

**अन्वयः –** मृग्यः उद्गीर्णदर्भकवलाः, मयूराः परित्यक्तनर्तनाः, लताः अपसृतपाण्डुपत्राः अश्रूणि मुञ्चन्तीव ।

**अर्थः –** शकुन्तलायाः विच्छेदेन हरिण्यः दुःखमनुभूय कवलितं दर्भमुद्गीर्णं कुर्वन्ति ।

मयूराःनृत्यं परित्यक्तं कुर्वन्ति । लताः अपि पाण्डुपत्रपतनव्याजेन लोतकानि त्यजन्ति इति । एतत् सर्वं शकुन्तलाविरहेण भवतीति प्रियम्बदा कथयति ।

शकुन्तला पतिगृहगमनावसरे आश्रमस्य मध्ये गर्भवतीं कामपि हरिणीं बिलोक्य कथयति, तात ! एष उटजपर्यन्तचारिणी गर्भमन्थरा मृगवधूर्यदाऽनघप्रसवा भवति तदा मह्यं कमपि प्रियनिवेदयितृकं विसर्जयिष्यसि । ततः कश्चित् मृगशिशुः शकुन्तलावस्त्राग्रं समाकृष्य तस्याः गमनं निवारयति । शकुन्तला न गच्छतु इति अभिप्रायेण सः एवं करोति । शकुन्तला कथयति तात ! कः खलु मम वसनमाकर्षति ।

कण्वः कथयति, वत्से ! ‘यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिबिद्धे ।
श्यामाङ्कमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते’ ।

**अन्वयः –** त्वया यस्य कुशसूचिबिद्धे मुखे व्रणविरोपणम् इङ्गुदीनां तैलं न्यषिच्यत श्यामाङ्कमुष्टिपरिवर्धितकः सोऽयं पुत्रकृतकः मृगः ते पदवीं न जहाति ।

**अर्थः –** कण्वः कथयति वत्से ! मातृहीनस्य यस्य मृगशिशोः कुशभक्षणकाले कुशाग्रतीक्ष्णभागेन क्षताक्ते मुखे त्वं तत् क्षतनिवारणाय इङ्गुदीतैलं सिक्तवती । नीवारधान्यं भक्षणाय दत्वा यं त्वं पुत्रवत् पालितवती, सोऽयं मृगः त्वत्प्रेम्णा वशीभूतः सन् त्वाम् इतः बिहातुं नेच्छति । सः तव वस्त्रमाकर्षति ।

शकुन्तलायाः कृते पशुपक्षिणां कियान् स्नेहः अस्तीति अत्र ज्ञातुं शक्यते । मृगशिशुमुद्दिश्य शकुन्तला कथयति, वत्स ! किं सहवासपरित्यागिनीं मामनुसरसि ? अचिरप्रसूतया जनन्या विना वर्धित एव । इदानीमपि मया विरहितं त्वां तातश्चिन्तयिष्यति । निवर्तस्व तावत् ।

## छ. शकुन्तलाकृते कण्वस्य उपदेशप्रदानं पतिगृहप्रेरणञ्च –

ततः शार्ङ्गरवः कण्वमुद्दिश्य कथयति, भगवन् ! ओदकान्तं स्निग्धो जनोऽनुगन्तव्यः इति श्रूयते । तदिदं सरस्तीरम् । अत्र संदिश्य प्रतिगन्तुमर्हसि । ततः कण्वः कथयति, शार्ङ्गरव ! इति त्वया मद्वचनात् स राजा शकुन्तलां पुरस्कृत्य वक्तव्यः ।

‘अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन -
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद् वाच्यं बधूबन्धुभिः’ ॥

**अन्वयः –** संयमधनान् अस्मान् आत्मनः उच्चैः कुलं च त्वयि अस्याः कथमपि अबान्धवक्तृतां स्नेहप्रवृत्तिं च तां साधु विचिन्त्य त्वया इयं दारेषु सामान्यप्रतिपत्तिपूर्वकं दृश्या । अतः परं भाग्यायत्तम्, तत् खलु बधूबन्धुभिः न वाच्यम् ।

**अर्थः –** अत्र श्लोके दुष्यन्तमुद्दिश्य कण्वः संदेशं प्रेरयति । संदेशप्रेरणव्याजेन सः कथयति, वयं संयमधनाः तपस्विनः । भवान् (दुष्यन्तः) उच्चकुलसम्भवः । त्वयि शकुन्तलायाः बन्धुजनप्रयासं

विना एव स्वाभाविकी प्रेमप्रवृत्तिः जाता । गान्धर्वविवाहेन सा स्वयं त्वयि प्रेमभावं स्थापितवती । एतत् सर्वं विचिन्त्य भवान् भवतः पत्नीनां मध्ये शकुन्तलाकृते समानगौरवं दद्यात् । इतः परं यत् शुभमशुभं वा घटिष्यति तत् सर्वं भाग्याधीनमेव । तत् बधूबन्धुभिः (शकुन्तलायाः आत्मीयैः अस्माभिः) न वक्तव्यम् । अर्थात् भवान् महाराजः स्वपत्नीमध्ये शकुन्तलायै यथागौरवं दास्यति । सा यथा भवतः अन्तःपुरे असम्मानिता न स्यात् तथा कर्तव्यम् । अयं श्लोकः चतुर्थाङ्कस्य प्रसिद्धेषु चतुर्षु श्लोकेषु तृतीयः श्लोकः ।

अनन्तरं कण्वः शकुन्तलामुद्दिश्य किञ्चित् सन्दिशति । अयं सन्देशःभारतीयनारीजातिकृते सर्वोत्कृष्टः चिरभास्वरः स्थास्यति । यथा -

'शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तृर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्यैवं गृहिणीपदं युवतयः वामाः कुलस्याधयः' ।

**अन्वयः –** गुरून् शुश्रूषस्व । सपत्नीजने प्रियसखीवृत्तिं कुरु । विप्रकृता अपि रोषणतया भर्तृः प्रतीपं मास्म गमः । परिजने भूयिष्ठं दक्षिणा भव । भोग्येषु अनुत्सेकिनी (भव) एवं युवतयः गृहिणीपदं यान्ति । वामाः कुलस्य आधयः भवन्ति ।

**अर्थः –** दुष्यन्तस्य अन्तःपुरे शकुन्तला पत्नीरूपेण कथं व्यवहरिष्यतीति कण्वः उपदिशति । सः कथयति, वत्से ! त्वं तव गुरुजनान् सेवस्व । तव सपत्नीजने प्रियसखीव्यवहारं कुरु । कदाचित् केनचित् कारणेन यदि स्वामिना त्वम् अपमानिता अभवः तर्हि कुपिता सती तस्य वैपरीत्याचरणं मा कुरु । अपरे ये परिजनाः सन्ति तेषु सर्वदा समानानुरागपूर्णा (दक्षिणा) भव । एवं समाचरन्त्यः युवतयः प्रकृष्टगृहिण्यः भवन्ति । याः वामाः (एतत् प्रतिकूलमाचरन्ति) ताः कुलस्य ब्याधिस्वरूपाः भवन्ति ।

अयमुपदेश भारतीयसंस्कृतेः दृष्टान्तः, भारतीयनारीजातेः सन्मार्गप्रवर्तकश्च अयं चतुर्थाङ्के प्रसिद्धश्लोकेषु चतुर्थः भवति। ततः शकुन्तला पितरमुद्दिश्य कथयति, तात ! कदा नु भूयस्तपोवनं प्रेक्षिष्ये । कण्वः कथयति,

'भूत्वा चिराय चतुरन्तमहीसपत्नी
दौषन्तिमप्रतिरथं तनयं निवेश्य
भर्त्रा तदर्पितकुटुम्बभरेण सार्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन्' ।

**अन्वयः –** चिराय चतुरन्तमहीसपत्नी भूत्वा अप्रतिरथं दौषन्तिं तनयं निवेश्य तदर्पितकुटुम्बभरेण भर्त्रा सार्धं शान्ते अस्मिन् आश्रमे पुनः पदं करिष्यसि ।

**अर्थः –** अत्र कण्वः शकुन्तलां कथयति, वत्से ! त्वं दीर्घकालं यावत् चतुःसमुद्रमेखलीभूतायाः पृथ्याः सपत्नी भूत्वा अद्वितीयवीरं तव गर्भात् दुष्यन्तसंपर्केण जातं पुत्रं सिंहासने उपावेश्य, परिवारस्य

भारं तस्मिन् पुत्रे निवेश्य अन्तिमसमये अस्मिन् शान्तवातावरणयुक्ते आश्रमे स्वामिना सह पदं स्थापयिष्यसि । यौवने गार्हस्थ्यसुखमुपभुज्य पश्चिमे वयसि तपोवनम् आगमिष्यसीत्यर्थः ।

ततः शकुन्तला क्रमशः नेत्रपथात् दूरं गता । कण्वः सपरिजनः आश्रमं प्रत्यागतः । ततः सविमर्शं प्रक्रिम्य कण्वः कथयति - हन्त भो ! शकुन्तलां पतिकुलं विसृज्य लब्धम् इदानीं स्वास्थ्यम् । कुतः -

अर्थोहि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा' ।

**अन्वयः –** कन्या हि परकीयः अर्थः एव । अद्य तां परिग्रहीतुः संप्रेष्य मम अयम् अन्तरात्मा प्रत्यर्पितन्यास इव प्रकामं विशदः जातः ।

**अर्थः –** शकुन्तलां पतिगृहं संप्रेष्य कण्वः सवितर्कं निःश्वस्य कथयति, कन्यानाम परकीयं धनमेव, अर्थात् यद्यपि पिता बाल्यात् कन्यां पालयति, तथापि सा एव जामातुः धनम् । अद्य शकुन्तलां पतिगृहं संप्रेष्य ममान्तरात्मा भाररहित इव भवति । मम आनन्दः वर्धते । यथा न्यासरूपेण रक्षितं वस्तु तस्य वस्तुनः स्वामिने समर्प्य कश्चित् चिन्तामुक्तः भवति, तथा कण्वः न्यासरूपेण रक्षितां शकुन्तलां तस्याः स्वामिने दुष्यन्ताय समर्प्य चिन्ताशून्यः जातः इति भावार्थः ।

अत्र चतुर्थाङ्कस्य समाप्तिः भवति ।

## ३. बोधप्रश्नाः –

१. विरहवाधादूरीकरणाय शकुन्तला किं कृतवती ?
२. विरहिण्याः शकुन्तलायाः अवस्था कीदृशी आसीत् ?
३. शकुन्तला दुष्यन्तमुद्दिश्य किम्भूतं प्रेम पत्रं लिखितवती ?
४. दुर्वाससः अभिशापवृत्तान्तं लिखत ।
५. चतुर्थाङ्कि वटुकृतं प्रभातवर्णनं लिखत ।
६. शकुन्तलां प्रति आश्रमस्थपशुपक्षिणां प्रेम वर्णयत् ।
७. शकुन्तला पतिगृहं गमिष्यतीति हेतोः कण्वस्य कीदृशी अवस्था जाता ।
८. दुष्यन्तं शकुन्तलाञ्च प्रति कण्वः कीदृशं संदेशं दत्तवान् ?

# पञ्चमभागः ( Unit - V)

**अस्मिन् विभागे वक्ष्यमाणविषयाः आलोचिताः सन्ति । १- पञ्चमाङ्कस्य विषयक्रमः- क) दुष्यन्तं प्रति हंसपदिकायाः अभिमानम्, ख) दुष्यन्तस्य राजधान्यां ऋषिकुमारयोः अनुभूतिः, ग) राजसभायां शकुन्तलां प्रति दुष्यन्तस्य अस्वीकृतिः, घ) अवगुण्ठनरहितां शकुन्तलां दृष्ट्वा दुष्यन्तस्य मनोभावः, ङ) गौतमीं प्रति दुष्यन्तस्य उत्तरम्, च) शकुन्तलां प्रति शार्ङ्गरवस्य उक्तिः, छ) दुष्यन्तं प्रति शारद्वतस्य उक्तिः, ज) एकेन ज्योतिषा शकुन्तलायाः अपसारणम् ।**

**२. षष्ठाङ्कस्य विषयक्रमः - क) रक्षिकृते कैवर्तस्य मुद्रिकालाभविषयप्रकाशः, ख) मुद्रिकादर्शनानन्तरं राज्ञः पूर्वकथास्मरणम्, ग) राज्ञः सुशासकत्वप्रकाशनम्, घ) अदृष्टसत्त्वं प्रति दुष्यन्तस्य उक्तिः, ङ) राजानं प्रति मातलेरुक्तिः ।**

**३. बोधप्रश्नाः ।**

---

## १. पञ्चमाङ्कस्य विषयक्रमः -

## क. दुष्यन्तं प्रति हंसपदिकायाः अभिमानम् -

पञ्चमाङ्कप्रारम्भे राज्ञा सकृत्कृतप्रणया राज्ञी हंसपदिका (अपरा राज्ञी) वसुमतीप्रणयावद्धं दुष्यन्तमभिमानेन उपालम्भते । सा कथयति -

'अभिनवमधुलोलुपस्त्वं तथा परिचुम्ब्य चूतमञ्जरीम्
कमलवसतिमात्रनिर्वृतो मधुकर ! विस्मृतोऽस्यैनां कथम्' ।

**अन्वयः -** हे मधुकर ! अभिनवमधुलोलुपस्त्वं चूतमञ्जरीं तथा परिचुम्ब्य कमलवसतिमात्रनिर्वृतः एनां कथं विस्मृतः असि ।

**अर्थः -** अयि भ्रमर ! नवीनपुष्परसलोभी त्वं आम्रमंजरीं पूर्वं परिचुम्ब्य अधुना कमलपुष्पे निवासपूर्वकं पूर्वचुम्बिताम् आम्रमंजरी विस्मरसि । अत्र हंसपदिका चूतमंजरीत्वेन आत्मानम्, राज्ञीं वसुमतीं कमलिनीत्वेन, राजानं दुष्यन्तं मधुकरत्वेन च चित्रयति । राजा वसुमतीप्रेमाकृष्टः सन् हंसपदिकां विस्मरतीति गूढार्थः । अत्रापि अर्थान्तरं प्रतिभाति यत् राजा अन्तःपुरे राज्ञीभिः सह मिलितः सन् शकुन्तलां विस्मरति ।

राजा गीतमिदमाकर्ण्य पर्याकुलितः भवति । सः गीतार्थमवबुध्य विदूषकं हंसपदिकासान्त्वनार्थं प्रेषयति । अस्मिन् समये कञ्चुकी कण्वशिष्यागमनं राज्ञे सूचयितुमागच्छति । अन्तःपुरचरोबृद्धः विप्रोगुणगणान्वितः, सर्वकार्यार्थकुशलः कञ्चुकीत्यभिधीयते, इति कञ्चुकिलक्षणम् । कञ्चुकी प्रकाशयति, 'जयतु जयतु देव ! एते खलु हिमगिरेरुपत्यकारण्यवासिनः काश्यपसन्देशमादाय सस्त्रीकाः तपस्विनः संप्राप्ताः' । राजाऽपि सहर्षमादिशति, - 'तेन हि मद्वचनात् विज्ञाप्यतामुपाध्यायः सोमरातः । अमून् आश्रमवासिनः श्रौतेन विधिना सत्कृत्य स्वयमेव प्रवेशयितुम् अर्हसीति । अहमप्यत्र तपस्विदर्शनोचिते प्रदेशे स्थितः प्रतिपालयामि' । राजा तपस्विदर्शनाय अग्निशरणं प्रति गतः । तत्र वेत्रवतीं प्रतिहारीं राजा

प्रश्नयति, वेत्रवति ! काश्यपेन किमर्थं मत्सकाशं ऋषयः प्रेषिताः ? किं तेषां तपः विघ्नेन दूषितम् ? अथवा आश्रमप्राणिषु केनचित् दुराचरितम् ? अथवा मया कृतेन केनचित् पापकर्मणा आश्रमवृक्षेषु पुष्पफलानि नोद्भवन्ति ? एवं चिन्तयन् अहं पर्याकुलोभवामि । ततः शकुन्तलां पुरस्कृत्य गौतमीसहिताः मुनयः प्रविशन्ति ।

## ख. दुष्यन्तस्य राजधान्यां ऋषिकुमारयोः अनुभूतिः -

राजप्रासादमध्यं प्रविश्य शार्ङ्गरवः शारद्वतं कथयति -

'महाभागः कामं नरपतिरभिन्नस्थितिरसौ
न कश्चिद् वर्णानामपथमपकृष्टोऽपि भजते ।
तथापीदं शश्वत् परिचितविविक्तेन मनसा
जनाकीर्णं मन्ये हुतबहपरीतं गृहमिव' ।

**अन्वयः –** कामम् असौ अभिन्नस्थितिः नरपतिः महाभागः, वर्णानाम् अपकृष्टः अपि कश्चित् अपथं न भजते, तथापि शश्वत् परिचितविविक्तेन मनसा जनाकीर्णम् इदं हुतवहपरीतं गृहमिव मन्ये ।

**अर्थः –** शार्ङ्गरवः कथयति, शारद्वत ! असौ राजा दुष्यन्तः समीचीनः । सः भाग्यशाली अपि । राजमर्यादातः सः कदाचित् न विच्युतः भवति । अस्य शासने निकृष्टाः शूद्रादयः अपि कुमार्गगामिनः न भवन्ति । राज्ञः प्रजानाञ्च व्यवहारस्य साधुत्वेऽपि अस्मिन् जनाकीर्णे प्रासादे अहं सुखं नानुभवामि । अहं चिन्तयामि यथा अग्निवेष्टितगृहमध्ये अहमस्मि ।

कथनस्याभिप्रायोऽयं यत् नितरां ऋषिकुमारः शार्ङ्गरवः एकान्ते पशुपक्षिपूर्णे जनसंमर्दशून्ये आश्रमे निवसति । अधुना सः जनाकीर्णं राजप्रासादमागत्य आश्रमस्य शान्तवातावरणं नानुभवति । अतः जनाकीर्णं राजप्रासादं सः अग्निवेष्टितगृहमिव मनुते । शार्ङ्गरवस्यानुभवं समर्थयन् शारद्वतः कथयति स्थाने भवान् पुरप्रवेशादित्थम्भूतः संवृत्तः । अहमपि -

'अभ्यक्तमिव स्नातः शुचिरशुचिमिव प्रबुद्ध इव सुप्तम् ।
बद्धमिव स्वैरगतिर्जनमिह सुखसङ्गिनमवैमि ।

**अन्वयः –** अहम् इह सुखसङ्गिनं जनं स्नातः अभ्यक्तमिव शुचिः अशुचिमिव प्रबुद्धः सुप्तमिव स्वैरगतिः बद्धमिव अवैमि ।

**अर्थः –** शारद्वतः कथयति इह राजप्रासादे धनरत्नपरिपूर्णत्वात् राजभोगलिप्तं सुखिनं जनसमूहं वीक्ष्य एवं चिन्तयामि यत् अहं स्नातः, एते जनाः कृततैललेपाः, अहं शुचिः एते अशुचयः (अपवित्राः) अहं जागरितः एते सुप्ताः अहं स्वाधीनगतिकः एते रज्जुबद्धा इव ।

उपयुक्तश्लोकद्वयेन आश्रमपरिवेषः, आश्रमस्थजनाः, जनाकीर्णराजप्रासादः नागरिकाश्च इति एषां मध्ये भेदः प्रकाशितः भवति ।

अनन्तरं राजपुरोहितः राजानं निर्दिश्य ऋषीणां कृते कथयति, भोस्तपस्विनः ! असौ अत्रभवान् वर्णाश्रमाणां रक्षिता प्रागेव मुक्तासनः वः प्रतिपालयति । पश्यत एनम् । शार्ङ्गरवः एतत् श्रुत्वा कथयति -

भो महाब्राह्मण ! काममेतदभिनन्दनीयम्, तथापि वयमत्र मध्यस्थाः । यतोहि फलागमेन वृक्षाः नम्राः भवन्ति जलभरेण नवीनमेघाः अपि नताः भवन्ति । सज्जनाः समृद्धिभिः अनुद्धताः भवन्ति । अयमेव परोपकारिणां स्वभावः, राजाऽपि सज्जनत्वात् एतादृशस्य व्यवहारस्याधिकारी भवति । ततः पुरोहितः कृतातिथिसत्कारः कण्वसन्देशं श्रोतुं राजानं निवेदयति । अधुना राजानं शार्ङ्गरवः कण्वसन्देशं श्रावयति । 'यन्मिथः समयादिमां मदीयां दुहितरं भवानुपायंस्त, तन्मया प्रीतिमता युवयोरनुज्ञातम्, कुतः -

'त्वमर्हतां प्रागसरः स्मृतोऽसि नः
शकुन्तला मूर्तिमतीव सत्क्रिया
समानयन् तुल्यगुणं बधूवरं
चिरस्य वाच्यं न गतः प्रजापतिः' ।

तदानीम् आपन्नसत्त्वा इयं प्रतिगृह्यतां सहधर्मचरणाय इति ।

**अन्वयः –** त्वम् अर्हताम् प्राग्रसरः स्मृतः असि । शकुन्तला च मूर्तिमती सत्क्रिया । तुल्यगुणं वधूवरं समानयन् प्रजापतिः चिरस्य वाच्यं न गतः ।

**अर्थः –** कण्वः सन्दिशति, हे राजन् ! भवान् योग्यानामग्रेसरः अस्माकं चिरदिनं यावत् स्मरणीयः अस्ति । शकुन्तलाऽपि सत्क्रियायाः मूर्तिमत् रूपम् । समानगुणोपेतं भवन्तं शकुन्तलाञ्च वरबधूत्वेन निर्माय प्रजापतिः निन्दनीयः न भवति ।

## ग. राजसभायां शकुन्तलां प्रति दुष्यन्तस्य अस्वीकृतिः -

गौतमी अपि तदा कथयति -

'नापेक्षितोगुरुजनोऽनया त्वया पृष्टो न बन्धुजनः
एकैकस्य च चरिते भणामि किमेकैककम्'

अर्थः - हे राजन ! अनया शकुन्तलया त्वयि मनोनिवेशात् पूर्वं कोऽपि गुरुजनः न पृष्टः । भवताऽपि शकुन्तलया सह प्रणयकरणात् पूर्वं कोऽपि बन्धुजनः न पृष्टः । युवयोः चरित्रमत्र समानमस्ति । अतः युवयोः द्वयोः कृते किं वा भणामि ?

राजा एतत् श्रुत्वा आश्चर्यान्वितः भवति । सः प्रश्नयति किमत्र भवती मया परिणीतपूर्वा ? शकुन्तला एतत् श्रुत्वा सविषादमात्मगतं कथयति, - हृदय ! सांप्रतं ते आशङ्का । (जाता) शार्ङ्गरवः राजानमुद्दिश्य कथयति - 'किं कृतकार्यद्वेषो धर्मं प्रति विमुखता कृतावज्ञा
मूर्च्छन्त्यमी विकाराः प्रायेणैश्वर्यमत्तेषु' ।

**अन्वयः –** किं कृतकार्यद्वेषः, किं धर्मं प्रति विमुखता, किं कृतावज्ञा, ऐश्वर्यमत्तेषु प्रायेण अमी विकाराः मूर्च्छन्ति ।

**अर्थः –** शकुन्तलापरिणयं प्रति कृताशङ्कं राजानं दुष्यन्तं शार्ङ्गरवः किञ्चित् कुपितः सन् कथयति, हे राजन् ! भवता कृतं कार्यं प्रति भवतः कथं द्वेषः जायते, अथवा धर्मं प्रति वैमुख्यं भवति । गान्धर्वेण

विवाहविधिना शकुन्तलां परिणीय अधुना यत् भवान् शङ्कते तदेव कृतकार्यं प्रति द्वेषः, अथवा धर्मं प्रति विमुखता इति वक्तुं शक्यते। अहं चिन्तयामि ऐश्वर्यशालिनः भवादृशाः एवं विकारग्रस्ताः भवन्ति।

## घ. अवगुण्ठनरहितां शकुन्तलां दृष्ट्वा दुष्यन्तस्य मनोभावः -

गौतमी तदा शकुन्तलां कथयति, 'जाते मुहूर्तं मा लज्जस्व। अपनेष्यामि तावत् तेऽवगुण्ठनम्। ततः त्वां भर्ता अभिज्ञास्यति। ततः सा शकुन्तलायाः अवगुण्ठनम् अपनयति।

राजा शकुन्तलायाः अवगुण्ठनरहितं मुखमबलोक्य चिन्तयति -

'इदमुपनतमेवं रूपमक्लिष्टकान्ति
प्रथमपरिगृहीतं स्यान्नवेत्यव्यवस्यन्
भ्रमर इव विभाते कुन्दमन्तस्तुषारं
न च खलु परिभोक्तुं नैव शक्नोमि हातुम्'

**अन्वयः** – एवम् उपनतम् इदम् अक्लिष्टकान्ति रूपं प्रथमपरिगृहीतं स्यात् वा न इति अव्यवस्यन् (अहम्) विभाते अन्तः तुषारं कुन्दं भमर इव न खलु परिभोक्तुं न च हातुं शक्नोमि।

**अर्थः** – दुर्वाससः शापात् शकुन्तलां दुष्यन्तः नाभिजानाति। तस्याः मुखं दृष्ट्वा सः चिन्तयति, एतादृशी सुन्दरी मया पूर्वं परिणीता वा नेति निर्णेतुमहमक्षमः भवामि। शिशिरसमये प्रातःकाले अन्तःतुषारपूर्णं कुन्दकुसुमं भ्रमरः यथा उपभोक्तुम् अथवा परित्यक्तुं न शक्नोति तथा अहमपि इमां पत्नीत्वेन स्वीकर्तुम् अथवा परित्यक्तुं न प्रभवामि।

ततः राजा कथयति -'हे तपस्विनः ! चिन्तयन्नपि न खलु स्वीकरणमत्र भवत्याः स्मरामि, तत्कथमिमाम् अभिव्यक्तसत्त्वलक्षणां प्रति आत्मनः क्षेत्रिणमाशङ्कमानः प्रतिपत्स्ये' ततः शारद्वतः शार्ङ्गरवं कथयति, - शार्ङ्गरव ! विरम त्वम् इदानीम्। शकुन्तले ! वक्तव्यम् उक्तमस्माभिः। सोऽयमत्रभवान् एवमाह। दीयतामस्मै प्रत्ययप्रतिवचनम्।

शकुन्तला चिन्तयति - 'इदम् अवस्थान्तरं गते तादृशे अनुरागे किं वा स्मारितेन। इदानीं मे आत्मा शोचनीय इति व्यवसितमेतत्' (प्रकाशम्) आर्यपुत्र ! (इत्यर्धोक्ते) संशयित इदानीं परिणये नैष समुदाचारः। पौरव ! न युक्तं नाम ते तथा पुराऽऽश्रमपदे स्वभावोत्तानहृदयम् इमं जनं समयपूर्वं प्रतार्य ईदृशैरक्षरैः प्रत्याख्यातुम्'।

राजाऽपि एतत् श्रुत्वा कथयति - यथा कूलङ्कषा सिन्धुः प्रसन्नम् अम्भः तटतरुं च आविलयति तथा त्वमपि मादृशं जनं पातयितुमाविलयितुं च चेष्टसे। ततः परं आगमनकाले शचीतीर्थे हारितमुद्रिका शकुन्तला अपि अभिज्ञानं दर्शयितुमसमर्था आभवत्। अनन्तरं राज्ञः स्मरणाय शकुन्तला कथान्तरमुक्तवती। तद् यथा - 'एकस्मिन् दिवसे नवमालिकामण्डपे नलिनीपत्रभाजनगतमुदकं तव हस्ते सन्निहितमासीत्। तत्क्षणे स मे पुत्रकृतकः दीर्घापाङ्गोनाम मृगपोतकः उपस्थितः। त्वया अयं तावत् प्रथमं पिवतु इति अनुकम्पिना उपच्छन्दितः उदकेन। न पुनः ते अपरिचयात् हस्ताभ्यासमुपगतः। पश्चात् तस्मिन्नेव मया गृहीते सलिले अनेन कृतः प्रणयः। तदा त्वम् इत्थं प्रहसितोऽसि, 'सर्वः सगन्धेषु विश्वसिति। द्वौ अपि

अथारण्यकौ इति' । राजा कथयति - एवमादिभिरात्मकार्यनिर्वर्तिनीनामनृतमयवाङ्मधुभिः आकृष्यन्ते विषयिणः ।

## ङ. गौतमीं प्रति दुष्यन्तस्य उत्तरम् -

गौतमी एतत् श्रुत्वा कथयति - महाभाग ! नार्हसि एवं मन्त्रयितुम् । तपोवनसंवर्धितोऽनभिज्ञोयं जनः कैतवस्य । राजा एतत् खण्डयितुं वदति, तापसीबृद्धे ! एवं न वक्तव्यम् ।

'स्त्रीणामशिक्षितपटुत्वममानुषीषु संदृश्यते किमुत याः प्रतिबोधवत्यः ।

प्रागन्तरिक्षगमनात् स्वमपत्यजात -मन्यैर्द्विजैः परभृतः खलु पोषयन्ति ।

**अन्वयः** – स्त्रीणाम् अमानुषीषु अशिक्षितपटुत्वं संदृश्यते । याः प्रतिबोधवत्यः (तासां) किमुत, परभृतः खलु अन्तरिक्षगमनात् प्राक् स्वम् अपत्यजातम् अन्यैः द्विजैः पोषयन्ति

**अर्थः** – राजा कथयति हे तापसीबृद्धे ! तपोवने वर्धितजनः कैतवं न जानाति इति न । यतोहि मनुष्येतरजातिषु पशुपक्षिकुलेषु अपि शिक्षां विना चातुर्यं स्त्रीणामबलोक्यते, अर्थात् पक्षिकुलेषु स्त्रीणां चातुर्यमवर्णनीयम् । भवादृशाः याः ज्ञानवत्यः तासां किं वा वक्तव्यम् । अन्तरिक्ष-उड्डयनात् प्राक् कोकिलपत्नी स्वमपत्यं काकैः पोषयति । कोकिलपत्नी पक्षिकुले समुत्पन्नाऽपि शिशुपोषणे महत् चातुर्यं प्रकाशयति ।

## च. शकुन्तलां प्रति शार्ङ्गरवस्य उक्तिः -

ततः परं शार्ङ्गरवः शकुन्तलामुद्दिश्य कथयति -

'अतः परीक्ष्य कर्तव्यं विशेषात् संगतं रहः ।

अज्ञातहृदयेष्वैव वैरीभवति सौहृदम्' ।

ततः राजा कथयति अयि भोः किमत्रभवतीप्रत्ययादेवास्मान् संयुतदोषाक्षरैः क्षिणुथ । शार्ङ्गरवः साभ्यसूयमिव राजानमुद्दिश्य कथयति, जन्मकालादारभ्य ये जनाः शाठ्यं किमिति न जानन्ति तेषां वचनं तावत् अप्रमाणम्, परन्तु भवादृशाः ये नित्यं राजकार्ये परवञ्चनम् अभ्यस्यन्ति तेषां वचनं प्रमाणम् अस्तु ।

## छ. दुष्यन्तं प्रति शारद्वतस्य उक्तिः -

ततः शारद्वतः कथयति राजानम् उद्दिश्य -

'तदेषा भवतः कान्ता त्यज वैनां गृहाण वा

उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी ।

अर्थात् इयं शकुन्तला भवतः पत्नी अस्माभिरियमत्र प्रापिता । इतः परं भवान् इमां गृह्णातु वा न गृह्णातु । एतत् भवतः इच्छाधीनम् । यतोहि स्वपत्न्यां पत्युः अधिकारः सर्वतोमुखः

इत्युक्त्वा तपस्विनः प्रस्थिताः । शकुन्तला कथयति - कथमनेन कितवेन विप्रलब्धास्मि । यूयमपि मां परित्यजथ । (इति अनुप्रतिष्ठते)

गौतमी (परिवृत्त्य) कथयति, वत्स ! शार्ङ्गरव ! अनुगच्छतीयं खलु नः करुणपरिदेविनी शकुन्तला' प्रत्यादेशपरुषे भर्तरि किं वा मे पुत्रिका करोतु । ततः शार्ङ्गरवः शकुन्तलामुद्दिश्य कथयति, शकुन्तले !

यथा राजा वदति यदि तत् सत्यम्, तर्हि नष्टचरित्रया उल्लङ्घितपितृमर्यादया त्वया किं प्रयोजनम् । अथवा यदि त्वं पवित्रासि इति चिन्तयसि तर्हि स्वामिगृहे तव दास्यमपि श्रेयस्करम्

ततः तपस्विनः आश्रमं प्रति प्रस्थिताः । तदानीं राजपुरोहितः राजानं कथितवान् यत् हे राजन् ! अत्रभवती तावदाप्रसवमस्मद्गृहे तिष्ठतु । कुतः इदम् उच्यते इति चेत्, त्वं साधुभिरादिष्टपूर्वः, यत् प्रथममेव चक्रवर्तिनं पुत्रं जनयिष्यसीति। स चेत् मुनिदौहित्रः तल्लक्षणोपपन्नः भविष्यति अभिनन्द्य शुद्धान्तमेनां प्रवेशयिष्यसि, विपर्यये तु पितुरस्याः समीपनयनमवस्थितमेव । ततः सा पुरोधसा सह गन्तुं प्रवृत्ता ।

## ज. एकेन ज्योतिषा शकुन्तलायाः अपसारणम् -

अस्मिन्नभ्यन्तरे एकमद्भुतं दृश्यं संजातम् । पुरोधसा सह गच्छन्तीं शकुन्तलां 'एकं ज्योतिः उत्क्षिप्य नीतवत् । पुरोहितः राजानमेतत् सूचितवान् । यथा -

'सा निन्दन्ती स्वानि भाग्यानि बाला बाहूत्क्षेपं क्रन्दितुं च प्रवृत्ता ।
स्त्रीसंस्थानं चाप्सरस्तीर्थमारादुत्क्षिप्यैनां ज्योतिरेकं जगाम' ॥

अर्थात् शकुन्तलामात्रा मेनकया प्रेषिता एका अप्सराः शकुन्तलां उत्क्षिप्य नीतवती ।

ततः राजा पर्याकुलमानसः शयनागारं विश्रामार्थं गतवान् ।

अत्र पञ्चमाङ्कः समाप्तः भवति ॥

## २. षष्ठाङ्कस्य विषयक्रमः -

## क. रक्षिकृते कैवर्तस्य मुद्रिकालाभविषयप्रकाशः -

षष्ठाङ्कस्य प्रारम्भे एकं पुरुषं (कैवर्तम्) बध्वा रक्षिणौ ताड़यन्तौ राजशालस्य निकटे प्रविशतः । पुरुषं पृच्छतः तौ, अरे कथय कुत्र त्वया एतन्मणिबन्धोत्कीर्णनामधेयं राजकीयमङ्गुलीयकं समासादितम् ? कैवर्तः कथयति, अहं शक्रावतारवासी धीवरः । जालोद्गालादिभिः मत्स्यबन्धनोपायैः कुटुम्बभरणं करोमि । राजशालकः धीवरस्य जीविकां श्रुत्वा उपहासपूर्वकमुक्तवान् - 'विशुद्ध इदानीम् अस्य आजीवः' कैवर्तः प्रत्युत्तरेण कथयति -

'सहजं किल यद्विनिन्दितं न खलु तत् कर्म विवर्जनीयम्
पशुमारणकर्मदारुणोऽनुकम्पा मृदुरेव श्रोत्रियः' ।

**अर्थः** - स्वमत्स्यग्रहणजीविकां प्रति उपहसन्तं राजश्यालकमुद्दिश्य धीवरः कथयति, भवान् एवं न वदतु । यतोहि यत् कर्म सहजम्, अर्थात् वंशपरंपराक्रमेण कस्यचित् जनस्य जीविकानिर्वाहवृत्तिरूपेण यत्कर्म मान्यं भवति, तत् कर्म निन्दितं भवतु नाम कदाचित् न त्याज्यम् । यतोहि यज्ञादिषु पशुमारणादिकर्मसंपादनकाले निष्ठुरचित्तोऽपि श्रोत्रियः स्वभावतः मृदुरेव । श्रोत्रियः यज्ञादिषु पशुमारणादि कर्मकरणेनापि न निन्दनीयः भवति । इदं कर्म तस्य कौलिकम् । तद्वत् इदं मत्स्यग्रहणकर्म मम कौलिकमस्ति । तदानीन्तनकाले कौलिककर्म प्रति प्राधान्यं दत्तमासीदिति एतेन श्लोकेन ज्ञायते ।

ततः धीवरः कथितवान् यदहमेकस्मिन् दिने एकं रोहितमत्स्यं गृहीतवान् । मत्स्यकर्तनकाले तदुदरात् इमां राजनामाङ्कितां मुद्रिकां प्राप्तवान् । ततः राजश्यालः तां मुद्रिकां नीत्वा राज्ञः सकाशं गतः । तत्र उभयोः

रक्षिणोः वार्तालापः एवं प्रकारेण वर्तते, यथा, प्रथमरक्षी = 'जानुक ! स्फुरतो मम हस्तौ अस्य बधार्थं सुमनसः पिनद्धुम् ।

द्वितीयः - एष नः स्वामी पत्रहस्तः राजशासनं प्रतीक्ष्य इतोमुखो दृश्यते । गृध्रवलिर्भविष्यति । शुनोमुखं वा द्रक्षति । अनन्तरं राजशालकः आगत्य कथयति, मुच्यतामेष जालोपजीवी । उपपन्नः खलु अस्याङ्गुलीयकस्यागमः । ततः राज्ञा प्रदत्तं पुरस्कारं धीवराय प्रदाय तं मुक्तं कृतवन्तः ते । धीवरोऽपि लब्धपुरस्कारात् मद्यपानाय किञ्चित् राजश्यालाय ददाति । अयं मुद्रिकालाभप्रसङ्गः अत्र प्रवेशकमाध्यमेन निर्व्यूढः । विष्कम्वकः यथा पूर्वापरघटनायाः संयोजकः तथा प्रवेशकः अपि । परन्तु उभयोर्मध्ये पार्थक्यमिदं यत् विष्कम्भकः यस्य कस्यापि अङ्कस्य प्रारम्भे भवेत् । एवमपि प्रथमाङ्कारम्भेऽपि विष्कम्भकः भवेत् । शुद्धसंकीर्णरूपेण विष्कम्वकः द्विविधः । केवलं मध्यमपात्रप्रयुक्तत्वात् शुद्धविष्कम्भकः भवेत् । विष्कम्भकेऽपि संस्कृतभाषा अथवा संस्कृतप्राकृतभाषा च व्यवह्रियते । प्रवेशकः द्वयोः अङ्कयोः मध्ये व्यवह्रियते । प्रथमाङ्कस्य प्रारम्भे प्रवेशकः न व्यवह्रियते । प्रवेशके केवलं नीचपात्राणि प्रयुज्यन्ते । केवलञ्च प्राकृतभाषा प्रवेशके उपयुज्यते । अयं तावत् भेदः विष्कम्भकप्रवेशकयोर्मध्ये इति ।

## ख. मुद्रिकादर्शनानन्तरं राज्ञः पूर्वकथास्मरणम् -

ततः प्रमदवने वसन्तोत्सवाय पुष्पचयनं करोति सखीद्वयम् । कञ्चुकी एतत् कर्म कर्तुं निषेधति । सः कथयति राज्ञा दुष्यन्तेन वसन्तोत्सवः प्रतिषिद्धः । वस्तुतः धीवरसकाशात् मुद्रिकामाप्य दुर्वाससः शापः विनष्टः । अधुना राज्ञः शकुन्तलाविषयकघटणा स्मृतिपथमागता । सः तच्चिन्तया व्याकुलः सन् वसन्तोत्सवं निषेधति ।

ततः राजा चिन्तितावस्थायां विदूषकेन सह पुष्पोद्यानं गच्छति । तत्र प्रतिहारीं राजा कथयति, वेत्रवति ! मद्वचनादमात्यमार्यपिशुनं ब्रूहि, चिरप्रबोधान्न सम्भावितमस्माभिरद्य धर्मासनमध्यासितुम् । यत् प्रत्यवेक्षितं पौरकार्यमार्येण तत् पत्रमारोप्य दीयतामिति । ततः राजा विदूषकेन सह माधवीलतामण्डपं गतः । तत्र सः शकुन्तलायाः पूर्वामवस्थां स्मृत्वा विकलकरणः भवति । विदूषकः राजानं सान्त्वयन् कथयति, भोः! किमेतत् । अनुपपन्नं खलु ईदृशं त्वयि । कदापि सत्पुरुषाः शोकवास्तव्याः न भवन्ति । ननु प्रवातेऽपि निष्कम्पाः गिरयः । राजा कथयति 'निराकरणविक्लवायाः प्रियायाः अवस्थामनुस्मृत्य बलवदशरणोऽस्मि । राजसभायां यदा अहं तां प्रत्याख्यानवान् तदा सा स्वजनमनुगन्तुमिच्छति । परन्तु गुरुशिष्यः शार्ङ्गरवः कुपितः सन् तमनुसर्तुं वारयति । तत्र सा क्रन्दन्ती सती पुनः वाष्पप्रसरमक्षि मयि न्यस्तवती । एतत् दृश्यं चिन्तयित्वा अहमिदानीं विषशल्यदग्धमिव आत्मानं मन्ये । ततः राजा अङ्गुलीयकं बिलोक्य कथयति, हे अङ्गुलीयक ! नूनं मम इव तव सुकृतमल्पमिति अहं चिन्तयामि । यतोहि प्रियायाः शकुन्तलायाः रक्तनखयुक्तात् अङ्गुष्ठात् त्वं पतितमसि । विदूषकः तदा राजानं पृच्छति, प्रिय ! इयं मुद्रिका कथं शकुन्तलायाः हस्तं प्रापिता ? राजा उत्तरति, सखे ! स्वनगरं प्रस्थितं मां प्रिया सवाष्पमाह - 'कियच्चिरेणार्यपुत्रः प्रतिपत्तिं दास्यतीति' । ततः इमां मुद्रिकां तदङ्गुलौ निवेशयता मया सा प्रत्यभिहिता ।

'एकैकमत्र दिवसे दिवसे मदीयं नामाक्षरं गणय गच्छसि यावदन्तम् ।
तावत्प्रिये मदवरोधगृहप्रवेशं नेता जनस्तव समीपमुपैष्यतीति' ॥

राजा कथयति, हे प्रिये ! अत्र मुद्रिकायां दुष्यन्तः इति नाम लिखितमस्ति । प्रतिदिनम् एकमेकमक्षरं गणय । यदा अन्तिमाक्षरं गणयसि तदा, अर्थात् इतः तृतीयदिने ममावरोधात् जनः आगत्य त्वां सबहुमानं नेष्यति । दुष्यन्तविदूषकयोः आलापसमये अस्मिन् चतुरिका नाम्नी दासी शकुन्तलायाः चित्रफलकं दुष्यन्तेन निर्मितमादाय तत्र उपस्थिता । चित्रे अन्यत् किमपि चित्रयितुं राजा चतुरिकां रङ्गवर्तिकामानेतुमादिशति । अनन्तरं राजा तूलिकया चित्रे मालिनीं नदीं कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीं च अङ्कितां कर्तुमियेष । चित्रे शकुन्तलायाः विम्बाधरं पिवन्तं भ्रमरं दृष्ट्वा राजा कुपितो भवति । तं कमलोदरबद्धं कर्तुमिच्छति राजा । ततः शकुन्तलामनुस्मरतः राज्ञः लोचनमश्रुक्लिन्नं भवति, येन सः चित्रगतां शकुन्तलां संपूर्णं द्रष्टुं न पारयति ।

अस्मिन्नभ्यन्तरे स्वयं महाराज्ञी वसुमती दुष्यन्तस्य निकटमागच्छति । मार्गमध्ये पत्रहस्तां प्रतिहारीं राज्ञः समीपमुपसर्पन्तीं दृष्ट्वा सा वसुमती दुष्यन्तस्य निकटं नागता । राजा एतत् ज्ञात्वा कथयति, 'कार्यज्ञा कार्योपरोधं मे परिहरति' ।

## ग. राज्ञः सुशासकत्वप्रकाशनम् -

ततः प्रतिहारी कथयति - 'अमात्यो विज्ञापयति , अर्थजातस्य गणनावहुलतया एकमेव पौरकार्यमवेक्षितम्, तद् देवः प्रत्यक्षीकरोतु । इति ।' राजा पत्रं पठति । पत्रे लिखितम् आसीत् यत् समुद्रव्यवहारी सार्थवाहोधनमित्रोनाम नौव्यसने विपन्नः । अनपत्यश्च तपस्वी । राजगामी तस्यार्थसंचय इति एतदमात्येन लिखितम् (सविषादम्) कष्टं खलु अनपत्यता । वेत्रवति ! बहुधनत्वात् बहुपत्नीकेन तत्र भवता भवितव्यम् । विचार्यतां यदि काचिदापन्नसत्त्वा तस्य भार्या स्यात् । ततः प्रतिहारी भणति, देव ! इदानीमेव साकेतकस्य श्रेष्ठिनः दुहिता निर्वृत्तपुंसवना जाया अस्य श्रूयते । राजा कथयति - ननु गर्भः पित्र्यं रिक्थम् अर्हति । गच्छ एवममात्यं ब्रूहि ।

अत्र राज्ञः दुष्यन्तस्य निर्लोभतां सुशासकतां च स्पष्टतया प्रकाशयितुं कविः पुनः लिखति ।

'येन येन वियुज्यन्ते प्रजाः स्निग्धेन बंधुना
स स पापादृते तासां दुष्यन्त इति घुष्यताम्' ॥

अत्र पद्ये दुष्यन्तस्य प्रजावात्सल्यं सूच्यते । दुष्यन्तः कथयति मम राज्ये याः याः प्रजा बंधुरहिताः पुत्रादिरहिताः वा सन्ति, अधुना घोषणा क्रियतां यत् दुष्यन्तः तासां प्रजानां सः बंधुः पुत्रादिर्वा अस्ति । ततः राजा स्वस्य अपुत्रिकतां शकुन्तलात्याज्यत्वं च स्मरन् आत्मनिन्दां करोति । सः कथयति -

'अस्मात्परं वत यथाश्रुति संभृतानि को नः कुले निवपनानि नियच्छतीति ।
नूनं प्रसूतिविकलेन मया प्रसिक्तं धौताश्रुशेषमुदकं पितरः पिवन्ति ।'

**अर्थः -** दुष्यन्तः कथयति, अस्माकमनन्तरं श्रुत्यनुसारेण कः अस्माकं कुले निवापाञ्जलिं प्रदास्यति ? अपत्यरहितस्य मम पितृगणः नूनं मदनन्तरं लोतकं पास्यति । राज्ञः एतादृशीमवस्थां स्वचक्षुषा दृष्ट्वा सानुमती नाम मेनकाप्रयुक्ता शकुन्तलायाः सखी शकुन्तलां राजावस्थां निवेदयितुं प्रस्थिता ।

## घ. अदृष्टसत्त्वं प्रति दुष्यन्तस्य उक्तिः -

अनन्तरम् एका अद्‌भुता घटना घटिता। अदृष्टरूपी कश्चित् सत्त्वविशेषः आगत्य विदूषकं बलात् नीत्वा मेघ -च्छन्दस्य प्रासादस्य उपरि गतः। विदूषकः शून्ये कथयति - 'अविहा अविहा : अहमत्रभवन्तं पश्यामि, त्वं मां न पश्यसि। विड़ालगृहीतो मूषक इव निराशोऽस्मि जीविते संजातः। राजा एतत् श्रुत्वा कथयति - भोस्तिरस्करिणीगर्वित ! मदीयं शस्त्रं त्वां द्रक्षति। एष तमिषुं सन्दधे।

'यो हनिष्यति बध्यं त्वां रक्ष्यं रक्षिष्यति द्विजम्।
हंसो हि क्षीरमादत्ते तन्मिश्राः वर्जयत्यापः' ॥

**अर्थः -** अदृश्यरूपेण स्थितं विदूषकं पीडयत् सत्त्वं प्रति दुष्यन्तः कथयति, यत् यद्यप्यहं त्वां साक्षात् द्रष्टुं न पारयामि, तथापि अहमेवं प्रकारकमिषुं त्यक्षामि, यः बध्यं त्वां हत्वा रक्षणीयं विदूषकं रक्षिष्यति, यथा हंसाः जलमिश्रितक्षीरात् केवलं क्षीरं पीत्वा जलं वर्जयन्ति।

राज्ञः वचनं श्रुत्वा अदृश्यरूपेण स्थितः इन्द्रप्रेरितः मातलिः विदूषकं त्यक्त्वा दुष्यन्तस्य पुरस्तात् साक्षादुपस्थितः। मातलिः दुष्यन्तं कथयति, राजन् अधुना स्वर्गे असुराः उपद्रवं कुर्वन्ति। अतः ते असुराः भवतः शरव्यतां नेयाः। अर्थात् भवता ते असुराः हन्तव्याः। भवान् मयि उद्दिष्टं शरासनमिदं तेषु असुरेषु लक्ष्यीकरोतु। सज्जनानां प्रसादसौम्यं नयनं सुहृज्जने पतेत् न दारुणः शरः।

## ङ. राजानं प्रति मातलेरुक्तिः -

ततः राजा मातलेः स्वागतं करोति। विदूषकः कथयति, - 'अहं येन इष्टिपशुमारं मारितः, सोऽनेन स्वागतेन अभिनन्द्यते ! ततः मातलिः स्वागमनप्रयोजनं दुष्यन्ते निवेदयति। सः कथयति, अहम् इन्द्रेण प्रेषितः। यतोहि कालनेमिसुताः दुर्जयाः दानवाः सन्ति। ते दानवाः इन्द्रेण निवारयितुं न शक्यन्ते। भवान् केवलं तेषां दमयिता। यतोहि अन्धकारविनाशकः सूर्यः रात्रौ अन्धकारं दूरीकर्तुं न समर्थः। केवलं चन्द्र एव निशागतमन्धकारं वारयितुं शक्नोति।

अथ राजा 'त्वया माढव्यं प्रति एतादृशः व्यवहारः कथं कृतः' इति यदा मातलिं पृच्छति, तदा मातलिरुत्तरति - 'किञ्चिन्निमित्तादपि मनःसन्तापादायुष्मान् मया विक्लवः दृष्टः। पश्चात् कोपयितुमायुष्मन्तं तथा कृतवानस्मि। यतो हि -

'ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणां कुरुते
प्रायः स्वं महिमानं क्षोभात् प्रतिपद्यते हि जनः।'

**अर्थः -** मातलिः कथयति, यदि अग्निः चालितेन्धनः भवति, अर्थात् अग्नौ काष्ठं चालितं भवति तर्हि अग्निः प्रज्वलितः भवति। यदि पन्नगः (सर्पः) कोपितः भवति, तर्हि सः फणाम् उत्तोलति। तथा यदि कश्चित् जनः क्षोभितः भवति तर्हि सः स्वमहिमानं दर्शयति। अत्र कथनस्य सारः अयं यत्, राजा शकुन्तलां स्मरन् पर्याकुलितमानसः आसीत्। एवम् अवस्थायामासीनः राजा कदाचित् असुरमारणाय वीतस्पृहोभवेदिति समाकलय्य मातलिः राज्ञः मनः क्षोभयितुं अवस्थान्तरं प्रापयितुं च एवं कृतवान्।

अनन्तरं राजा अमात्यं पिशुनं प्रजापालनकर्मणि नियोज्य मातलिना सह राक्षसमारणाय इन्द्रपुरं प्रति जगाम।

॥ अनेन प्रकारेण षष्ठाङ्कस्य विषयवस्तु क्रमिकतया सूचितम् ॥

## ३. बोधप्रश्नाः -

१. हंसपदिका केन प्रकारेण स्व मनोदुःखं राज्ञे निवेदितवती ?

२. शार्ङ्गरवः शारद्वतश्च जनाकीर्णं राजपुरमासाद्य किम् अनुभूतवान् ?

३. दुष्यन्तं प्रति कण्वः शकुन्तलामभिलक्ष्य किं संदिष्टवान् ?

४. राजसभायां मुनिकुमारदुष्यन्तयोः मध्ये शकुन्तलामाश्रित्य जातम् परुषकथोपकथनं लिखत ?

५. शाकुन्तले धीवरवृत्तान्तं लिखत ?

६. मुद्रिकाप्राप्तेरनन्तरं दुष्यन्तस्य अवस्था कीदृशी जाता ?

७. 'गर्भः पित्र्यं रिक्थमर्हति' इति दुष्यन्तोक्तेः तात्पर्य्यं किम् ?

८. अदृश्यरूपेणागतः मातलिः विदूषकं किमर्थं पीडितवान् ?

# षष्ठभागः ( Unit - VI)

**अस्मिन् विभागे वक्ष्यमाणविषयाः आलोचिताः सन्ति । १- सप्तमाङ्कस्य विषयक्रमः- क) हेमकूटे तपस्यतःमुनेः वर्ण्णनम्, ख) राज्ञः सर्वदमनदर्शनम्, ग) सर्वदमनं विलोक्य राज्ञः मनोभावः, घ) हेमकूटे दुष्यन्तेन सह शकुन्तलायाः मिलनम्, ङ) पत्नीपुत्राभ्यां सह दुष्यन्तस्य मारीचदर्शनम्, च) दुष्यन्तस्य कृते मारीचस्याशीर्वादः, छ) भरतवाक्यं नाटकस्य समाप्तिः च ।**

**२. बोधप्रश्नाः ।**

---

## १- सप्तमाङ्कस्य विषयक्रमः-

सप्तमाङ्कस्य प्रारम्भे मातलि-दुष्यन्तयोरालापात् ज्ञायते यत् - इन्द्रेण सत्कृतः दुष्यन्तः तं यथेष्टं प्रशंसति । इन्द्रोऽपि दुष्यन्तस्य असुरमारणकर्मणि जातप्रीतः तं स्वसिंहासनोपरि उपावेशयति । सर्वेषां सुराणां समक्षं सः हरिचन्दनचिह्नितां मन्दारमालां स्ववक्षःस्थलादुत्तार्य्य दुष्यन्तस्य कण्ठे परिधापितवान् । ततः स्वर्गात् प्रत्यावर्तनकाले मातलिं सम्बोध्य राजा कथयति, मातले ! मया यदसुरमारणं कृतं तत्र इन्द्रः मूलमेव । यदि सूर्यः अरुणं सारथित्वेन स्वरथे नियुक्तं नाकरिष्यत् तर्हि सः अन्धकारम् उन्मूलयितुं किं समर्थः अभविष्यत् ।

'किं वाऽभविष्यदरुणस्तमसां विभेत्ता तं चेत् सहस्रकिरणो धुरि नाकरिष्यत्' ।

अनन्तरं दुष्यन्तं रथेन धृत्वा मातलिः हेमकूटशिखरमागतः । तत्र हेमकूटे मारीचस्याश्रमं दर्शयन् मातलिः कथयवति-

## क) हेमकूटे तपस्यतःमुनेः वर्ण्णनम्-

'वल्मीकार्धनिमग्नमूर्तिरुरसा सन्दष्टसर्पत्वचा
कण्ठे जीर्णलताप्रतानवलयेनत्यर्थसंपीडितः ।
अंसव्यापिशकुन्तनीडनिचितं विभ्रज्जटामण्डलं
यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कविम्बं स्थितः' ।

**अर्थः –** मातलिः कथयति असौ पुरोदृश्यमानः मारीचस्याश्रमः । यत्र वल्मीकमध्ये लुक्कायितः, सर्पत्वचा वेष्टितः, लताप्रतानेन निवद्धकण्ठपाशः, स्कन्धदेशपर्यन्तं शकुन्तनीडेन व्याप्तः, जटामण्डलेन व्याप्तशिराः स्थाणुः इव मुनिः सूर्यमालोकमानः तपः करोति । राजा मारीचस्याश्रमं प्रविश्य कथयति, स्वर्गादधिकतरं निर्वृत्तिस्थानम् एतत्, अमृतह्रदे इवावगाढोऽस्मि । तत्र रथादवतीर्य ऋषीणां तपोवनभूमिं पश्यति दुष्यन्तः । तपोवनस्य वर्णने कविः लिखति ।

'प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणुकपिशे धर्माभिषेकक्रिया ।
ध्यानं रत्नशिलातलेषु विबुधस्त्रीसंनिधौ संयमाः
यत् काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिन् तपस्यन्त्यमी' ।

**अर्थः –** कल्पवृक्षशोभिते वने केवलं पवनं निषेव्य मुनयः प्राणान् धारयन्ति। अपरे केचन मुनयः स्वर्णपद्मशोभिते जले धर्मार्थं स्नानक्रियादिकं संपादयन्ति। अपरे केचन रत्नशिलातले ध्यानं कुर्वन्ति। यत्र विबुधस्त्रियः सन्ति तत्रापि एते संयमाः सन्तः तिष्ठन्ति। अन्ये मुनयः यत् स्थानं प्राप्तुमिच्छन्ति तत्र एते मुनयः अपि तपस्यन्ति।

तस्मिन् आश्रमे मारीचः स्वपत्न्या दक्षकन्यया अदित्या पातिव्रत्यधर्मविषये पृष्टः सन् अन्यमहर्षिसहितायै तस्यै तद्धर्मविषये उपदिशति, अतः उपदेशप्रदानान्तं यावत् राजा मारीचदर्शनाय अपेक्षते। तदानीं दुष्यन्तस्य बाहुस्फुरणमभवत्। सः एतदर्थं स्वयं चिन्तयति।

मनोरथाय नाशंसे किं बाहो! स्पन्दसे वृथा।
पूर्वावधीरितं श्रेयो दुःखं हि परिवर्तते' ॥

**अर्थः –** राजा स्फुरितं स्वबाहुं कथयति, हे बाहो! वृथां त्वं कथं स्पन्दसे। मम आशापूर्तिः भविष्यतीति मे विश्वासो नास्ति। (शकुन्तलया सह पुनर्मिलनं दुष्यन्तस्याशा) अतः तव स्फुरणं व्यर्थम्। यतोहि स्वयम् आगतं श्रेयो यदि कश्चिन्निराकरोति, तर्हि तस्य श्रेयसः पुनः प्राप्तिः सुलभा न भवति।

## ख) राज्ञः सर्वदमनदर्शनम् –

अस्मिन्नभ्यन्तरे राजा द्वाभ्यां तपस्विनीभ्याम् अवरुद्धम् अबालसत्त्वं कमपि शिशुं पश्यति। सः शिशुः मातुः सकाशात् अर्धपीतस्तन्यं सिंहशिशुं बलात्कारेण कर्षति। आकर्षणेन सिंहशिशोः केसरः मर्दितः भवति। सिंहशिशुना सह क्रीडितुं शिशुरयं तं समाकर्षति। एतत् कविः श्लोकरूपेण लिखति यथा – 'अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम्
प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति ॥

तदानीं बालकः सिंहशिशुं कथयति - जृम्भस्व सिंह! दन्तान् ते गणयिष्ये। तदा प्रथमा तपस्विनी कथयति अविनीत! किं नः अपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि ? हन्त! वर्धते ते संरम्भः। स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि। ततः राजा चिन्तयति, - किं नु खलु -

'बालेऽस्मिन् औरस इव पुत्रे स्निह्यति मे मनः'

नूनम् अनपत्यता मां वत्सलयति।

पुनः राजा चिन्तयति - महतस्तेजसोवीजं बालोऽयं प्रतिभाति मे।
स्फुलिङ्गावस्थया वह्निरेधापेक्ष इव स्थितः'।

अर्थात् अयं बालकः महतः तेजसः वीजस्वरूपः इति मया अनुभूयते अपि च काष्ठापेक्षी अग्निरिव मे अयं प्रतिभाति। तस्मिन् काले प्रथमा तपस्विनी बालकं कथयति, वत्स एनं बालं मृगेन्द्रं मुञ्च, अपरं ते क्रीडनीयकं दास्यामि। बालः- कुत्र देहि एतत्। तस्मिन् काले राजा दुष्यन्तः बालकस्य हस्ते चक्रवर्तिलक्षणं पश्यति। ततः बालकः कथयति अहम् अनेन सिंहशिशुना क्रीडिष्यामि। बालकं प्रति राज्ञः क्रमशः वात्सल्यस्नेहः वर्धितः, सः चिन्तयति - 'स्पृहयामि खलु दुर्ललिताय अस्मै। कविः दुष्यन्तस्य भावनां चित्रयितुं लिखति।

आलक्ष्यदन्तमुकुलान् अनिमित्तहासैरव्यक्तवर्णरमणीयवचः प्रवृत्तीन्
अङ्काश्रयप्रणयिनस्तनयान् वहन्तो धन्यास्तदङ्गरजसा मलिनीभवन्ति' ॥

**अर्थः –** राजा चिन्तयति ते तावत् पुण्यशालिनः जना भवन्ति ये तावत् शिशूनाम् अङ्गरजसा मलिना भवन्ति, अपि च विना कारणेन अल्पहसनकाले येषां शिशूनां दन्तमुकुलम् ईषद्दृश्यमानं भवति, किञ्चित् वक्तुकामत्वात् अस्पष्टवचःप्रवृत्तिः येषां शिशूनां भवति । एवं भूतान् शिशून् ये स्वाङ्के उपवेशयन्ति ते धन्याः । अत्र श्लोके राज्ञः वात्सल्यप्रीतिः स्पष्टतया चित्रिता वर्तते । ततः बालकहस्तात् सिंहशिशुं मोचयितुं तापसी कथयति, 'भवतु न मां गणयति अयम्, (पार्श्वमबलोक्य) कोऽत्र ऋषिकुमाराणाम् । (राजानमबलोक्य) भद्रमुख ! एहि तावत् मोचयानेन दुर्मोचनहस्तग्रहेण डिम्भलीलया बाध्यमानं बालमृगेन्द्रम् ।

**राजा –** (उपगम्य सस्मितम्) अयि भो महर्षिपुत्र !

'एवमाश्रमविरुद्धवृत्तिना संयमः किमिति जन्मतस्त्वया
सत्त्वसंश्रयसुखोऽपि दूष्यते कृष्णसर्पशिशुनेव चन्दनः' ।

**अर्थः –** राजा शिशुमुपलक्ष्य कथयति, हे महर्षिपुत्र ! आश्रमस्य विरुद्धनीतिमाचरता त्वया बाल्यकालादारभ्य सर्वेषां प्राणिनां सुखदायकः शरणदायकश्च आश्रमः कथं कलुषीक्रियते, यथा कृष्णसर्पेण चन्दनवृक्षः, अर्थात् मनोहरः सुगन्धयुक्तः चन्दनः यथा कृष्णसर्पेण दूष्यते तथा दुष्टेन त्वया निरपराधसिंहशिशुं कदर्थयता अयं शान्तवातावरणयुक्तः आश्रमः दूष्यते । इति ।

## ग) सर्वदमनं विलोक्य राज्ञः मनोभावः –

ततः राजा बालकं संस्पृश्य चिन्तयति, अस्याकारसमानं चेष्टितम्, अस्य कार्यकलापात् अनुमीयते असौ ऋषिकुमारः न भवेत् । तस्य स्पर्शसुखमनुभूय राजा भावयति, यत् –

अनेन कस्यापि कुलाङ्कुरेण स्पृष्टेषु गात्रेषु सुखं ममैवम् ।
कां निर्वृत्तिं चेतसि तस्य कुर्याद् यस्यायमङ्कात् कृतिनः प्ररूढः' ।

**अर्थः –** दुष्यन्तः चिन्तयति यदहं कस्यचिदपरस्य पुत्रमिमं संस्पृश्य अशेषमानन्दमनुभवामि । यस्यायं वस्तुतः पुत्रः तं कियदानन्दितं शिशुरयं न कुर्यात् । ततः तापसी कथयति, आश्चर्यस्य विषयोऽयं यत् भवतः (राज्ञः) आकृत्या सह अस्य बालस्याकृतिः समाना दृश्यते । अपि च अपरिचितस्य भवतः आनुकूल्यमाचरति बालोऽयम् । तत्र बालकस्य उत्पत्तिः पुरुवंशे एव इति तापसी राजानं श्रावयति, अपि च अप्सरःसम्बन्धेन बालकस्य जननी देवगुरोस्तपोवने बालकं जनयति इति उक्तवती । ततः राजा कथयति, अस्य बालस्य जननी कस्य राजर्षेः पत्नी । तापसी कथयति कस्तस्य धर्मदारपरित्यागिनः नाम सङ्कीर्तयेत् । अनन्तरं अपरा तापसी मृण्मयमयूरमानीय कथयति, सर्वदमन ! शकुन्तलावण्यं पश्य, सर्वदमनः अस्मिन् शब्दे विद्यमानं 'शकुन्तला' इति पदं मातृनाम्नि योजयित्वा कथयति, कुत्र वा मम माता । एतत् श्रुत्वा राजा चिन्तयति, 'किम्बा शकुन्तलेत्यस्य मातुराख्या' । अथवा सन्ति पुनर्नामधेयसादृश्यानि, अपि नाम मृगतृष्णिका इव नाममात्रप्रस्तावो मे विषादाय कल्पते ?'

अनन्तरं सर्वदमनस्य मणिबन्धात् सिंहशिशुविमर्दनेन भ्रष्टं रक्षाकरण्डकं राजा गृहीतवान् । एतद्दृष्ट्वा तापसीद्वयमतीवाश्चर्यान्वितं जातम् । यदा राजा कारणं पृच्छति तदा एका तपासी कथयति - शृणोतु महाराज, एषा अपराजिता नामौषधिः अस्य जातकर्मसमये भगवता मारीचेन दत्ता । एनां किल मातापितरौ आत्मानं च वर्जयित्वा अपरोभूमिपतितां न गृह्णाति । यदि अन्यः कोऽपि स्पृशति, तर्हि सर्पोभूत्वा तं दशति । ततः राजा पृच्छति, भवतीभ्यां कदाचिदस्याः विक्रिया प्रत्यक्षीकृता ? उभे उत्तरतः - अनेकशः । परन्तु राज्ञः कृते एतादृशं किमपि न घटितम् । ततः राजा सर्वदमनमात्मनः पुत्रं विचिन्त्य सहर्षमात्मगतं चिन्तयति - 'कथमिव संपूर्णमपि मे मनोरथं नाभिनन्दामि ! (इति बालं परिष्वजते) ततः सखीद्वयम् इमां घटनां शकुन्तलायै निवेदयितुं प्रस्थितम् ।

ततः बालकः दुष्यन्तं कथयति, 'मुञ्च माम्, यावत् मातुः समीपं गमिष्यामि' राजा कथयति 'मया सह एव मातरमभिनन्दिष्यसि' । ततः बालकः कथयति, मम पिता दुष्यन्तः न त्वम् । राजा कथयति - 'एष विवाद एव प्रत्याययति' ।

## घ) हेमकूटे दुष्यन्तेन सह शकुन्तलायाः मिलनम् -

अतः परम् एकवेणीधरा शकुन्तला आगच्छति । राजा विरहिणीं शकुन्तलां पश्यति । तदा विरहिणीशकुन्तलां कविः वर्णयति ।

'वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः
अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं बिभर्ति'।

**अर्थः -** शकुन्तला मलिनवस्त्रद्वयं परिहितवती । सा तदानीमेकवेणीधरा अपि आसीत् । विरहव्रतद्वारा तस्याः मुखं क्षीणमासीत् । इयं शकुन्तलापि दयाहीनस्य दुष्यन्तस्य कृते दीर्घदिनं यावत् विरहव्रतं धारयति । पतिव्रतायाः शकुन्तलायाः अविकलं चित्रमुपस्थापितमत्र कविना । राजा तत्र शकुन्तलां वीक्ष्य कथयति, प्रिये ! क्रौर्य्यमपि मे त्वयि प्रयुक्तमनुकूलपरिणामं संवृतम्, यदहमिदानीं त्वया प्रत्यभिज्ञातमात्मानं पश्यामि ।

शकुन्तला - हृदय ! आश्वसिहि, आश्वसिहि ! परित्यक्तमत्सरेणानुकंपितास्मि दैवेन । आर्यपुत्रः खलु एषः । राजापि शकुन्तलां कथयति, प्रिये ! सौभाग्यात् मम स्मृतिपथे पूर्ववृत्तान्तः समागतः । तेन ममाज्ञानं दूरीभूतम् । ततः त्वं मम समक्षमुपस्थितासि । यथा ग्रहणादनन्तरं रोहिणी चन्द्रेण सह मिलिता भवति तथा त्वं मया सह मिलिताऽसि । ततः शकुन्तला - 'जयतु जयतु आर्यपुत्रः' इति कथयित्वा वाष्पकण्ठी सती विरमति । राजा कथयति, सुन्दरि !

'वाष्पेण प्रतिषिद्धेऽपि जयशब्दे जितं मया
यत्ते दृष्टमसंस्कारपाटलोष्ठपुटं मुखम्' ।

**अर्थः -** राजा कथयति, हे सुन्दरि ! वाष्पावरुद्धकण्ठत्वात् यद्यपि त्वं संपूर्णमुच्चारयितुमसमर्था तथापि मया जयशब्दः गृहीतः । यतोहि विरहवशात् असंस्कृतायाः तव पाटलवर्णौष्ठयुक्तमुखं मया दृष्टम्, अर्थात् मम प्राणप्रियां त्वां बहुदिनानन्तरं लबध्वा अहमद्य विजयी जातः । अनन्तरं राजा शकुन्तलायाः पादयोः प्रणिपत्य कथयति -

सुतनु हृदयात् प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसः संमोहो मे तदा बलवानभूत् ।
प्रबलतमसामेवं प्रायाः शुभेषु हि वृत्तयः ।
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया' ।

**अर्थः** – राजा शकुन्तलायाः चरणयोः प्रणिपत्य कथयति, हे सुन्दरि ! तव हृदयात् मया कृतपरित्यागजनितं दुःखं दूरीभवतु । तदा (यदा त्वं मम राजसभामागता) मम मनसि महत् अज्ञानमासीत् । यतोहि एवं दृश्यते यत् प्रायशः शुभबेलायामेतादृशमज्ञानं जायते । यथा कश्चित् अन्धः स्वगलायां अन्येन केनचित् पातितां मालाम् अहिशङ्कया सत्वरं क्षिपति, तथा अहमपि भवतीं राजसभायां परित्यक्तवान् ।

ततः शकुन्तला राजानं कथयति - उत्तिष्ठतु आर्यपुत्र । नूनं मे सुचरितप्रतिबन्धकं पुराकृतं तेषु दिवसेषु परिणामाभिमुखमासीद् येन सानुक्रोशोऽप्यार्यपुत्रः मयि विरसः संवृत्तः । ततः शकुन्तला पृच्छति - 'अथ कथमार्यपुत्रेण स्मृतोऽयं दुःखभाग् जनः ? राजा उत्तरति

'मोहान्मया सुतनु पूर्वमुपेक्षितस्ते यो वाष्पबिन्दुरधरं परिवाधमानः
तं तावदाकुटिलपक्ष्मविलग्नमद्य कान्ते प्रमृज्य विगतानुशयो भवेयम्' ॥

**अर्थः** – राजा कथयति हे प्रिये ! सुतनु ! मम राजसभायां पूर्वं तवाधरं वाधमानः अश्रुप्रवाहः मया उपेक्षितः आसीत्, अर्थात् क्रन्दन्तीं त्वामहमुपेक्षितवान् । अद्याहं तव आकुटिलनेत्रपक्ष्मसु संसक्तं तमश्रुप्रवाहम् अपनीय पश्चात्तापरहितः भवितुमिच्छामि । ततः राजा मुद्रिकां दर्शयित्वा कथयति, अस्मादङ्गुलीयोपलम्भात् खलु स्मृतिः उपलब्धा । ततः राजा - ' तेन हि ऋतुसमवायचिह्नं प्रतिपद्यतां लता कुसुमम् इत्युक्त्वा शकुन्तलाकरे यदा मुद्रिकामर्पयति तदा शकुन्तला कथयति, आर्यपुत्रः एव एतत् धारयतु' ।

अनेन प्रकारेण दुष्यन्तशकुन्तलयोः मिलनं संजातम् । ततः परं मातलिः आगच्छति । मातलिं राजा कथयति, - 'अभूत् संपादितस्वादुफलो मे मनोरथः । न खलु विदितोऽयमाखण्डलेन वृत्तान्तः स्यात् । अतः स एवाधुना द्रष्टव्यः अस्माभिः ।

## ङ) पत्नीपुत्राभ्यां सह दुष्यन्तस्य मारीचदर्शनम् –

मातलिः - (सस्मितम्) किमीश्वराणां परोक्षम् । एतु आयुष्मान्, भगवान् मारीचस्ते दर्शनं वितरति । ततः राजा शकुन्तलां पुरस्कृत्य सपुत्रः मारीचदर्शनार्थं गतः । ततः मारीचः स्वपत्नीनिकटे दुष्यन्तं परिचाययति । ततः राजा अदित्या सह स्थितस्य मारीचस्य समीपं गत्वा प्रणमति । मारीचः आशिषं वितरन् कथयति - 'वत्स ! चिरं जीव, पृथिवीं पालय । अदितिरपि आशिषं दत्वा कथयति, - वत्स ! अप्रतिरथो भव । अनन्तरं शकुन्तला सपुत्रा मारीचं प्रणमति । आशीर्वादप्रदानव्याजेन मारीचः कथयति ।

'आखण्डलसमो भर्ता जयन्तप्रतिमः सुतः
आशीरन्या न ते योग्या पौलोमीसदृशी भव' ।

**अर्थः** – शकुन्तले तव पतिः इन्द्रतुल्यः भवति । तव पुत्रः सर्वदमनोऽपि इन्द्रपुत्रजयन्तसमानः भवति । त्वमपि इन्द्राणीतुल्या (पौलोमीसदृशी) असि । इतोऽपि अधिका आशीः तव कृते किं वा दास्यामि !

अदितिरपि कथयति, वत्से ! भर्तुः वहुमता भव । अयं च दीर्घायुः वत्सकः उभयकुलनन्दनः भवतु । ततः मारीचः एकैकं निर्दिशन् वदति -

'दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान्
श्रद्धा वित्तं विधिश्चेति त्रितयं तत् समागतम्' ।

अत्र मारीचः वदति शकुन्तला साध्वी, तस्याः अपत्यं सत्, भवान् दुष्यन्तः अपि साधुः, अतः यूयं त्रयः श्रद्धा वित्तं विधिश्च भवथ । अर्थात् शकुन्तला श्रद्धा भवति, इदमपत्यं (सर्वदमनः) वित्तं दुष्यन्तश्च विधिः भवति ।

अनन्तरं दुष्यन्तः पूर्ववृत्तान्तं मारीचपुरस्तादुपस्थापयति । सः कथयति - भगवन् इमामाज्ञाकरीं वः गान्धर्वेण विवाहविधिना उपयम्य कस्यचित् कालस्य बन्धुभिरानीतां स्मृतिशैथिल्यात् प्रत्यादिशन्नपराद्धोऽस्मि तत्र भवतो युष्मद्गोत्रस्य कण्वस्य । पश्चादङ्गुलीयकदर्शनादूढपूर्वां तद् दुहितरमवगतोऽहम् । तच्चित्रमिव मे प्रतिभाति । ततः मारीचः कथयति यदैवाप्सरस्तीर्थावतरणात् प्रत्यक्ष वैक्लव्यां शकुन्तलामादाय मेनका दाक्षायणीमुपगता तदैव ध्यानादवगतोऽस्मि, दुर्वाससः शापादियं तपस्विनी सहधर्मचारिणी त्वया प्रत्यादिष्टा नान्यथेति । स चायमङ्गुलीयकदर्शनादवसानः ।

## च) दुष्यन्तस्य कृते मारीचस्याशीर्वादः -

ततः मारीचः शिष्येण कण्वं प्रति वार्त्तां प्रेरयति यत् पुत्रवती शकुन्तला तत्शापनिर्वृत्तौ स्मृतिमता दुष्यन्तेन प्रति गृहीतेति । ततः पुनः आशीर्वादप्रदानव्याजेन मारीचः कथयति, राजन् -

'तव भवतु विडौजाः प्राज्यवृष्टिः प्रजासु
त्वमपि विततयज्ञो वज्रिणं प्रीणयस्व ।
युगशतपरिवर्तानेवमन्योन्यकृत्यै-
र्नयतमुभयलोकानुग्रहश्लाघनीयैः' ।

**अर्थः -** हे राजन् ! इन्द्रः तव राज्ये प्रचुरां वृष्टिं करोतु । त्वमपि राज्ये सर्वदा यज्ञं कृत्वा इन्द्रं तोषय । एवं प्रकारेण युवां परस्परानुकूलानि कर्माणि देवतामानव-उपकारकाणि विधाय शतयुगान् व्याप्य देदीप्यमानौ भवतम् ।

## छ) भरतवाक्यं नाटकस्य समाप्तिः च -

अन्तिमे मातलिवाहितं रथमारुह्य पुत्रपत्नीभ्यां सह दुष्यन्तः स्व राजधानीं प्रस्थितः । अनन्तरं मारीचः कथयति, वत्स ! इतः परं किं ते भूयः प्रियमुपकरोमि ।

राजा कथयति - अतःपरमपि प्रियमस्ति ! यदीह भगवान् प्रियं कर्तुमिच्छति, तर्हि इदमस्तु -

भरतवाक्यम् - 'प्रवर्ततां प्रकृतिहिताय पार्थिवः
सरस्वती श्रुतिमहती महीयताम् ।
ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः' ॥

**अर्थः –** नाटकस्य नियमानुसारेण नाटकस्य शेषे भरतवाक्यं भवेत्। भरतवाक्यमपि आशीर्वादसूचकम्। भरतवाक्यं सर्वैः अभिनयं कुर्वाणैः पात्रैः पठ्यते। अत्र भरतवाक्यस्य तात्पर्यमिदं यत् - राज्ये राजा प्रजाहिताय सदा प्रस्तुतः भवतु। सरस्वती अर्थात् शिक्षा व्यवस्था महीयताम् अर्थात् राज्ये वर्धताम्। नीललोहितः शिवः भगवान् अस्माकमपि पुनर्जन्म नाशयतु। तस्याशिषा पुनर्जन्म न भवतु इत्यर्थः।

भरतवाक्यानन्तरम् अभिज्ञानशाकुन्तलनाटकं कालिदासरचितं समाप्तं भवति। समाप्तञ्चेदं नाटकम्।

## २. बोधप्रश्नाः –

१. दुष्यन्तोपरि सन्तुष्टः इन्द्रः केन प्रकारेण तं सत्कृतवान् ?

२. मारीचाश्रमस्य वर्णनं क्रियताम्।

३. सर्वदमनवृत्तान्तमालोचयत।

४. सर्वदमनं दृष्ट्वा दुष्यन्तस्य वात्सल्यस्नेहं प्रकाशयत।

५. अभिज्ञानशाकुन्तलस्य भरतवाक्यस्यार्थं लिखत।

# सप्तमभागः ( Unit - VII)

# वासवदत्ता,

## (प्रारम्भात् 'पुरान्निर्जगाम' इत्यन्तं यावत्) अङ्का - ५०

**अस्मिन् विभागे वक्ष्यमाणविषयाः आलोचिताः सन्ति । १- आमुखम्, २) गद्यभेदः, ३) गद्यस्य वैशिष्ट्यम्, ४) गद्यस्य विकासः, ५) केषाञ्चन लौकिकसंस्कृतगद्यकाराणां परिचयः, ६. वासवदत्तागद्यकाव्यस्य समीक्षा, ७) बोधप्रश्नाः ।**

---

## १. आमुखम् -

गद्यपद्यचम्पूकाव्यरूपेण संस्कृतसाहित्यस्य रूपत्रयं वर्तते । तत्र गद्यसाहित्यं विशिष्टस्थानं संस्कृतसाहित्ये विभर्ति । वैदिकसंहितादिषु प्रथमगद्यधारा द्रष्टुं शक्यते । त्रैत्तिरीयसंहितायां गद्यभागः पद्यभागेन सह प्रायशः समानः भवति । अथर्ववेदस्य षष्ठःभागः गद्यात्मकः भवति । समग्रब्राह्मणग्रन्थाः अपि गद्यात्मकाः भवन्ति । आरण्यकग्रन्थसमुदायेष्वपि गद्यस्य प्राचुर्य्यं दृश्यते । एवं समग्रवैदिकवाङ्मये गद्यस्य स्थितिः भवति । एतेन ज्ञायते संस्कृतगद्यस्योत्पत्तिः वैदिककालात् एव अभवत् ।

क्रमशः लौकिकसाहित्यस्याविर्भावः जातः । लौकिकसंस्कृतसाहित्ये गद्यस्य मात्रा न प्रचुरा संजाता । दर्शनग्रन्थेषु केचन सिद्धान्ताः गद्येन रचिताः सन्ति । ज्योतिषशास्त्रेषु आयुर्वेदशास्त्रेषु च प्रायशः गद्यस्य स्थानं नास्ति । यद्यपि चरकसंहितायां गद्यस्य स्वल्पं स्थानं वर्तते, तथापि अन्येषु वैद्यकशास्त्रेषु छन्दोबद्धं पद्यं चकास्ति । संस्कृतसाहित्यग्रन्थेषु गद्यस्य भागः अल्पः भवति । पद्यं प्रति लेखकस्य पक्षपातित्वात् पद्यसाहित्यस्य प्रचारः प्रसारश्चाधिकः अस्ति ।

## २. गद्यभेदः -

आलङ्कारिकाणां सिद्धान्तानुसारेण कथा-आख्यायिकाभेदेन गद्यं द्विविधम् । आलङ्कारिकः भामहः सर्वप्रथमतया कथा-आख्यायिकयोः मध्ये भेदं प्रकाशितवान् । काव्यालङ्कारे(१/२५-२९) सः प्रकाशयति यत् आख्यायिकायाः कथावस्तु वास्तविकं भवति । आख्यायिकायां विषयविभागे उच्छ्वासस्य स्थितिर्भवेत् । उच्छ्वासस्यादौ अन्ते च भाविघटनाया विषयवस्तु श्लोकरूपेण तिष्ठेत् । असौ श्लोकः वक्त्रछन्दसा अथवा अपरवक्त्रछन्दसा रचितः स्यात् ।

परन्तु कथायाः विषयवस्तु कवेः स्वकीयं कल्पनाप्रसूतं भवति । इमं तावत् भामहस्य अभिप्रायं दण्डी प्रबलया युक्त्या खण्डितवान् (काव्यादर्शः, १/२३-२८) । दण्डिमतेन कथा-आख्यायिकयोः मध्ये कश्चित् भेदोनास्ति । तस्य मतेन 'तत्कथाख्यायिकेत्यैका जातिः संज्ञाद्वयाङ्किता' । अत्र तात्पर्य्यमिदं यत् कथा आख्यायिका च इति एतत् द्वयं गद्यरूपजात्यन्तर्गतम् । केवलं नामकरणे भिन्ना संज्ञा भवति । रुद्रटः हेमचन्द्रश्च यद्यपि गद्यकाव्यविषये प्रकारविषये च किञ्चित् लिखति, तथापि एतत् न तथा प्रचलितम् ।

लौकिकसाहित्ये प्रथमतया यद्यपि रुद्रदाम्नः शिलालेखे (ख्री. १५०) गद्यस्य सत्ता दृश्यते तथापि ७म शतके आविर्भूतस्य बाणभट्टस्य रचनाद्वयं (कादम्बरी, हर्षचरितम्) पूर्णाङ्गगद्यकाव्यस्य प्रकृष्टमुदाहरणम्। बाणभट्टात् पूर्वं ६ष्ठशतके सुबन्धुना रचितं गद्यकाव्यं 'वासवदत्ता' अपि श्लेषमयं सत् गद्यकाव्येषु प्रथमस्थानमधिकरोति। बाणभट्टः स्वयमक्षरशः 'हर्षचरितम्' आख्यायिकारूपेण गणयति। असौ कथयति - 'तथापि नृपतेर्भक्त्या भीतोनिर्वहणाकुलः

करोम्याख्यायिकाम्भोधौ जिह्वाप्लवनचापलम्'। (ह.च.१/१९)

तस्य 'कादम्बरी' कथाकाव्यान्तर्गता भवति। कादम्बरी कथाकाव्यम् असौ 'अतिद्वयी' विशेषणेन योजयति। कादम्बर्य्यामसौ लिखति -

'द्विजेन तेनाक्षतकुण्ठकौण्ठ्यया महामनोमोहमलीमसान्धया
अलब्ध-वैदग्ध्यविलासमुग्धया धिया निबद्धेयमतिद्वयी कथा'। (काद-श्लो.२०)

विश्वनाथकविराजः साहित्यदर्पणे ६ष्ठपरिच्छेदे गद्यकाव्यस्य लक्षणं विभागं च करोति, यथा -

'वृत्तबन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च
भवेदुत्कलिकाप्रायं चूर्णकञ्च चतुर्विधम्।
आद्यं समासरहितं वृत्तभागयुतं परम्
अन्यत् दीर्घसमासाढ्यं तुर्य्यं चाल्पसमासकम्।

**तत्र -** कथायां सरसं वस्तु गद्यैरेव विनिर्मितम्
क्वचिदत्र भवेदार्य्या क्वचिद् वक्त्रापवक्त्रके।
आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्तनम्।

**अपि च -** आख्यायिका कथावत् स्यात् कवेर्वंशानुकीर्तनम्
अस्यामन्यकवीनाञ्च वृत्तं पद्यं क्वचित् क्वचित्
कथांशानां व्यवच्छेद आश्वास इति कथ्यते।
आर्य्यावक्त्रापवक्त्राणां छन्दसा येन केनचित्
अन्यापदेशेनाश्वासमुखे भाव्यर्थसूचनम्'।

आख्यायिका - कथयोर्मध्ये एतदेव पार्थक्यं वक्तुं शक्यते यत् आख्यायिकायां कथावस्तु अवश्यम् इतिहासप्रसिद्धं स्यात्। कथायाः विषयवस्तु कविकल्पितं स्यात्।

कवीनां प्रतिभाप्रागल्भ्यं गद्यकाव्यापेक्षया पद्येषु सहजतया विस्तारितं भवति। गद्यं तावत् कविप्रतिभायाः निकषोपलसमानं भवति। पद्यकाव्यं छन्दोमयं भवति। तत्र छन्दोनियमानुसारेण कविः बद्धः भवति। तत्र वर्णानां लघुगुरुनियमाः स्वाधिपत्यं विस्तारयन्ति। अतः कविः स्वतन्त्रतया किञ्चित् तत्र कर्तुं न शक्नोति। सः पद्यनियमेन अवरुद्धःसन् परतन्त्रःभवति। परन्तु गद्यकाव्यरचने एतत् वैपरीत्यं दृश्यते। स्वप्रतिभां परिदर्शयितुं कविः गद्यकाव्ये प्रकामं सुयोगं लभते। स्वरचनां यथा यथा प्रकाशयितुमिच्छति कविः तथा तथा सः कर्तुं समर्थः गद्यकाव्ये। गद्यकाव्ये कविः यदि किञ्चित् त्रुटिं करोति तर्हि त्रुटेः अधिकारी सः एव भवति। रचनादोषमन्यत्र सः नारोपयितुं शक्नोति। भोजराजस्य सरस्वतीकण्ठाभरणानुसारेण अटव्यादिवर्ण्णने गद्यं यथा समर्थं तथा न पद्यम्।

## ३. गद्यस्य वैशिष्ट्यम् -

संस्कृतसाहित्ये गद्यस्य विशेषता भूयसी वर्तते। यं भावं प्रकाशयितुं पद्येन कविः तथा न शक्नोति गद्येन तं भावं प्रकाशयितुं सः सहजतया सफलः भवति। समासादियोजनेन स्वल्पवाक्येन गद्यकविः स्वभावं सरलतया प्रकाशयति । समासः भाषायाः प्राणस्वरूपः भवति । अतः स्वल्पशब्दान् प्रयुज्य कविः भावाभिव्यक्तौ सफलः भवति, दीर्घसमासयोगेन ओजोगुणः गद्यसाहित्यस्य वैचित्र्यं सृजति। ओजोगुणः गद्यस्य जीवनं भवति। उक्तमस्ति - 'ओजःसमासभूयस्त्वमेतद्गद्यस्य जीवितम्' इति दण्डिना। वस्तुतः गद्यस्य एतादृशम् ओजोभूयस्त्वम् अस्माभिः रुद्रदाम्नः शिलालेखे हरिषेणस्य प्रयागप्रशस्तौ अपि द्रष्टुं शक्यते । पश्चिमभारतस्य प्रसिद्धक्षेत्रपस्य रुद्रदाम्नः गिरिनगरशिलालेखे भग्नसुदर्शनह्रदस्य वर्ण्णने दीर्घसमासयुक्ता रचना पाठकानां मनःसु अपूर्वं रोमाञ्चं जनयति। विजयस्तम्भस्य वर्ण्णने कविः हरिषेणः वक्ष्यमाणप्रकारमवलम्बते। यथा - 'सर्वपृथिवीविजयजनितोदयव्याप्तनिखिलावनितलां कीर्तिमितस्त्रिदश-पतिभवनगमनावाप्तललितसुखविचरणामाचक्षाण इव भुवोबाहुरयमुच्छ्रितः स्तम्भः' । साधारणतया कथानकवर्ण्णने गद्यकाव्ये सरलः मार्गः आश्रीयते। शास्त्रीयविचाराणां प्रकाशनाय उचितः मार्गः भवति गद्यम्। युक्तीनां प्रकाशने प्रौढगद्यस्य व्यवहारः शास्त्रेषु भवति।

## ४. गद्यस्य विकासः -

पूर्वमस्माभिः आलोचितं यत् गद्यस्य उत्पत्तिः वैदिककाले समभवत्। वेदे यम-यमी संवादादौ गद्यस्य प्रयोगः कृतः आसीत्। तदानीं सरलगद्यस्य प्रयोगः आसीत्। लौकिकसंस्कृतसाहित्ये प्रौढगद्यस्य प्रयोगः कृतः। उपमारूपकादिप्रयोगेण वैदिकगद्यं कमनीयं हृद्यं च भवति। उदाहरणार्थं वयम् अथर्ववेदस्य एकं गद्यभागं गृह्णीमः। यथा - 'ब्रत्य आसीदीयमान एव स प्रजापतिसमैरयत्। स प्रजापतिः सुवर्ण्णमात्मन्न पश्यत्। तत् प्राजनयत्। तदेकमभवत्। तल्ललाममभवत्। तन्महदभवत्। तज्जेष्ठमभवत् तद् ब्रह्माभवत्। तत् तपोऽभवत्। तत् सत्यमभवत्। तेन प्रजायत। (अथर्ववेदः, १५/१) लौकिकसंस्कृतसाहित्ये गद्यभागे समासभूयस्त्वं व्यवहृतम् । रुद्रदाम्नः शिलालेखमाकलयन्तु, तत्र कथं रचना प्रौढा वर्तते । यथा - 'प्रमाणमानोन्मानस्वरगतिवर्ण्णसारस्वतादिभिः परमलक्षणव्यञ्जनैरुपेतैकान्तमूर्तिना स्वयमधिगतमहाक्षत्र-पनाम्ना नरेन्द्रकन्यास्वयम्बरानेकमाल्यप्राप्तदाम्ना महाक्षत्रपेण रुद्रदाम्ना सेतुं सुदर्शनतरं कारितम्'। रुद्रदाम्नः अयं गिरिनगरशिलालेखः केनचित् तदीयसभापण्डितेन अज्ञातनाम्ना खीष्टीय १५० तमे वर्षे लिखितः इति ऐतिहासिकाः वदन्ति। पूर्वोक्तवैदिकगद्यात् लौकिकगद्यस्य पार्थक्यं साक्षात् अनुभूयते। अनन्तरं शास्त्रीयगद्यं मनोगतभावप्रकाशने सर्वजनप्रशंस्यं जातम्। एवम्भूतेष्वालोचकेषु पतञ्जलिः, शवरस्वामी, शङ्कराचार्य्यः, जयन्तभट्टः च मुख्याः भवन्ति । एषां गद्यानि उदात्तानि सन्ति । एषां गद्यपठने पाठकः कदाचित् तथा काठिन्यं नानुभवति। पतञ्जलेः महाभाष्यं विलक्षणशैलीयुक्तमस्ति। व्याकरणस्याकरग्रन्थत्वेन परिचितमिदं महाभाष्यं वहुशास्त्राणां पिण्डभूतं भवति । पतञ्जलेः गद्यं साधारणकथोपकथनात्मकं भवति । महाभाष्ये प्रयुक्तः गद्यभागः यथा - ये पुनः कार्य्याभावाः निवृतौ तावत् तेषां यत्नः क्रियते। तद् यथा घटेन कार्य्यं करिष्यन् कुम्भकारकुलं गत्वाह, कुरु घटं कार्य्यमनेन करिष्यामि इति। न तद्वत् शब्दान् प्रयुयुक्ष्यमाणो वैयाकरणकुलं गत्वाह, कुरु शब्दान् प्रयोक्ष इति। तावत्येवार्थमुपादाय शब्दः प्रयुज्यते। (पस्पशाह्निकः)

मीमांसकस्य शवरस्वामिनः भाष्यमपि सरलं भवति। यथा - 'इच्छयात्मानमुपलभामहे। कथमिति ? उपलब्धपूर्वे ह्यभिप्रेते भवतीच्छा। यथा मेरुमुत्तरेण यान्यस्मज्जातीयैरनुपलब्धपूर्वाणि स्वादूनि वृक्षफलानि न तानि प्रत्यस्माकमिच्छा भवति। (१/१/१५)

एवमपि - शङ्कराचार्य्यस्य भाष्यं सरलतरं प्रौढपाण्डित्यपूर्णमस्ति। माधुर्य्यप्रसादमण्डितमस्य गद्यं सरस्वत्याः वीणाझङ्कारमिवाभाति। एकं वाक्यं तावदाकलयन्तु, 'नहि पद्भ्यां पलायितुं पारयमाणो जानुभ्यां रंहितुमर्हति।' शङ्कराचार्य्यस्य ब्रह्मसूत्रोपरि गीतोपरि उपनिषदार्थोपरि यद् गद्यात्मकं भाष्यमस्ति तत् सर्वजनादृतं भवति।

कर्कशन्यायशास्त्रपण्डितः जयन्तभट्टोऽपि सुमधुरं गद्यं लिखति। यथा - 'आः क्षुद्रतार्किक ! सर्वथाऽनभिज्ञोऽसि। ब्रह्मैव जीवात्मनो नहि ततोऽन्ये। न हि दहनपिण्डाद् भेदेनापि भान्तः स्फुलिङ्गाः अग्निस्वरूपाः भवन्ति, तत् किं ब्रह्मण एवाविद्या ? न च ब्रह्मणोऽविद्या ?

एवं क्रमेण शास्त्रीयग्रन्थेषु गद्यस्य स्थितिः सामान्येनालोचिता। अधुना पालीगद्यानां स्थितिरालोच्यते। भगवान् बुद्धः साधारणजनतायाः अवबोधनाय पालीभाषया स्वोपदेशं दत्तवान्। बौद्धधर्मग्रन्थे त्रिपिटके पालीभाषया रचितं गद्यं सरलतरं भवति। पालीभाषया रचितजातकगल्पानि सुबोधानि भवन्ति।

आलोचकानां मतेन विक्रमात् चतुःशतबर्षेभ्यः पूर्वं गद्यात्मककथानामुदयः भवेत्। पाणिनेः सूत्रोपरि (४.२.६०) कात्यायनेन वार्तिकमेकं कृतम्, तद् यथा - 'आख्यानाख्यायिकेतिहासपुराणेभ्यश्च'। एतेन ज्ञायते कात्यायनसमये आख्यानाख्यायिकानां प्रचलनमासीत्। पतञ्जलिरपि वासवदत्तां सुमनोत्तरां भैमरथीञ्च आख्यायिकायामन्तर्भावयति। परन्तु एषां ग्रन्थानां सत्ता अधुना न विद्यते।

## ५. केषाञ्चन लौकिकसंस्कृतगद्यकाराणां परिचयः-

**सुबन्धुः** - लौकिकगद्यकाव्यलेखकेषु सुबन्धुः सर्वप्रथमः भवति। गद्यकाव्यस्य उत्कृष्टशैल्याः प्रकृष्टमुदाहरणमस्य गद्यकाव्यं 'वासवदत्ता' भवति। सुबन्धोः देशकालपितृमातृप्रभृतिविषये निर्दिष्टं किञ्चिदपि प्रमाणं नोपलभ्यते। महाकविः गद्यकारः बाणभट्टः अमुं प्रशंसति, इति हेतोः अयं सुबन्धुः बाणभट्टात् पूर्ववर्ती भवेत्। सुबन्धुः तस्य वासवदत्तायां लिखति - 'न्यायस्थितिमिव उद्योतकरस्वरूपाम्' एतेन ज्ञायते यत् सुबन्धुः नैयायिकस्य उद्योतकरस्य नाम गृह्णाति। अतः सः उद्योतकरस्य परवर्ती। अधुना अन्तरङ्गसाक्ष्यप्रमाणानुसारेण ज्ञायते यत् सुबन्धुः उद्योतकर - बाणभट्टयोः मध्यवर्तिनि काले भवेत्। आलोचकानां मतेन उद्योतकरस्य समयः ६ष्ठशतकम्। बाणभट्टः अपि ७म शतकस्यादिभागे (६०६-६४७खी) स्थितस्य महाराजस्य हर्षवर्धनस्य राजसाभायां पण्डितः असीत्। अतः सुबन्धोः समयः ६ष्ठ शतकस्य अन्तिमभागः भवेत्। संस्कृतसाहित्ये गद्यकाव्ये त्रिमूर्तिरूपाणां सुबन्धु-बाण-दण्डिनां समयः इत्थं निरूपयितुं शक्यते यत् - ६ष्ठ शतकस्यान्तिमभागः सुबन्धोः समयः। ७मशतकस्याद्यभागः बाणभट्टस्य समयः। ७मशतकस्य अन्तिमभागः दण्डिनः समयः इति।

सुबन्धुः वासवदत्तायां प्रारम्भे १०म श्लोके विक्रमादित्यस्य नामग्रहणं करोति, यथा -

'सा रसवत्ता विहता नवकाः विलसन्ति चरन्ति नो कङ्कः
सरसीव कीर्तिशेषं गतवति भुवि विक्रमादित्ये '। (१०म श्लोकः)

अत्र पद्ये विद्यमानं विक्रमादित्यं नीत्वा अनेके विद्वांसः मतं पोषयन्ति यत् राजानं यशोधर्माणमुद्दिश्य सुबन्धुः अत्र विक्रमादित्यपदं स्थापयति। यशोधर्मा पराक्रमिणः बालादित्यस्य साहाय्येन हूणाधिपं मिहिरकुलं पराजित्य भारतात् बहिष्कृतवान्। यशोधर्मणः समयः षष्ठशतक्स्य मध्यभागः भवति। अतः सुबन्धोः समयः इतः परं षष्ठशतकस्यान्तिमभागः भवेत्। सुबन्धुरपि वासवदत्तायां कालिदासस्य कामशास्त्रकारस्य वात्स्यायनस्य च नाम गृह्णाति। अतः एतयोः प्रभावः सुबन्धोरुपरि पतति। शाकुन्तले दुर्वाससःशापवृत्तान्तं सुबन्धुः लिखति। यथा - 'विफलमेव दुष्यन्तस्य कृते दुर्वाससः शापमनुवभूव शकुन्तला'। कामशास्त्रोपरि सः लिखति, 'कामसूत्रविन्यास इव मल्लनागघटितकान्तारसामोदः'। इति।

**ग्रन्थः -** 'वासवदत्ता' इति गद्यकाव्यं सुबन्धोः एकमात्रं कृतिः। अत्र विद्यमानं कथावस्तु काल्पनिकं कवेः मानसप्रसूतञ्च। उदयनस्य पत्न्या वासवदत्तया सह अस्य काव्यस्य संपर्कोनास्ति।

सुबन्धुरचितस्य 'वासवदत्ता' इति गद्यकाव्यस्य विषयवस्तु इत्थं भवति। चिन्तामणिनामधेयः कश्चित् राजा आसीत्। तस्य पुत्रस्य नाम कन्दर्पकेतुः। एकदा कन्दर्केतुः स्वप्ने एकां सुन्दरीं तरुणीं दृष्टवान्। सः स्वमित्रेण मकरन्देन सह स्वप्ने दृष्टायाः तरुण्याः अन्येषणं कर्तुं नगरात् प्रस्थितवान्। रात्रौ सः बिन्ध्यारण्ये एकस्य वृक्षस्याधः विश्रामं कृतवान्। वृक्षोपरि निवसन्ती सारिका शुकं कथयति यत् पाटलिपुत्रस्य नगरस्य राजकुमारी स्वप्ने एकं सुन्दरं तरुणमपश्यत्। तस्य तरुणस्य अन्वेषणाय राजकुमारी तमालिकां प्रेषितवती। ततः शुकदम्पतीसाहाय्येन कन्दर्पकेतुः स्वप्ने दृष्टां तरुणीं प्राप्तवान्। उभयोः मनसि गाढानुरागः आसीत्, परन्तु नायिकायाः वासवदत्तायाः पिता शृङ्गारशेखरः केनचित् विद्याधरेण सह स्वकन्यायाः वासवदत्तायाः विवाहं स्थिरीकृतवान्। एवम्भूतायां परिस्थितौ तौ दम्पती एकम् ऐन्द्रजालिकमश्वमारूह्य नगरात् दूरं पलायितौ अरण्यमार्गे क्लान्तत्वात् सुप्तस्य कन्दर्पकेतोः समीपात् कियद्दूरं भ्रमणार्थं वासवदत्ता गतवती। वनेचराः सुन्दरीं वासवदत्तामाप्तुं मिथः युद्धं कृतवन्तः। तास्मिन् समये वासवदत्ता एकस्मिन् मुनेराश्रमे आत्मगोपनं कृतवती। युद्धेन आश्रमः क्षतिग्रस्तः अभवत्। अतः तत्र मुनिः वासवदत्ताकृते अभिशापं दत्तवान् यत् 'त्वं शिला भव' इति, यतः त्वत्कृते आश्रमः नष्टः जातः।

निद्राभङ्गानन्तरं कन्दर्पकेतुः वासवदत्तां न प्राप्य आत्महत्यायै उद्यमं यदा करोति तदा आकाशवाणी तेन श्रुता यत् अवश्यं वासवदत्ता त्वया प्राप्तव्या, अतः आत्महत्यां न कुरु। ततः बहु अन्विष्य कन्दर्पकेतुः एकस्याः शिलायाः उपरि यदा उपविशति तदा सा शिला वासवदत्तारूपेण परिणमति। कन्दर्पकेतोः मित्रं मकरन्दः अपि वने कन्दर्पकेतुमन्विष्य दैवयोगेन तेन सह मिलितः भवति। अनन्तरं सर्वे राजधानीं प्रत्यागताः। तत्र कन्दर्पकेतुः सुखपूर्वकं जीवनम् अतिवाहितवान्। इदं तावत् 'वासवदत्ता' गद्यकाव्यस्य विषयवस्तु।

अत्र गद्यकाव्यस्य मूलविषयवस्तु तथा सरसं नान्ति। परन्तु सुबन्धुः स्वकविप्रतिभावलेन इमं विषयं सरसं सुन्दरं च विहितवान्। अत्र यादृशी विषयवस्तुवर्ण्णना सुबन्धुना विहिता रसान्विता च प्रतिपादिता, सा सुबन्धोः ख्यातिं सर्वत्र प्रसारितवती। वासवदत्तागद्यकाव्यस्य विषयवस्तु स्वल्पमपि वर्ण्णनापूर्ण्णत्वात् पाठकानां मनोहरति।

## ६. वासवदत्तागद्यकाव्यस्य समीक्षा -

सुबन्धुः मीमांसा-न्याय-बौद्धादिदर्शनेषु प्रवीणः पण्डितः आसीत्। वासवदत्तागद्यकाव्ये असौ श्लेषालङ्कारम् उपमाञ्चाश्रित्य प्रसङ्गानुसारेण रामायण-महाभारत-हरिवंशादिषु विद्यमानानि प्रसिद्धकथा-वस्तूनि उपन्यस्यति। अस्य मतेन तदेव सत्काव्यं भवेत् यत्र अलंकारस्य चमत्कारिता श्लेषस्य प्राचुर्य्यं वक्रोक्तेश्च उपयोजनं सुतरां भवति। एतादृश्या भावनया प्रेरितः सन् सुबन्धुः स्वरचनायां श्लेषस्य प्राचुर्य्यं निवेशयति। असौ वासवदत्तागद्यकाव्यस्य आद्यभागे १३श श्लोकस्य द्वितीयपादे लिखति - 'प्रत्यक्षरश्लेषमयप्रबन्धविन्यास - वैदग्ध्यनिधिर्निबन्धम्', अर्थात् तेन अत्र गद्यकाव्ये प्रत्यक्षरं श्लेषयोजनं करिष्यते इति सः प्रतिज्ञां करोति। प्रतिज्ञायाः निर्वाहमपि सः काव्येऽस्मिन् करोति। अतः सुबन्धुं सर्वे श्लेषकविरिति निगदन्ति। सभङ्गाभङ्गात्मकश्लेषयोजने सः महान् धुरन्धरः। स्थाने स्थाने तस्य श्लेषः अप्रसिद्धः अप्रयुक्तः कठिनश्च भवति।

कदाचित् तस्य श्लेषः प्रसन्नः रुच्युत्पादनकारी च भवति, यथा - चिन्तामणिवर्ण्णनाप्रसङ्गे 'नन्दगोप इव यशोदयान्वितः, जरासन्ध इव घटितसन्धिविग्रहः, भार्गव इव सदा न भोगः, दशरथ इव सुमित्रोपेतः, सुमन्त्राधिष्ठितश्च, दिल्लीप इव सुदक्षिणान्वितः रक्षितगुश्च' इत्यादिः। सुबन्धुः स्वकाव्ये उत्प्रेक्षादीनामलङ्काराणां योजनं करोति। एषु अलङ्कारेषु अपि श्लेषस्य सत्ता वर्तते। अनेकेषु स्थलेषु शब्दसाम्यमाश्रित्य उपमा अलङ्कारो वर्तते। श्लेषोपमारचने सुबन्धुः धुरी भवति। राज्ञः चिन्तामणेः वर्ण्णने असौ लिखति, 'नृसिंह इव दर्शितहिरण्यकशिपुक्षेत्रदानविस्मयः, कृष्ण इव कृतवसुदेवतर्पणः, नारायण इव सौकर्य्यसमासादितधरणिमण्डलः, कंसारातिरिव जनितयशोदानन्दसमृद्धिः, आनकदुन्दभिरिव कृतकाव्यादरः, सागरशायीवानन्तभोगिचूडामणिमरीचिरञ्जितपादपद्मः, ..... इत्यादिः। सत्कवीनां भणितिः पाठकानां कर्ण्णेषु सुधाधारां वमतीत्यस्याभिप्रायः। सः लिखति, -

अविदितगुणाऽपि सत्कविभणितिः वमति कर्ण्णेषु मधुधाराम्।
अनधिगतपरिमलाऽपि हि हरति दृशं मालतीमाला'। (श्लो.११)

अत्र तात्पर्य्यमिदं यत् सत्कवीनां भणितिः अज्ञातगुणापि श्रोतॄणां कर्ण्णेषु अमृतधारां प्रवाहयति। यथा गन्धेनापरिचिता मालतीमाला दर्शकानां नेत्राणि हरति। सुबन्धुः अतिसरलश्लेषं प्रयुज्य काव्ये चमत्कारविस्तारे प्रवीणः भवति। आकलयन्तु एकं पद्यं तस्य। तत्र सरलशब्दयोजनेन श्लेषः स्थापितः सुबन्धुना। यथा -

'विषधरतोऽप्यतिविषमः खल इति न मृषा वदन्ति विद्वांसः।
यदयं नकुलद्वेषी स कुलद्वेषी पुनः पिशुनः।' (६. श्लोकः)

अत्र तात्पर्य्यमिदं यत्, विद्वांसः सदा कथयन्ति खलजनः सर्पादप्यतिविषमः (भयङ्करः) यतोहि सर्पः नकुलद्वेषी (शत्रुः) खलः (पिशुनः) कुल (वंश) द्वेषी। सर्पः कुलद्वेषी नास्ति (न कुलद्वेषी) खलस्तु निजकुलद्वेषी भवति। अत्र पद्ये नकुलपदे सभङ्गश्लेषं योजयन् सुबन्धुः काव्यमाधुरीं वर्धयति। सुबन्धुः काव्ये यदा श्लेषरहितं प्रकृतिवर्ण्णनं करोति, तदा तद् वर्ण्णनं यथेष्टं रुचिकरं भवति। सुबन्धोः काव्ये कलापक्षः समधिकः वर्तते। कलापक्षपूर्ण्णे प्रासादे सवत्र उपमाश्लेष-विरोधपरिसंख्या-उत्प्रेक्षादिपुष्पाणि

सुसज्जितानि सन्ति। सुबन्धोः पाण्डित्यपूर्णकाव्यपरिपाटीमालोक्य रसिकाः आलोचकाः बाणभट्टादयः कथयन्ति यत् - 'कबीनामगलद् दर्पो नूनं वासवदत्तया,

शक्त्येव पाण्डुपुत्राणां गतया कर्ण्णगोचरम्।'

सुबन्धु- बाणभट्टयोः रचनामध्ये महदन्तरं वर्तते। सुबन्धोः गद्यभागः यदा महाड़म्बरयुक्तः भवति, तदा बाणस्य गद्यभागः स्निग्धः रसपेशलः च भवति। पाञ्चालीरीतेः कृते बाणस्य गद्यभागः विस्तृतप्राङ्गणतुल्यः। वर्ण्णनानुसारेण आवश्यकशब्दयोजनां बाणः कादम्वर्य्यां हर्षचरिते च करोति। सुबन्धुः स्वपाण्डित्यप्रगल्भात् सर्वत्र श्लेषयोजनं करोति। येन सहृदयाः पाठकाः मस्तिष्कस्य व्यायामे वाध्याः भवन्ति, येन अन्यान्यगद्यकाव्यापेक्षया वासवदत्तायाः लोकप्रियता ह्रस्वा च भवति। एतत्विद्यमानत्वेऽपि काव्यरचने धुरन्धरत्वात् सुबन्धुरपि महाकविपदभाक् भवति। उक्तमस्ति यत् -

'सुबन्धुर्बाणभट्टश्च कविराज इति त्रयः

वक्रोक्तिमार्गनिपुणाः चतुर्थो विद्यते न वा।'

**बाणभट्टः-**

सुबन्धोरनन्तरं बाणभट्टः गद्यकाव्यकर्तृत्वेन द्वीतीयः भवति। असौ ७मशतके महाराजस्य हर्षवर्धनस्य (ख्री. ६०६-६४७) राजसभायां पण्डितः आसीत्। अनेन विरचितस्य कादम्बरीगद्यकाव्यस्य प्रारम्भे अस्य परिचयविषये किञ्चित् तथ्यमुपलभ्यते। एवमपि हर्षचरिते अस्य आत्मकथा वर्णिता अस्ति। अस्य पूर्वजाः शोणनदीनिकटे विद्यमाने प्रीतिकूटनामकनगरे अवसन्। विहारराज्यस्य पश्चिमभागे स्थानमिदं भवति। बाणस्य पूर्वपुरुषाः धर्मादिकार्य्ये प्रसिद्धाः आसन्। तस्य वंशः वात्स्यायनगोत्रे आसीत्। बाणस्य एकस्य पूर्वजस्य नाम कुवेरः आसीत्। वेदमध्येतुं शिष्याः तस्य गृहे सर्वदा एकत्रिताः अभवन्। यदा शिष्याणां वेदोच्चारणे काचित् त्रुटिः भवति, तदा शुकाः शिष्यान् तर्जितवन्तः। कादम्वर्य्यां बाणः एतत् स्पष्टं लिखति। यथा -

'जगुर्गृहेऽभ्यस्तसमस्तवाङ्मयै ससारिकैः पञ्जरवर्तिभिः शुकैः।

निगृह्यमाणाः वटवः पदे पदे यजूंषि सामानि च यस्य शङ्किताः।'

कुवेरस्य चतुर्षु पुत्रेषु पशुपतिः सर्वकनिष्ठः आसीत्। तस्य पुत्रः अर्थपतिः। अर्थपतेः पुत्रः चित्रभानुः। चित्रभानोः पुत्रः स्वयं बाणभट्टः। वाल्यकाले बाणभट्टः स्व पितरौ हारितवान्। बाणस्य पैतृकी संपत्तिः प्रचुरा आसीत्। सुयोग्याभिभावकं विना बाणः बाल्यकाले विपथगामी अभवत्। कुसखायुक्तः असौ आखेटादिकिर्मसु मग्नः अभवत्। ततः असौ देशाटनमपि कृतवान्। यदा असौ गृहं प्रत्यागतः तदा प्रतिवेशिभिरसौ उपहसितः। देशाटनकाले असौ शास्त्रादि अधीतवान्, येन पूर्वसंस्कारवशात् असौ ज्ञानी संजातः। एकदा श्रीहर्षस्य भ्रातुष्पुत्रेण कृष्णेन एकः चरः बाणं प्रति प्रेषितः। चरः बाणमुद्दिश्य अवहेलनं प्रदर्शयामास। अनन्तरं बाणस्य पाण्डित्येन मुग्धः सन् राजा तस्मै आश्रयादिकं दत्तवान्। ततः राज्ञः सभायां सः मुकुटमणिरिव शुशुभे।

बाणभट्टः साक्षात् श्रीहर्षसंपर्केण आगत्य यदनुभूतवान् तत्सर्वं विभिन्नालङ्कारभूषितं कृत्वा 'हर्षचरितम्' इति गद्यकाव्यं (आख्यायिकाम्) रचितवान्। बाणस्य पैतृकसंपत् प्रचुरा आसीत्। श्रीहर्षस्य

संपर्केण तस्य संपत्तिः बहुगुणेन वर्धिता। सः तस्य जीवने निर्धनतां न कदाचिदनुभूतवान्। सः विवाहितः आसीत्। तस्य पुत्राः अपि आसन् । कादम्बरी गद्यकाव्यं न समाप्य सः इहधामत्यागं कृतवान्। मरणात् पूर्वं किम्बदन्त्यनुसारेण सः स्व पुत्रानाहूतवान्। गृहसमीपे पतितं शुष्कं काष्ठमेकं प्रदर्श्य सः पुत्रान् उक्तवान् 'किमिदमिति'। ततः पुत्राः उक्तवन्तः 'शुष्कं काष्ठं तिष्ठत्यग्रे'। परन्तु अपरः एकः पुत्रः उक्तवान्। 'नीरसतरुवरोविलसति पुरतः' एतत् श्रुत्वा बाणभट्टः अर्धलिखितां कादम्बरीं समापयितुं तमादिदेश। तस्य नाम पुलिनभट्टः। सोऽपि कादम्बर्य्याः उत्तरार्धे प्रारम्भे लिखति -

याते दिवं पितरि तद्वचसैव सार्धं विच्छेदमाप भुवि यस्तु कथाप्रबन्धः।

दुःखं सतां तदसमाप्तिकृतं विलोक्य प्रारब्ध एष च मया न कवित्वदर्पात्।

अत्र तात्पर्य्यमिदं यत् - जनके (बाणभट्टे) स्वर्गं याते सति तद्रचितः कथाप्रबन्धः असमाप्तः अभवत्। अतः सतां मनसि महद्दुःखं जातम्। सतां दुःखं दूरीकर्तुं मया असमाप्तस्यास्य कादम्बरीत्याख्यस्य गद्यकाव्यस्य समाप्तये यत्नः क्रियते, न तु पाण्डित्यप्रदर्शनाय।

केचन कथयन्ति यत् सूर्य्यशतकस्य रचयिता मयूरभट्टः बाणस्य श्वशुरः आसीत्। अस्मिन् समये प्रसिद्धः जैनविद्वान् मानतुङ्गाचार्य्यः आसीत्। वल्लभीनगरस्य शासकस्य श्रीधरसेनस्य राजसभापण्डितः महाकविः भट्टिः अस्यां शताद्यामासीत्। गौतमन्यायसूतस्य भाष्यमाश्रित्य न्यायवार्तिकलेखकः उद्योतकरः अपि अस्यां शताब्द्यामासीत्। दण्डी कविरपि बाणस्य परवर्तिनि काले आविर्भूतः आसीत्। अतः बाणभट्टस्य समये प्रायशः शतवर्षाणि व्याप्य संस्कृतसाहित्याकाशः एभिः पूर्वोक्तैः ज्योतिष्कैः शोभितः आसीत्।

बाणभट्टस्य कादम्बरी गद्यकाव्यम्, हर्षचरितमिति आख्यायिका च अतिप्रसिद्धमस्ति। एतद्भिन्नं 'मुकुटताडितकम्' इति एकं नाटकं बाणेन रचितमिति नलचम्प्वाः टीकाकारेण चण्डपालेन, गुणविजयगणिना च निर्दिष्टम्। भीमः दुर्य्योधनं मारयित्वा तस्य मुकुटं च्छिन्नं भिन्नं च करोतीति महाभारतीयकथामाश्रित्य नाटकमिदं रचितम्।

अपरे केचिद् 'यादृग् गद्यविधौ बाणः पद्यबन्धेऽपि तादृशः' इति आभाणकानुसारेण कल्पयन्ति यत् गद्यकाव्यकादम्वर्य्याः विषयवस्तु पद्यरूपेण बाणः रचितवान् इति। तदेव पद्यकादम्वरी' इति भवति। बाणभट्टस्य पाण्डित्येन मुग्धाःसन्तः गोवर्धनाचार्य्यप्रमुखाः पण्डिताः कथयन्ति यत् -

'जाता शिखण्डिनी प्राग् यथा शिखण्डी तथाऽवगच्छामि

प्रागल्भ्यमधिकमाप्तुं वाणी बणोवभूवेति।'

अर्थात् स्वयं वाणी (सरस्वती) अधिकं प्रागल्भ्यमाप्तुं बाणरूपेण प्रादुर्भूता इति। बाणभट्टस्य गद्यरचनाचमत्कारं विलोक्य त्रिलोचन कविः कथयति यत् -

'हृदि लग्नेन बाणेन यन्मन्दोऽपि पदक्रमः

भवेत् कविकुरङ्गाणां चापलं तत्र कारणम्।'

राजशेखरोऽपि कथयति - 'शब्दार्थयोः समः गुम्फः पाञ्चाली रीतिरिष्यते।

शिलाभट्टारिकावाचि बाणोक्तिषु च सा यदि।'

कादम्वर्य्यां बाणः शुकनासमुखेन चन्द्रापीडं प्रति यथा उपदेशप्रदानं करोति तदेव भारतीयसंस्कृतेर्मूलम्। तदेव चिरदिनं यावत् भास्वरं स्थास्यति।

**महाकविदण्डी –** महाकविः दण्डी अपि महान् गद्यकारः भवति। गद्यकाव्यस्वर्णत्रिभुजस्य स्वर्णभुजसमानाः सुबन्धु-बाण-दण्डिनः भवन्ति। बाणस्य परवर्तिनि काले दण्डी प्रादुरभूदिति आलोचकाः आमनन्ति। त्रयोदण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः' इत्युक्त्यनुसारेण दण्डिनः त्रयः प्रबन्धाः प्रसिद्धाः सन्ति। ते यथा - १- अवन्तिसुन्दरीकथा, २- दशकुमारचरितम्, ३, काव्यादर्शः। अवन्तिसुन्दरीकथायां दण्डी स्व परिचयं स्वल्पतया ददाति। यथा - महाकवेर्भारवेः त्रयः पुत्राः आसन्। त्रिषु पुत्रेषु मनोरथः मध्यमः आसीत्। मनोरथस्यापि चत्वारः पुत्राः आसन्। तेषु पुत्रेषु वीरदत्तः सर्वकनिष्ठः आसीत्। सोऽपि महान् दार्शनिकः आसीत्। तस्य पत्न्याः नाम गौरी। गौरी - वीरदत्तयोः पुत्रत्वेन दण्डी जातोऽभवत्। बाल्यकाले दण्डिनः पितरौ मृतौ। तस्य शिक्षादिविषये किञ्चिन्न ज्ञायते। तदा काञ्चीप्रदेशे एकः महान् विप्लवः संजातः। दण्डी तेन हेतुना काञ्चीं विहाय अन्यत्र भ्रमितवान्। ततः प्रशान्ते विप्लवे सः पुनः काञ्चीमागतः। काञ्च्यां पल्लववंशीयनरेशस्य सभापण्डितः सः अभवत्। महाकविदण्डिनः वंशः एकः शिक्षितः प्रभावशाली धनाढ्यश्च आसीत्। दण्डिनः समयः ८म शतकं भवेत्। यतोहि सिंहलभाषया रचितः 'सिय-वस-लकर' (स्वभाषालङ्कारः) इति ग्रन्थः राजसेनप्रथमेन निर्मितः। असौ राजा ख्री ८४६-६६ मध्ये शासनं कृतवान्। अस्य ग्रन्थस्य विषयवस्तु काव्यादर्शस्य विषयवस्तुन आधारेण वर्तते। अतः एतस्मात् समयात् पूर्ववर्ती दण्डी भवेत्।

काव्यादर्शे दण्डी लिखति - 'अरत्नालोकसंहार्य्यमवार्य्यं सूर्य्यरश्मिभिः
दृष्टिरोधकरं यूनां यौवनप्रभवं तमः।'

अयं लेखः बाणभट्टस्य कादम्बरीप्रभावितः इति ज्ञायते। बाणभट्टः कादम्बर्य्यां शुकनासोपदेशे लिखति - 'केवलञ्च निसर्गत एव अभानुभेद्यमरत्नालोकच्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमोयौवनप्रभवम्' अस्य प्रभावः नूनं दण्डिनः उपरि पतेत्। अतः बाणभट्टस्यानन्तरं दण्डिकविः भवेत्। दशकुमारचरिते दण्डिनः काव्यलालित्यमवलोक्य आलोचकाः कथयन्ति यत् - दण्डिनः पदलालित्यम्' इति। दण्डिरचनासु अवन्तिसुन्दरीकथा, दशकुमारचरितञ्च गद्यकाव्यम्, काव्यादर्शः अलङ्कारशास्त्रम्।

**घनपालः –** गद्यकाव्यकारेषु घनपालः अन्यतमः। पूर्ववर्तिनः कवयः गद्यकाव्यस्य यां धारां प्रचालितवन्तः, तां धारामपि घनपालः अक्षरशः पालयति। १०म शतके आविर्भूतो घनपालः महान् पण्डितः आसीत्। अस्य गद्यकाव्यस्य नाम 'तिलकमञ्जरी' भवति। घनपालः काश्यपगोत्रीयः जैन आसीत्। भोजराजस्य पितृव्यस्य मुंजस्य राजसभायामसौ पण्डितः आसीत्। अनेन विरचितस्य 'तिलकमञ्जरी' इति गद्यकाव्यस्य बन्धः ओजस्यी प्रभावशाली च अस्ति।

प्रबन्धचिन्तामणेः अनुसारेण अस्य परिचयः वक्ष्यमाणरूपेण वर्तते। उज्जयिन्यां सर्वदेवनामकः कश्चित् काश्यपगोत्रीयः द्विजः आसीत्। तस्य द्वौ पुत्रौ आस्ताम्। ज्येष्ठः घनपालः, यः तिलकमञ्जर्य्याः

कर्ता, कनिष्ठः शोभनः। एकदा सर्वदेवः स्वगृहे संचितगुप्तधनविषये श्रीवर्धमानसूरिनामकं कमपि जैनतपस्विनं पृष्ठवान्, अपि च यदि गुप्तधनं लभ्यते तर्हि तस्मात् अर्धं प्रदातुं प्रतिज्ञातवान्। जैनतपस्वी सर्वदेवस्य पुत्रद्वयं गुप्तधनमिति उक्त्वा अर्धं नेतुमुक्तवान्। ततः यदा पिता सर्वदेवः ज्येष्ठं घनपालं जैनधर्मंग्रहीतुं कथितवान्, तदा ब्राह्मणधर्माभिमानी घनपालः तत् नाङ्गीकृतवान्। पश्चात् सर्वदेवः कनिष्ठपुत्रं शोभनं जैनधर्मेण दीक्षितं कारयित्वा जैनतपस्विरूपेण जीवनयापनं कर्तुं प्रचोदितवान्।

पश्चात् कनिष्ठभ्रातृ-अनुराणी घनपालः अपि जैनधर्मेण दीक्षितोऽभवत्। असौ मुञ्जस्य ततः परं भोजस्य च राजसभायां पण्डित आसीत्। मुञ्जः अस्य पाण्डित्येन मुग्धः सन् 'सरस्वती' इत्युपाधिना अमुं विभूषितवान्। मुञ्जानन्तरं भोजस्य राजसभायामपि असौ सम्मानितः आसीत्। भोजेन प्रोत्साहितः असौ तिलकमञ्जरीं लिखितवान्। एतद्विहाय' ऋषभपञ्चाशिका' 'प्राकृतलक्ष्मीः' नाममाला च इति अपराः कृतयः अस्यासन्। बाणभट्टदर्शितमार्गेण घनपालः स्वगद्यकाव्यं रचितवान्। सः सुबोधशैलीं स्वकाव्ये प्रयुक्तवान्। दीर्घसमासं प्रति अस्यातीवाग्रहो नासीत्, तेन हेतुना तस्य भाषा सर्वसाधारणबोधगम्या आसीत्।

**वादीभसिंहः** – घनपालानन्तरम् एकादशशतके वादीभसिंहः इति अपरः एकः गद्यकाव्यकारः प्रादुरासीत्। वादीभसिंहस्य गद्यशैली अतीवमनोहरा वर्तते। अस्य गद्यकाव्यस्य नाम 'गद्यचिन्तामणिः'। जिनसेननामकमहाकविना प्रणीते 'महापुराणे' वर्णितस्य जीबन्धरस्य कथामाश्रित्य वादीभसिंहः 'गद्यचिन्तामणिः' इति गद्यकाव्यं रचितवान्। इदं विषयवस्तु एकादशलम्बकैः उपस्थापितम्। अनन्तरं वादीभसिंहः स्वगद्यकाव्यस्थविषयं ७४१ अनुष्टुप्पद्यैः विरचितावान्। सः अस्य पद्यकाव्यस्य नाम 'क्षत्रचूडामणिः' इति कृतवान्। परवर्तिनि समये हरिचन्द्रनामधेयः कविः वादीभसिंहप्रणीतपूर्वोक्तकाव्यद्वये वर्णितविषयवस्तूपजीव्य 'जीबन्धरचम्पूः' इति चम्पूकाव्यं प्रणीतवान्।

**वामनभट्टबाणः** – बामनभट्टबाणः 'वेमभूपालचरितम्' (वीरनारायणचरितम्) इति एकं श्लाघनीयं गद्यकाव्यं रचितवान्। वेमभूपालः केवलं कवीनामाश्रयदाता नासीत्, अपि तु सरस्वत्याः महान् उपासकः आसीत्। सः पञ्चदशशतके (ख्री १४०३) स्वपितुः पेड्डकोमटीन्द्रादनन्तरं राजा अभवत्। असौ राजा महानुदारः दानशीलश्चासीत्। अस्य राजसभायां वामनभट्टबाणः पण्डितः आसीत्। अतः वामनभट्टबाणस्य समयः पञ्चदशशतकं भवेत्। वेमभूपालस्य चरित्रमाश्रित्य सः वेमभूपालचरितमिति गद्यकाव्यं लिलेख। वामनभट्टबाणः वत्सगोत्रीयः, कोमटियज्वा इत्यस्य पुत्रश्चासीत्। बाणभट्टस्य हर्षचरितद्वारा अनुप्राणितः असौ वेमभूपालचरित्रं रचितवान्। षड्भाषावल्लभः, कविसार्वभौमः, अभिनवभट्टबाणश्च इति त्रिभिरुपाधिभिरयं विभूषितः आसीत्। अस्य पदविन्यासः मधुरः रसपेशलश्च भवति। अलङ्कारयोजने असौ पारङ्गमः आसीत्। कादम्बरी-हर्षचरितप्रणेतारं वत्सगोत्रसमुत्पन्नं बाणभट्टं पराजेतुमनेन वेमभूपालचरितम्' रचितमिति वेमभूपालगद्यकाव्यस्य ६ष्ठ श्लोकात् ज्ञायते। यथा –

'बाणादन्ये कवयः काणाः खलु सरस-गद्यसरणीषु।
इति जगति रूढमयशो वामनबाणोऽपमार्ष्टि वत्सकुलः'

वामनभट्टबाणस्य अन्यान्यरचनाः यथा - १. नलाभ्युदयम्, (नलराजविषयकमसंपूर्णं काव्यम्) २. रघुनाथचरितम्, ३.पार्वतीपरिणयम्, १. कनकलेखा, ५. शब्दचन्द्रिका, ६. शब्दरत्नाकरः । (कोषग्रन्थः) एतेनासौ वामनभट्टबाणः एकः असाधारणपाण्डित्यस्याधिकारी आसीदिति ज्ञायते।

**विश्वेश्वरपाण्डेयः** - विश्वेश्वरपाण्डेयस्य 'मन्दारमंजरी' इति गद्यकाव्यं बाणभट्टस्य कादम्बरीमनुसृत्य रचितम् । विश्वेश्वरपाण्डेयः उत्तरप्रदेशस्य आलमोडामण्डलान्तर्गतपाटिआग्रामे कृतनिवासस्य लक्ष्मीधरस्य पुत्रः आसीत् । असौ भरद्वाजगोत्री ब्राह्मणः आसीत् । अस्य पिता लक्ष्मीधरपाण्डेयः वृद्धाबस्थायां काशीमागत्य भगवन्तं विश्वनाथं पूजितवान् । तस्यालौकिककृपया लक्ष्मीधरः बृद्धकाले अमुं विश्वेश्वरं पुत्ररूपेण प्राप्तवान् । भगवतः विश्वनाथस्य कृपया लब्धस्य पुत्रस्य नाम 'विश्वेश्वरः' इति जातम् । असौ महान् शेमुषीशाली आसीत् । बहवः ग्रन्थाः अनेन विरचिताः अष्टादशशतकस्य पूर्वार्धे असौ पण्डितमौलिमणिः आविरासीत्। यतोहि अस्य पुत्रेण जयकृष्णेन लिखिता रसमञ्जरी १६४३ शकाब्दीया (१७२१ खीष्टाब्दीया) उपलभ्यते। कर्णाकर्णिकया श्रूयते यदसौ चत्वारिंशे आयुष्क्रमे मृत्युवरणं कृतवान्।

'मंदारमञ्जरी' अस्य अद्वितीया रचना। पूर्वभागः उत्तरभागश्चेत्यस्याः भागद्वयमस्ति। मन्दारञ्जर्य्याः पूर्वभागःविश्वेश्वरेण विरचितः। उत्तरभागस्तु तस्य केनचित् शिष्येण विरचितः इति विद्वांसः आमनन्ति। उत्तरभागस्तु संपूर्णतया न लभ्यते । अस्मिन् गद्यकाव्ये प्रारम्भे २१ अध्यायाः सन्ति । येषु देवतानां स्तुत्यनन्तरं कविः विश्वेश्वरः वाल्मीकि-व्यास-कालिदास-भवभूति-सुबन्धु-बाणादीन् महाकवीन् स्तौति ।

गद्यकाव्यस्य समस्तगुणाः मन्दारमञ्जर्य्यां वर्तन्ते। येन काव्यमिदं पाठकानां मनोहरति। कालिदासस्य स्तुतिपरकः आर्य्याछन्दसा रचितः श्लेषमयः एकः श्लोकः कियान् कमनीयो न भवति ? यथा -

'नेत्रीकृताग्निमित्रा कुमारसूर्जनितमेघरघुभावा।
कवितामिषेणकाली वशं गता कालिदासस्य'। (८मश्लोकः)

अत्र तात्पर्य्यमिदं यत् - स्वयं भगवती काली कविताछलेन कालिदासस्य अधीनतां गता। सा कवितारूपिणी काली कीदृशी इति जिज्ञासायां कविः विश्वेश्वरः कथयति यत्, नेत्रीकृताग्निमित्रा, अर्थात् कालिदासस्य कवितायाम् (नाटके) अग्निमित्रनामकः राजा नेतृरूपेण वर्तते । (मालविकाग्निमित्रनाटके अग्निमित्रः नायकः) काली अपि अग्नि-मित्र (सूर्य्य) नयना वर्तते, अर्थात् तस्याः एकं नयनम् अग्निरूपम्, अपरं च सूर्य्यरूपम्। कालिदासस्य कविता कुमारसूः, अर्थात् कुमारसम्भवम् इति काव्यजनयित्री। काली अपि कुमारस्य कार्तिकेयस्य सूः (जनयित्री) कालिदासस्य कविता जनितमेघरघुभावा, अर्थात् मेघदूत-रघुवंशकाव्यजनयित्री। काली अपि वर्ण्णेन कृष्णवर्णात्वात् मेघस्य लघुभावजनिका भवति। रलयोरभेदात् रघुभावा इत्यत्र लघुभावा इति पठनीयम्। काल्याः कृष्णभावापेक्षया मेघस्य कृष्णभावः लघुः भवतीत्यर्थः । एतेन विश्वेश्वरस्य पाण्डित्यं ज्ञायते।

**अम्बिकादत्तव्यासः** - उनविंशशतके आविर्भूतः अम्बिकादत्तव्यासः गद्यकाव्यकारेषु अन्यतमः भवति । 'शिवराजविजयम्' इति एकं नवीनमनवद्यं गद्यकाव्यं विरचय्य असौ गद्यकाव्यकारेषु प्रमुखं

स्थानमधिकरोति। अत्र छत्रपतिशिवाजिमहाराजस्य दिग्विजयविषयः वर्ण्णितः। काव्यमिदं घटनाप्रधानं भवति। अत्र देशभक्तेः प्राधान्यं वर्ण्णितमस्ति। अत्र १२ निःश्वासाः सन्ति। ऐतिहासिकपुरुषस्य शिवाजिमहाराजस्य मोगलसाम्राज्यं विरुध्य कृतं कार्य्यकलापमत्र वर्ण्णयति कविः। अत्र व्यवहृता भाषा अत्यन्तं सरला वर्तते घटनाऽपि बहुलतया सत्यमाधारीकृत्य वर्ण्णितास्ति। संपूर्ण्णे गद्यकाव्ये भारतीयभावना विराजते। अम्बिकादत्तव्यासः स्वयम् एकः असामान्यप्रतिभाधिकारी आसीत्। असौ महान् वक्ता शतावधानी चासीत्। अस्य जन्म राजस्थाने आसीत्, परन्तु अस्य कार्य्यक्षेत्रं विहारप्रदेशः आसीत्। अस्य समयः १९१५ खी तः १९५७ खी मध्ये आसीत्। १९४५-५० मध्ये शिवराजविजयस्य रचना अभवत्। ऐतिहासिकोपन्यासरूपेण अस्य 'शिवराजविजयम्' संस्कृतसाहित्यं चिरभास्वरं करोति।

## ७. बोधप्रश्नाः -

१. गद्यस्य उत्पत्तिविषये आलोचनां कुरुत।

२. गद्यस्य क्रमिकविकाशः कथमभवत्।

३. बाणभट्टः तस्य कृतिश्च इति विषये आलोचयत।

४. सुबन्धोः परिचयं दत्त।